CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ प्रास्ताविक-संहितामन्त्राणामकाराद्यनुक्रमणिका-वेदपारायणविध्यनुवाकसूत्राध्यायाष्टविकृति-
याज्ञवल्क्यशिक्षा-प्रतिज्ञासूत्र-सर्वानुक्रमसूत्र-पारस्करगृह्यसूत्रादिसमलङ्कृता

शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता प्रारभ्यते ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हेमाद्रिकृतचतुर्वर्गचिंतामणिस्थव्रतखंडोक्तविश्वकर्मशास्त्रवचनानुसारेण शिक्षासहितवेदस्वरूपाणि.

ऋग्वेदः श्वेतवर्णः स्यात्
द्विभुजो रासभाननः ।।
अक्षमालायुतः सौम्यः
प्रीतश्चाध्ययनोद्यतः ।।१।।

अजास्यः पीतवर्णः स्यात्
यजुर्वेदोऽक्षसूत्रधृक् ।।
वामे कुलिशपाणिस्तु
भूतिदो मंगलप्रदः ।।२।।

नीलोत्पलदलाभासः
सामवेदो हयाननः ।।
अक्षमालान्वितो दक्षे
वामे कंबुधरः स्मृतः ।।३।।

अथर्वणाभिधो वेदो
धवलो मर्कटाननः ।।
अक्षसूत्रं च खट्वाङ्गं
बिभ्राणो यजनप्रियः ।।४।।

शिक्षा शुभ्राभयकरा
ज्ञानमुद्रान्विता शुभा ।।
अक्षसूत्रा सकुंडीका
द्विभुजा दंडपंकजा ।।५।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ शुक्लयजुर्वेदसंहितानुक्रमणिका ।

विषयाः	पृष्ठाङ्काः	विषयाः	पृष्ठाङ्काः
१ संशोधयितुः प्रास्ताविकम्	१–६	८ याज्ञवल्क्यशिक्षा	१७८–१८९
२ संहितामन्त्राणामकाराद्यनुक्रमणिका	७–३२	९ प्रतिज्ञासूत्रम्	१९०–०००
३ वेदपारायणविधिः	३३–३५	१० सर्वानुक्रमसूत्रम्	१९०–२१२
४ अनुवाकसूत्राध्यायः	३६–३८	११ पारस्करगृह्यसूत्रम्	२१३–२४१
५ संहितायाः पूर्वविंशतिः	१–२३२	१२ पारस्करगृह्यसूत्रपरिशिष्टं (श्राद्धसूत्रम्)	२४२–२४४
६ संहिताया उत्तरविंशतिः	१–१४५	१३ ” ” (स्नानसूत्रम्)	२४५–०००
७ अष्टविकृतिमन्त्राः	१४८–१७६	१४ ” ” (भोजनसूत्रम्)	२४५–२४७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ प्रास्ताविक-संहितामन्त्राणामकाराद्यनुक्रमणिका-वेदपारायणविध्यनुवाकसूत्राध्यायाष्टविकृति-
याज्ञवल्क्यशिक्षा-प्रतिज्ञासूत्र-सर्वानुक्रमसूत्र-पारस्करगृह्यसूत्रादिसमलङ्कृता

शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता

बम्बई पुस्तक भवन, कचौड़ी गली

वाराणसी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशक :
बम्बई पुस्तक भवन, कचौड़ी गली
फोन : 0542- 2410017 (दुकान)
0542- 2411563 (घर)
मोबाइल : 9450182382

संस्थापक :
स्व० सोमनाथ खन्ना

मूल्य :
पत्रकार- 250/- भा० रु०
सजिल्द- 275/- भा० रु०

मूल रूप से निर्णय सागर प्रेस, मुम्बई द्वारा प्रकाशित
पुनर्मुद्रण संस्करणः 2005

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीवेदपुरुषाय नमः ॥

गणनाथसरस्वतीरविशुक्रबृहस्पतीन् ॥ पंचैतान् संस्मरान्नित्यं वेदवाणीं प्रवर्तयेत् ॥ अथानुवाकसूत्रम् ॥ इषेत्त्वैका, वसोः पवित्रंतिस्रोऽग्नेव्रतपते सप्त, पवित्रेस्थो द्वे, शर्म्मासितिस्रो, धृष्टिरसिशर्म्मासिद्विकौ, देवस्यत्त्वा तिस्रो, देवस्यत्त्वा पंच, प्रत्युष्टꣳरक्षास्तिस्रो, दशैकत्रिꣳशत् ॥ हरिःॐ ॥ इषेत्त्वा ॥

इषेत्त्वोर्ज्जेत्त्वावायवस्त्थदेवोवः सविताप्प्रार्प्पयतुश्रेष्ठतमाय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ १ ॥ कर्म्मणऽआप्प्यायद्धमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवा
ऽअंयक्ष्माामावस्तेनऽईशतमाघशंꣳसोद्ध्रुवाऽअस्मिन्गोपतौ
स्यातबह्वीर्य्यजमानस्यपशून्पाहि ॥ १ ॥ [१-१] वसोंः
पवित्रम् ॥ वसोंःपवित्रमसिद्यौरसिपृथिव्यसिमातरिश्वनो
घर्म्मोसिविश्वधाऽअसि ॥ परमेणधाम्नादृꣳहस्वमाह्वार्म्माते
यज्ञपतिर्ह्वार्षीत् ॥ २ ॥ वसोंःपवित्रम् ॥ वसोंःपवित्रमसि ॥ १ ॥
शतधारंवसोंःपवित्रमसिसहस्रधारम् ॥ देवस्त्वासवितापुनातु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्वसोꣳ पवित्त्रेणशतधारेणसुप्प्वाकामधुक्षꣳ ॥ ३ ॥ साव्विश्श्वा

युः ॥ साव्विश्श्वायुꣳसाव्विश्श्वकर्म्मासाव्विश्श्वधायाꣳ ॥ इन्द्रस्य

त्त्वाभागꣳसोमेनातनच्मिव्विष्ण्णोहव्व्यꣳरक्ष ॥ ४ ॥ [३-२]

अग्ग्नेव्व्रतपते । व्व्रतञ्चरिष्ष्यामितच्छकेयन्तन्मेराद्ध्यताम् ॥ इद

महमनृतात्त्सत्त्यमुपैमि ॥ ५ ॥ कस्त्त्वा ॥ युनक्क्तिसत्त्वायुनक्क्तिक

स्म्मैत्त्वायुनक्क्तितस्म्मैत्त्वायुनक्क्ति ॥ कर्म्मणेवाव्वेषायवाम् ॥ ६ ॥

प्प्रत्त्युष्ट्ठꣳरक्षः ॥ प्प्रत्त्युष्ट्ठꣳरक्षꣳप्प्रत्त्युष्ट्ठाऽअरातयोनिष्टप्त्तꣳरक्षो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निष्टप्ताऽअरातयः ॥ उर्वन्तरिक्षमन्वेमि ॥ ७ ॥ धूरसि ॥ धूर्व

सिधूर्वधूर्वन्तन्धूर्वतँय्योस्मान्धूर्वतितन्धूर्वयंव्वयन्धूर्वामः ॥

देवानामसिव्वह्नितमᳪंसस्निनतमम्पप्रितमञ्जुष्टतमन्देवहूतमम्

॥ ८ ॥ अन्हुतमसि । हविर्द्धानन्दृᳪंहस्वमाह्वार्म्मातेयज्ञपति

र्ह्वार्षीत् ॥ व्विष्णुस्त्वाक्रमतामुरुव्वातायापहतᳪंरक्षोयच्छन्ता

म्पञ्च ॥ ९ ॥ देवस्यत्त्वा । सवितुः प्रसवेश्विनोर्बाहुभ्या

म्पूष्णोहस्ताभ्याम् ॥ अग्नयेजुष्टङ्गृह्णाम्यग्नीषोमाभ्या

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ञ्जुष्टंङ्गृह्णामि ॥ १० ॥ भूतायंत्त्वा ॥ भूतायंत्त्वानारांतयेस्स्वर
भिविक्ख्येषन्दृ॑हंन्तान्दुर्य्याँ॑ पृथिव्यामुर्व्वन्तरिक्षमन्वेमि
पृथिव्यास्त्वानाभौसादयाम्म्यदित्याऽउपस्त्थेग्ग्नेहव्यꣳरक्ष
॥ ११ ॥ [७-३] पवित्त्रेस्त्थꣳ ॥ पवित्त्रेस्त्थोव्वैष्णव्यौ
सवितुर्व्वँ प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्मिम्म
भिः ॥ देवीरापोऽअग्ग्रेगुवोऽअग्ग्रेपुवोग्ग्रऽइममद्ययज्ञन्नं
यताग्ग्रेयज्ञपंतिꣳसुधातुंय्यज्ञपंतिन्देवयुवम् ॥ १२ ॥ युष्म्मा

८३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

 इन्द्रं÷ ॥ सुष्म्माऽइन्द्रोवृणीतवृत्रतूर्य्येसूयमिन्द्रंमवृणीद्ध्वं
॥ ३ ॥ वृत्रतूर्य्येप्प्रोक्षितास्त्थ ॥ अग्नयेत्त्वाजुष्टम्प्रोक्षाम्म्यग्नीषोमा
ब्भ्यान्त्वाजुष्टम्प्रोक्षामि ॥ दैव्यायकर्म्मणेशुन्धद्ध्वन्देवयज्ज्या
यैयद्वोशुद्धाःपराजग्घ्नुरिदंव्वस्तच्छुन्धामि ॥ १२ ॥ [२-४]
शर्म्मासि ॥ शर्म्मास्यवधूतꣳरक्षोवधूताऽअरातयोदित्त्यास्त्व
गसिप्प्रतित्त्वादितिर्व्वेत्तु ॥ अद्रिरसिव्वानस्प्पत्त्योग्रावासिपृथु ॥ ३ ॥
बुध्नःप्प्रतित्त्वादित्त्यास्त्वग्ग्वेत्तु ॥ १४ ॥ अग्नेस्तनूः ॥ अग्ने

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्तनूरसिव्वाच्योव्विसर्ज्जनन्देववीतयेत्त्वागृह्णामिबृहद्ग्रावासिव्वान
स्प्पत्त्यश्सऽइदन्देवेब्भ्योहुविश्शंमीष्ष्वसुशमिंशमीष्ष्व॥हविं
ष्कृदेहिहविंष्कृदेहिं ॥ १५ ॥ कुक्कुटोसि ॥ कुक्कुटोसिमधु
जिह्वऽइषमूर्ज्जमावदत्त्वयांव्वयसंङ्घातसंङ्घातञ्जेष्ष्मव्वर्षवृद्ध
मसिप्प्रतित्त्वाव्वर्षवृद्धंव्वेत्तुपरापूतहुरक्षःपरापूताऽअरातयोप
हतहुरक्षोव्वायुर्व्वोव्विविनक्तुदेवोवःसविताहिरण्ण्यपाणिःप्प्रति
गृब्भ्णात्त्वच्छिद्द्रेणपाणिना ॥ १६ ॥ [३-५] धृष्टिरसि ॥ ८५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संहि. धृष्टिरस्यपाग्नेऽअग्निमामादंञ्जहिनिष्क्रव्यादꣳसेधादेवयजं पू. अ.
॥४॥ वह ॥ ध्रुवमंसिपृथिवीन्दृꣳहब्रह्मवनित्वाक्षत्रवनिसजातव
न्युपदधामिभ्रातृव्यस्यवधायं ॥ १७ ॥ अग्नेब्रह्मं । गृभ्णी
ष्वधरुणंमस्यन्तरिक्षन्दृꣳहब्रह्मवनित्वाक्षत्रवनिसजातवन्यु
पदधामिभ्रातृव्यस्यवधायं ॥ धर्त्रमसिदिवन्दृꣳहब्रह्मवनि
त्वाक्षत्रवनिसजातवन्युपदधामिभ्रातृव्यस्यवधायं ॥ विश्वा ॥४॥
भ्यस्त्वाशाभ्यऽउपदधामिचितस्थोर्ध्वचितोभृगूणामङ्गिर ८६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सान्तपंसातप्प्यद्धम् ॥१८॥ [२-६] शर्म्मासि॥ शर्म्मास्यवंधूतꣳ
रक्षोवंधूताऽअरातयोदित्त्यास्त्वगासिप्प्रातित्त्वादितिर्व्वेत्तु ॥ धिष
णासिपर्व्वतीप्प्रतित्त्वादित्त्यास्त्वग्ग्वेत्तुदिवस्कम्भनीरासिधिष
णासिपार्व्वतेयीप्प्रातित्त्वापर्व्वतीर्व्वेत्तुधान्न्यमसि ॥ १९ ॥ धान्न्य
मसि । धिनुहिदेवान्प्राणायत्त्वोदानायत्त्वाव्व्यानायत्त्वा ॥
दीर्ग्घामनुप्प्रसितिमायुषेधान्देवोवः सविताहिरण्ण्यपाणिः
प्प्रातिगृब्भ्णात्त्वच्छिद्द्रेणपाणिनाचक्षुषेत्त्वामहीनाम्पयोसि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संहि॰ ॥२०॥[२-७] दे॒वस्य॑त्त्वा ॥ सवि॒तुः प्प्र॑स॒वे॒ऽश्विनो॑र्ब्बा॒हुब्भ्या॑ पू॰ अ॰
॥५॥ म्पू॒ष्णोह॑स्ता॑ब्भ्याम् ॥ संव्व॑पामि॒सम॑ाप॒ऽओष॑धीभि॒ᳬसमोष॑
धयो॒रसे॑न ॥ सᳬरे॒वती॒र्ज्जग॑तीभिᳬपृच्च्यन्ता॒ᳬसम्म॒धु॑मती॒र्म्म॑
धु॑मतीभिᳬपृच्च्यन्ताम् ॥ २१ ॥ जन॑यत्त्यै॑त्त्वा॒ ॥ जन॑यत्त्यै
त्त्वा॒सᳬयौ॑मी॒दम॒ग्ग्नेरि॒दम॒ग्ग्नीषोम॑यो॒रि॒षेत्त्वा॑घ॒र्म्मो॑सि॒वि॒श्वा
यु॑रु॒रुप्प्र॑थाऽउ॒रुप्प्र॑थस्वो॒रुते॑य॒ज्ञप॑तिᳬप्प्रथता॒म॒ग्ग्निष्ट्टे॒त्त्व॒च॒म्मा ॥५॥ ८८
हि॑ᳬसीद्दे॒वस्त्वा॑सवि॒ता श्श्र॑पयतु॒व्वर्षि॑ष्ट्ठे॒धि॒नाके॑ ॥२२॥ माभे॑ः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

माभेम्मासंव्विंक्क्थाऽअतमेरुर्व्यज्ञोतमेरुर्व्यजंमानस्यप्प्रजाभू
यात्त्रितायंत्त्वाद्द्वितायंत्त्वैकुतायंत्त्वा ॥२३॥[३-८]देवस्यंत्त्वा।
सवितुःप्प्रंसवेऽश्श्विनोर्ब्बाहुभ्यांम्पूष्णोहस्ताभ्याम् ॥ आददेऽद्ध
रकृतंन्देवेभ्यऽइन्द्रंस्यबाहुरंसिदक्षिणःसहस्रंभृष्टिःशततेजा
व्वायुरंसितिग्ग्मतेजाद्द्विषतोव्वधः ॥२४॥ पृथिविदेवयजनि॥ पृ
थिविदेवयजन्न्योषंध्यास्तेमूलम्माहिंꣳसिषंव्व्रजङ्गच्छगोष्ठानंव्व
षंतुतेद्यौर्ब्बंधानदेवसवितःपरमस्यांम्पृथिव्याꣳशतेनपाशैर्य्यो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्म्मान्द्वेष्टियञ्चवयन्द्विष्म्मस्तमतोमामौक्॥२५॥ अपाररुम्॥
अपाररुम्पृथिव्यैदेवयजनाद्वध्यासंव्व्रजङ्गच्छगोष्ठानंव्वर्षतुतेद्यौ
र्बधानदेवसवितःपरमस्याम्पृथिव्याꣳशतेनपाशैर्य्योस्म्मान्द्वे
ष्टियञ्चवयन्द्विष्म्मस्तमतोमामौक्॥ अररोदिवम्मापप्तोद्र
प्सस्तेद्याम्मास्कन्व्व्रजङ्गच्छगोष्ठानंव्वर्षतुतेद्यौर्बधानदेवसवि
तःपरमस्याम्पृथिव्याꣳशतेनपाशैर्य्योस्म्मान्द्वेष्टियञ्चवयन्द्वि
ष्म्मस्तमतोमामौक्॥२६॥ गायत्रेणत्वा॥ गायत्रेणत्वाच्छ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्दंसापरिंगृह्णामित्रैष्टुंभेनत्त्वाच्छन्दंसापरिंगृह्णामिजागतेन
त्त्वाच्छन्दंसापरिंगृह्णामि ॥ सुक्ष्माचासिंशिवाचासिस्योनाचा
सिसुषदांचास्युर्ज्जंस्वतीचासिपयंस्वतीच ॥ २७ ॥ पुराक्रूरस्यं।
विसृपोंविरप्शिन्नुदादायंपृथिवींजीवदांनुम्॥ यामैरंयँश्चन्द्रमं
सिस्वधाभिस्तामुधीरांसोऽअनुदिश्श्यंयजन्ते॥ प्रोक्षंणीरासांद
यद्विषतोवधोसि ॥२८॥ [५-९] प्रत्त्युंष्टुरक्षः ॥ प्रत्त्युंष्टुरक्षः
प्प्रत्त्युंष्टाऽअरातयोनिष्टंप्तुरक्षोनिष्टंप्ताऽअरातयः॥ अनिशि

सं. २ ११

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तोसिसपत्नक्षिद्द्वाजिनंन्त्वाव्वाजेद्ध्यायैसम्मार्ज्मि॥प्रत्त्युंष्टुहर
॥ ७ ॥ क्षꣳप्रत्त्युंष्टाऽअरांतयोनिष्टंप्तुहरक्षोनिष्टंप्ताऽअरांतयꣳ॥अनि
शितासिसपत्नक्षिद्द्वाजिनींन्त्वाव्वाजेद्ध्यायैसम्मार्ज्मि॥२९॥
अदिंत्त्यैरास्नांसिव्विष्णोंर्व्वेष्प्योस्यूर्ज्जेत्त्वादंब्धेनत्त्वाचक्षुषावंप[1]
श्श्यामि॥अग्नेर्ज्जिह्वासिंसुहूर्द्देवेब्भ्योधाम्म्नेधाम्म्नेमेभवयजुंषे
यजुषे॥३०॥सवितुस्त्वां।प्प्रसवऽउत्त्पुंनाम्म्यच्छिद्द्रेणपवित्त्रे ॥ ७ ॥

१२

१ वेष्पोसि इति काण्वानां पाठः। तत्संहिताभाष्ये छांदसः पकारादेश इति सायणाचार्योक्तिः। माध्यंदिनीयानां तु वेष्योसि इति पाठः। अत्र उवटमहीधरादिभाष्यकारैः पकारादेशस्यानुक्तेः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

णसूर्य्यस्यरश्मिभिः ॥ सवितुर्व्वः प्रसवऽउत्पुनाम्म्यच्छिद्रे
णपवित्रेणसूर्य्यस्यरश्मिभिः ॥ तेजोसिशुक्रमस्यमृतमसि
धामनामासिप्प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥ ३१ ॥
[३-१०] इतिश्रीवाजसनेयसंहितायां प्रथमोध्यायः ॥ १ ॥
श्रीवेदपुरुषाय नमः । अनुवाकसूत्रम् ॥ कृष्णोसिषड, ग्नेवाज
जित्तिस्रो, मयीद, मग्नीषोमयोः पंचका, वग्नेदब्धायोचतस्रः, १३
संवर्चसापंचा, ग्नयेकव्यवाहनायषट् सप्तचतुस्त्रिंशत् ॥ हरिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ ८ ॥

ॐ ॥ कृष्णोऽसि ॥ कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टम्प्रोक्षामि वे
दिरसि बर्हिषे त्वा जुष्टाम्प्रोक्षामि बर्हिरसि स्रुग्भ्यस्त्वा जुष्टम्प्रो
क्षामि ॥ अदित्यै व्युन्दनम् ॥ १ ॥ अदित्यै व्युनन्दनमसि विष्णो
स्तुपोऽस्यूर्णम्म्रदसन्त्वास्तृणामि स्वासस्थान्देवेभ्यो भुवपतये
स्वाहा भुवनपतये स्वाहा भूतानाम्पतये स्वाहा ॥ २ ॥ गन्धर्वस्त्वा
विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्नि ॥ ८ ॥
रिडऽईडितः ॥ इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमान १४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्यपरिधिरस्यग्निरिडऽईडितः ॥ मित्रावरुणौत्त्वोत्तरतः परिध

त्तान्ध्रुवेणधर्म्मणाविश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरि

डऽईडितः ॥ ३ ॥ वीतिहोत्रन्त्वा । कवेद्युमन्तꣳसमिधीमहि ॥

अग्नेबृहन्तमध्वरे ॥ ४ ॥ समिदसि ॥ समिदसिसूर्य्यस्त्वापुर

स्तात्पातुकस्याश्चिदभिशस्त्यै ॥ सवितुर्बाहूस्थऽऊर्णम्म्रद

सन्त्वास्तृणामिस्वासस्थन्देवेभ्यऽआत्त्वावसवोरुद्राऽआदि १९

त्याःसदन्तु ॥५॥ घृताच्यसि । जुहूर्नाम्नासेदम्प्रियेणधाम्ना

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्प्रियꣳसदऽआसीदघृताच्यंस्युपभृन्नाम्नासेदम्प्रियेणधाम्ना
प्प्रियꣳसदऽआसीदघृताच्यंसिद्ध्रुवानाम्नासेदम्प्रियेणधाम्ना
प्प्रियꣳसदऽआसीदप्प्रियेणधाम्नांप्प्रियꣳसदऽआसीद ॥ ध्रुवा
ऽअंसदन्नृतस्ययोनौताव्विष्णणोपाहिपाहियज्ञम्पाहियज्ञपंतिंपा
हिमाँय्यंज्ञन्न्यम् ॥ ६ ॥ [६-१] अग्ग्नेंव्वाजजित् ॥ अग्ग्नेंव्वाज
जिह्वाजंन्त्वासरिष्ष्यन्तंव्वाजजितꣳसम्मांर्ज्जिम ॥ नमोदेवे ॥ १ ॥
भ्भ्यं÷स्वधापितृभ्भ्यं÷सुयमेंमेभूयास्तमस्कन्नमद्य ॥ ७ ॥ अस्कं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्नमुद्य। देवेभ्य्यऽआज्ज्युर्ठ॰ सम्भ्रियासमङ्गिणा। व्विष्णणोमात्त्वावं
क्क्रमिषंव्वसुमतीमग्नेतेच्छायामुपंस्त्थेषंव्विष्णणोस्त्थानंमसीतऽ
इन्द्रोव्वीर्य्यमकृणोदूर्द्ध्वोंद्ध्वरऽआस्त्थांत् ॥८॥ अग्नेव्वे॰ ॥ अग्ने
व्वेहोंत्रंव्वेर्द्दूत्त्युमवंतान्त्वान्द्यावांपृथिवीऽअवुत्त्वन्द्यावांपृथिवी
स्विष्टकृद्देवेभ्य्युऽइन्द्रऽआज्ज्येनहविषांभूत्स्वाहासञ्ज्योतिषा
ज्ज्योतिंः ॥९॥ [३-२] मयीदम् ॥ मयीदामिन्द्रंऽइन्द्रियन्दंधा १७
त्त्वस्म्मान्न्रायोंमघवांनःसचन्ताम् ॥ अस्म्माकंःसन्त्वाशिषंः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सत्त्यानं॑ सन्त्वाशिषऽउप॑हूताप्पृथिवीमातोप॑माम्पृ॑थिवी मा
ताह्वयतामग्निराग्नीध्ध्रात्त्स्वाहा॑॥१०॥उप॑हूतोद्यौः॥ उप॑हूतो
द्यौष्प्पितोप॑मान्द्यौष्प्पिताह्वयतामग्निराग्नीध्ध्रात्त्स्वाहा॑ ॥ देव
स्यत्त्वासवितुःप्प्र॑सवेऽश्श्विनोर्ब्बाहुब्भ्यांम्पूष्णोहस्ताब्भ्याम् ॥
प्रतिगृह्णाम्म्यग्नेष्ट्वास्येनप्प्राश्श्नामि ॥११॥ एतन्ते । देवसवित
र्य्यज्ञम्प्राहुर्ब्बृहस्प्पत॑येब्रह्मणे ॥ तेन॑यज्ञम॑वतेन॑यज्ञप॑तिन्तेन ॥१०॥
मामव ॥१२॥ मनोजुतिः॥ मनोजुतिर्ज्जुषतामाज्ज्य॑स्यबृहस्प्प

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तिर्य्यृङ्ग्ग्रामिमन्तंनोत्त्वरीँष्ट्टँरय्य्यृङ्ग्ग्रं᳖सभिमन्दंधातु ॥ व्विश्श्वेदेवास
ऽइहमादयन्तामो ॥ ३ँम्प्रतिष्ठ ॥१३॥ एषाते ॥ एषातेऽअग्ग्नेस
मित्तयाव्वर्द्धस्वचाचंप्प्यायस्व ॥ व्वर्द्धिषीमहिचव्वयमाचंप्प्यासि
षीमहि ॥ अग्ग्नेव्वाजजिद्वाजंन्त्वाससृवाᳫंसंव्वाजजितᳫंसम्मा
र्ज्जिम ॥१४॥[५-३] अग्ग्नीषोमंयोरुज्जितिम् ॥ अग्ग्नीषोमंयोरु
ज्जितिमनूज्जेषंव्वाजंस्यमाप्प्रसवेनप्प्रोहामि॥अग्ग्नीषोमौतमपनु
दतांय्योस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मोव्वाजंस्यैनम्प्रसवेनापोहा ११

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मि ॥ इन्द्राग्ग्न्योरुज्जितिमनूज्जेषंव्वाजंस्यमाप्प्रसवेनप्प्रोहांमि ॥
इन्द्राग्ग्नीतमपंनुदताँ ह्योस्म्मान्द्वेष्ट्टियञ्चंव्वयन्द्विष्म्मोव्वाजंस्यै
नम्प्रसवेनापोंहामि ॥ १५ ॥ व्वसुंब्भ्यस्त्वा । रुद्द्रेब्भ्यंस्त्वादि
त्त्येब्भ्यंस्त्वासञ्ज्ञाँनाथान्द्यावापृथिवीमित्त्रावरुंणौत्त्वावृष्ट्ट्यां
वताम् ॥ व्यन्तुव्वयोक्क्तꣳरिहांणामुरुताम्पृषंतीर्ग्गच्छव्वशापृश्श्निं
र्ब्भूत्त्वादिवंङ्गच्छततोंनोव्वृष्टिमावंह ॥ चक्षुष्प्पाऽअंग्ग्नेसिचक्षुं
र्म्मेपाहि ॥ १६ ॥ सम्परिधिम् ॥ सम्परिधिम्पुरुर्यंधत्थाऽअग्ग्नेदेव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुणिभिर्ग्गुह्यमानः॥ तन्त्वऽएतमनुजोषम्भराम्म्येषनेत्त्वदम्पचे
तयाताऽअग्नेश्प्प्रियम्पाथोपीतम् ॥ १७॥ सॐस्रवभागास्त्थे
षाबृहन्तः प्प्रस्तरेष्ठाःपरिधेयाश्च्चदेवाः ॥ इमांव्वाचमभिविश्श्वे
गृणन्तऽआसद्यास्मिन्बर्हिषिमादयद्ध्वॐस्वाहाव्वाट् ॥ १८ ॥
घृताचीस्त्थः॥ घृताचीस्त्थोधुर्य्यौपातꣳसुम्नेस्त्थः सुम्नेमा
धत्तम् ॥ यज्ञनमश्च्चतऽउपचयज्ञस्यशिवेसन्तिष्ठस्वस्विष्टेमेस १०१
न्तिष्ठस्व ॥१९॥[५-४]अग्नेदब्धायो ॥ शीतमपाहिमादिद्योः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ १२ ॥ पाहिप्प्रसित्त्यैपाहिदुरिंष्ट्यैपाहिदुरद्ममन्न्याऽअंविषन्नःपितुङ्कृ
णुसुषदायोनौस्वाहाव्वाडग्नयेसंव्वेशपंतयेस्वाहासरंस्वत्त्यैयशो
भगिन्न्यैस्वाहा ॥ २० ॥ व्वेदोसि ॥ व्वेदोसियेनत्त्वन्देवव्वेददेवे
ब्भ्योव्वेदोभवस्तेनमह्यंव्वेदोभूयाः ॥ देवागातुविदोगातुंव्वित्त्वा
गातुमित ॥ मनसस्पतऽइमन्देवयज्ञꣳस्वाहाव्वातेधाः ॥ २१ ॥
सम्बर्हिः ॥ सम्बर्हिरङ्क्ताꣳहविषाघृतेनसमादित्त्यैर्व्वसुभिःसम्म ॥ १२ ॥
रुद्भिः ॥ समिन्द्रोव्विश्वदेवेभिरङ्क्तान्दिव्यन्नभोगच्छतुयत्स्वाहा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ २२ ॥ कस्त्वा ॥ कस्त्वाव्विमुंञ्चतिसत्त्वाव्विमुंञ्चतिकस्म्मै
त्वाव्विमुंञ्चतितस्म्मैत्वाव्विमुंञ्चति ॥ पोषायरक्षसाम्भागोसि
॥ २३ ॥ [४] संव्वर्च्चसा ॥ संव्वर्च्चसा[1]पयंसासन्तनूभिरगंन्म
हिमनसासᳪशिवेन ॥ त्वष्टा[2]सुदत्रोव्विदंधातुरायोनुमार्ष्टुतन्वो
यद्विलिष्टम् ॥२४॥ दिविव्विष्णुं ॥ दिविव्विष्णुर्व्यक्रᳪस्तजा
गतेनच्छन्दसाततोनिर्भक्तोयोस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मो

१ संव्वर्च्चसा। अत्र "परं तु रेफहकाराभ्याम्" (शु. य. प्रा. ४ अ. १७१ सू.) इत्यनेन रकारात्परस्य चकारस्य द्वित्वम्। २ त्वष्टा। अत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२-सू.) इत्यनेन टकारस्य द्वित्वम्। एवं दिवि विष्णुः। द्विष्मः। योस्मान्। इत्येतादृशेषु बोध्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्तरिक्षेव्विष्णुर्व्यक्रꣳस्तत्त्रैष्टुभेनच्छन्दसाततोनिर्भक्तोयो
स्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मः पृथिव्यांव्विष्णुर्व्यक्रꣳस्तगाय
त्त्रेणच्छन्दसाततोनिर्भक्तोयोस्म्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मो
स्म्मादन्नादस्यैप्प्रतिष्ठाया ऽअगन्म्मस्वः सञ्ज्योतिषाभूम ॥२५॥
स्वयम्भूरसि ॥ स्वयम्भूरसिश्श्रेष्ठोरश्मिर्म्मवर्च्चोदा ऽअसिवर्च्चोमे
देहि ॥ सूर्य्यस्यावृतमन्वावर्त्ते ॥ २६ ॥ अग्ग्नेगृहपते । सुगृ
हपतिस्त्त्वयाग्ग्नेहङ्गृहपतिनाभूयासꣳ सुगृहपतिस्त्वम्मयाग्ग्ने

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गृहपतिनाभूयाꣳ॥ अस्त्थूरिणौगार्हंपत्त्यानिसन्तुशतꣳहिमाꣳ
सूर्य्यंस्स्यावृतमन्न्वावंर्त्ते॥ २७ ॥ अग्ग्नेव्व्रतपते। व्व्रतमंचारिष
न्तदंशकुन्तन्मेंराधीदमहँय्यऽएवास्म्मिसोस्म्मि ॥ २८ ॥
[५] अग्ग्नयेंकव्यवाहंनाय। स्वाहासोमायपितृमतेस्वाहा ॥
अपहताऽअसुंरारक्षाꣳसिव्वेदिषदं÷ ॥ २९ ॥ येरूपाणिं।
प्रतिमुञ्चमानाऽअसुंराꣳसन्तं÷स्वधयाचरंन्ति ॥ परापुरोनि
पुरोयेभरंन्त्यग्ग्निष्टाँल्लोकात्प्रणुंदात्त्यस्म्मात् ॥ ३० ॥ अत्रं १०५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पितरः ॥ अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् ॥ पू. अ.
अमीमदन्त पितरो यथाभागमावृषायिषत ॥ ३१ ॥ नमो वः ॥ २ ॥
पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो
वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे न
मो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो दे
ष्मैतद्वः पितरो वास आधत्त ॥ ३२ ॥ आधत्त । पितरो ॥१४॥
गर्भं कुमारं पुष्करस्रजम् ॥ यथेह पुरुषोऽसत् ॥ ३३ ॥ ऊर्जं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्वहन्तीः ॥ ऊर्ज्जंव्वहन्तीरमृतंङ्घृतम्पयः कीलालम्परिस्रुतम् ॥
स्वधास्त्थतर्प्पयतमेपितॄन् ॥ ३४ ॥ [६] इतिश्रीवाजसनेय
संहितायांद्वितीयोऽध्यायः ॥ २ ॥ श्रीवेदपुरुषायनमः ॥ अनुवा
कसूत्रम् । समिधाग्निं, भूर्भुवःस्वश्चतुष्का, वग्निर्ज्योतिर्द्वे, उपप्र
यन्तोऽअध्वरङ्गषड्विंशतिः, भूर्भुवःस्वश्चतस्रो, गृहामातिस्रः,
मघासिनोहवामहे पञ्च, पूर्णादर्विद्वे,ऽअक्षन्नमीमदन्तषडे, षते १०७

१ ऊर्जम् । अत्र "परं तु रेफहकाराभ्याम्" (शु. य. प्रा. ४ अ. १०१ सू.) रेफहकाराभ्यां परं व्यञ्जनं द्विरुच्यते । तेन रकारात्परस्य जकारस्य द्विर्भावः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संहि. सप्त, दश ॥ १० ॥ त्रिषष्टिः ॥ ६३ ॥ हरिः ॐ ॥ सुमिधा पू. अ.
॥१५॥ ग्ग्निम् ॥ सुमिधाग्ग्निन्दुंवस्यतघृतै[1]र्ब्बोधयतातिथिम् ॥ आस्म्मि ॥ ३ ॥
न्हुव्याजुंहोतन ॥ १ ॥ [2]सुंसमिद्धायशोचिषे । घृतन्तीव्रञ्जुंहोतन ॥
अग्ग्नयेजातवेदसे ॥ २ ॥ तन्त्वा । सुमिद्धिरङ्गिरोघृतेनंवर्द्ध
यामसि ॥ बृहच्छोचायविष्ठ्य ॥ ३ ॥ उपत्त्वा । ग्नेहुविष्म्मंतीर्घृ
ताचीर्य्यन्तुहर्य्यत ॥ जुषस्वंसुमिधोममं ॥ ४ ॥ [४-१] भूर्भुवंः ॥ ॥ १५ ॥

१ घृतैर्ब्बोधयता । अत्र परं तु रेफहकाराभ्याम् (शु. य. प्रा. ४ अ. १०१ सू.) इत्यनेन रकारात्परस्य बकारव्यञ्जनस्य द्वित्वम् । २ सुसमिद्धाय । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन सुकारात्परस्य सकारस्य षकारे प्राप्ते अनुसन्तनोतु बृहस्पतिसुतस्यसुसमिद्धाय० (शु. य. प्रा. ३ अ. ८२ क.) इत्यनेन सकारस्य प्रकृतिभावः न षत्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूर्ब्भुवह्स्वुर्द्यौरिव भूम्न्ना पृथिवीवव्वरिम्म्णा ॥ तस्यास्त्ते पृथिवि दे
वयजनि पृष्ठेग्निमन्नादमन्नाद्यायादधे ॥५॥ आयम् ॥ आयङ्गौः
पृश्निरक्क्रमीदसदन्मातरम्पुरः ॥ पितरञ्च प्प्रयन्त्स्वः ॥ ६ ॥
अन्तश्चरति । रोचनास्य प्प्राणादपानती ॥ व्यक्ख्यन्महिषो दि
वम् ॥ ७ ॥ त्रिꣳशद्धाम ॥ त्रिꣳशद्धामविराजति वाक्क्पतङ्गाय धी
यते ॥ प्रति वस्त्तोरहद्द्युभिः ॥८॥ [४-२] अग्निर्ज्ज्योतिः ॥ अ

१ वाक्पतिः । अत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन ककारस्य द्वित्वम्, तत्र पूर्वः ककारो द्विरुक्तिजः, पकारः संयोगः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्निर्ज्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्य्यो ज्योतिर्ज्योतिः सूर्य्यः
स्वाहा ॥ अग्निर्व्वर्च्चो ज्योतिर्व्वर्च्चः स्वाहा सूर्य्यो व्वर्च्चो ज्योतिर्व्वर्च्चः
स्वाहा ॥ ज्योतिः सूर्य्यः सूर्य्यो ज्योतिः स्वाहा ॥ ९ ॥ सजूर्द्देवेन
सवित्रा सजूराच्येन्द्रवत्या ॥ जुषाणो ऽअग्निर्व्वेतु स्वाहा ॥
सजूर्द्देवेन सवित्रा सजूरुषसेन्द्रवत्या ॥ जुषाणः सूर्य्यो व्वेतु स्वाहा
॥ १० ॥ [२-३] उपप्प्रयन्तो ऽअद्ध्वरम् ॥ उपप्प्रयन्तो ऽअद्ध्वर ॥१६॥

१ उपप्प्रयन्तोऽअद्ध्वरम् अत्र एदोद्भ्यां पूर्वमकारः (शु. य. प्रा. ४ अ. ६१ सू.) इत्यनेन सर्वत्र पूर्वरूपे प्राप्ते प्रकृतिभाव ऋक्षु (शु. य. प्रा. ४ अ. ८१ सू.) इत्यनेन गाहमानादिभिः सूत्रैरभिनिहितेभ्योऽन्यत्र ऋक्षु प्रकृतिभावविधानसामर्थ्यान्न पूर्वरूपम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म्मन्त्रंव्वोचेमाग्ग्नयें ॥ आरेऽअस्म्मेचंशृण्ण्वते ॥ ११ ॥ अग्ग्नि
र्म्मूर्द्धा । दिवं[1]श्ककुत्त्पतिःपृथिव्याऽअयम् ॥ अपाꣳरेताꣳसि
जिन्न्वति ॥ १२ ॥ उभावाम् ॥ उभावामिन्द्राग्ग्नीऽआहुवद्ध्यै
ऽउभाराधसꣳसहमादयद्ध्यै ॥ उभादातारांविषाꣳरयीणामुभा
व्वाजस्यसातयेहुवेवाम् ॥ १३ ॥ अयन्ते ॥ अयन्तेयोनिर्ऋत्त्वि
योयतोजातोऽअरोचथाः ॥ तञ्जानन्नग्ग्नऽआरोहाथानोव्वर्द्धया

१ दिवःककुत्पतिः । अत्र दिवोऽककुत्पृथिव्योः (शु. य. प्रा. ३ अ. २४ सू.) इत्यनेन अककुत्पृथिव्योर्विसर्जनीयस्य सकारविधानान्नात्र सकारः ककुत्परत्वात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संहि. रयिम् ॥ १४ ॥ अयमिह । प्रथमोधायिधातृभिर्होतायजिष्ठो पू. अ.
॥२७॥ ऽअध्वरेष्वीड्यः ॥ यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंवि ॥ ३ ॥
भ्वंविशेविशे ॥ १५ ॥ अस्यप्रत्नाम् ॥ अस्यप्रत्नामनुद्युतंᳩ
शुक्रन्दुदुह्रेऽअह्रयः ॥ पयःसहस्रसामृषिम् ॥ १६ ॥ तनूपाऽ
अग्नेऽसितन्वम्मेपाह्यायुर्दाऽअग्नेस्यायुर्म्मेदेहिवर्च्चोदाऽअग्ने
सिवर्च्चोमेदेहि ॥ अग्नेयन्मेतन्वाऽऊनन्तन्मऽआपृण ॥ १७ ॥ ॥१७॥

इन्धानास्त्वा । शतᳩहिमाद्युमन्तᳩसमिधीमहि ॥ वयस्वन्तो
CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्वयस्कृतꣳसहस्वन्तꣳसहस्कृतम् ॥ अग्ग्नेसपत्नदम्भन्नमदब्धा
सोऽअदाब्भ्यम् ॥ चित्रावसोस्वस्तितेपारमशीय ॥ १८ ॥
सन्त्वम् ॥ सन्त्वमग्ग्नेसूर्य्यस्यवर्च्चसागथाꣳसमृषीणाꣳस्तुते
न ॥ सम्प्प्रियेणधाम्म्नासमहमायुषासंव्वर्च्चसासम्प्रजयासꣳराय
स्प्पोषेणग्ग्मिषीय ॥ १९ ॥ अन्धस्त्थ ॥ अन्धस्त्थान्धोवो
भक्षीयमहस्त्थमहोवोभक्षीयोर्ज्जस्त्थोर्ज्जंवोभक्षीयरायस्प्पोष

१ अन्धसःस्थ इतिपदे प्रत्ययसवर्णम्मुदि शाकटायनः (३ अ. ९ क.) इत्यनेन शषसेषु मुत्संज्ञकेषु परेषु विसर्गस्य परसवर्णं भवति तेन सकारे मुदि परसवर्णं प्राप्तं परन्तु जित्परे मुदि तु लुक्मुदि जित्परे (३ अ. १३ क.) इत्यनेन स्थे जित्परे मुदि सति विसर्गस्य लोपः। तत ऊष्मान्तस्थाभ्यश्च स्पर्शः (४ अ. १०२ क.) इत्यनेन द्वित्वे परस्य चर्त्वे [illegible] इति ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्थरायस्पोषँवोभक्षीय ॥ २० ॥ रेवतीरमद्ध्वम् ॥ रेवतीरम
द्ध्वमुस्म्मिन्न्योनांवुस्म्मिन्न्गोष्ठेस्म्मिँल्लोकेस्म्मिन्न्क्षये ॥ इहैव
स्त्तमापंगात ॥ २१ ॥ सुछहितासि । विश्श्वरूप्प्यूर्ज्जामाविंश
गौपत्त्येनं ॥ उपंत्त्वाग्ग्नेदिवेदिवेदोषांवस्त्तार्द्धियाव्वयम् ॥ नमोभ
रन्तुऽएमंसि ॥ २२ ॥ राजंन्तमद्ध्वराणाम् ॥ राजन्तमद्ध्वराणाङ्गो
पामृतस्युदीदिंविम् ॥ व्वर्द्धमानꣳस्वेदमें ॥ २३ ॥ सनं÷ ॥ सनं÷ ॥१८॥
पितेवंसूनवेग्ग्नेंसूपायुनोभंव ॥ सचंस्वानꣳस्वुस्त्तयें ॥ २४ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अग्नेत्त्वम् ॥ अग्नेत्त्वन्नोऽअन्तमऽउतत्त्राताशिवोभवावरू

त्थ्यः ॥ वसुरग्निर्वसुश्श्रवाऽअच्छानक्षिद्युमत्तमꣳरयिन्दाः

॥ २५ ॥ तन्त्वा ॥ तन्त्वाशोचिष्ठदीदिवꣳसुम्नायनूनमीमहे

सखिब्भ्यः ॥ स[1]नोबोधिश्श्रुधीहवमुरु[2]ष्ष्याणोऽअघायतस्सम

स्मात् ॥ २६ ॥ इडऽएहि ॥ इडे[3]ऽएह्यदितऽएहिकाम्म्याऽएत ॥

---

१ सः नो बोधिः । अत्र व्यञ्जने च (शु. य. प्रा. २ अ. १६ सू.) इत्यनेन सः इति पदस्य विसर्जनीयस्य लोपे सनोबोधिः इति सिध्यति ।
२ उरुष्याणः । अत्र उरुष्यानः इति पदम् । अत्र निषण्णायरथवाहणमिन्द्र० (शु. य. प्रा. ३ अ. ८७ सू.) इत्यनेन नकारस्य णकारे, स्वरात्संयोगादि-र्द्विरुच्यते सर्वत्र (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन षस्य द्वित्वम् । ३ इडेएहि इतिपदम् । अत्र सन्ध्यक्षरमयवायावम् (शु. य. प्रा. ४-अ-४७ सू.) इत्यनेन इडे इति एकारस्य अयादेशे यवयोः पदान्तयोः स्वरमध्ये लोपः (४ अ. १२५ सू.) इत्यनेन यकारस्य लोपे पुनः स्वरसन्धिप्राप्तौ "न परकालः" (शु. य. प्रा. ३ अ. ४ सू.) इति निषेधः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥१९॥ ॥ ३ ॥

मयिंवर्ठ्ठकामुधरंणम्भूयात् ॥ २७ ॥ सोमानु(ँ)स्वरंणं । कृणु

हिब्रंह्मणस्पते॥ कुक्षीवंन्तँय्यऽऔशिजः ॥ २८ ॥ योरेवान् ॥

योरेवान्योऽअंमीवुहाव्वसुवित्पुंष्टिवर्द्धंनः ॥ सनंःसिषक्तुय

स्तुरः ॥ २९ ॥ मानंः ॥ मानुर्ठ्ठशठ्ठसोऽअरंरुषोधूर्त्तिः पृ्रण

ङ्मर्त्त्यंस्य ॥ ²रंक्षाणोब्रह्मणस्पते ॥ ३० ॥ महिंत्त्रीणाम् ॥

---

१ "पुष्टिवर्द्धनः" अत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. अ. सू. १०२) इति सूत्रेण पुष्टिपदे शषसहानां चतुर्णां वर्णानाम् ऊष्मसंज्ञात्वात् षकारोष्मणः परस्य स्पर्शसंज्ञकस्य टकारस्य द्वित्वं जातम् । तेनैकषकारो द्वौ टकारौ च संयोगः । तत्र प्रथमष्टकारः क्रमजो ज्ञेयः । अन्येष्वप्येतादृशेषु स्थलेषु द्वित्वं बोध्यम् । तथैव पुष्टिवर्द्धनः इत्यत्र वर्द्धनः इति पदे परं तु रेफहकाराभ्याम् (४-१०१) इत्यनेन रकारोत्तरवर्तिनः धव्यञ्जनस्य द्वित्वे जश्त्वे धकारस्य दकारः । २ रक्षाणः । रक्षा नः इतिपदम् । अत्र निषण्णाय रथवाहणम् (शु. य. प्रा. ३ अ. ८७ सू.) इत्यनेन नकारस्य णकारो निपात्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महिंत्त्रीणामवौस्तुद्युक्षम्मित्त्रस्यार्र्य्यम्म्णः ॥ दुराधर्षंव्वरुणस्य
॥ ३१ ॥ नहितेषाम् ॥ नहितेषाममाचननाद्ध्वसुव्वारणेषु ॥ ईशे
रिपुरघशंꣳसः ॥ ३२ ॥ तेहि । पुत्त्रासोऽअदितेःप्प्रजीवसेम
र्त्यांय ॥ ज्योतिर्य्यच्छन्त्यजंस्रम् ॥३३॥ कदाचन । स्स्तरीरं
सिनेन्द्रंसश्श्चसिदाशुषे ॥ उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्य
पृच्यते ॥ ३४ ॥ तत्सवितुः ॥ तत्सवितुर्व्वरेण्ण्यम्भर्ग्गोदेवस्य
धीमहि ॥ धियोयोनंःप्प्रचोदयात् ॥ ३५ ॥ शतम् ॥ १०० ॥ ११७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिंते । दूँडभोरथोस्म्माँ२ ॥ ऽअंश्नोतुव्विश्श्वतं÷ ॥ येनरक्ष
सिदाशुषं÷ ॥ ३६ ॥ [२६-४] भूर्भुवं÷ ॥ भूर्भुवꣳस्व÷
२सुप्प्रजाः प्प्रजाभिं÷स्याꣳसुवीरोव्वीरैः सुपोषꣳपोषैꣳ ॥ नर्य्य
प्प्रजाम्मेपाहिशꣳस्यंपशून्मेपाहिअथर्य्यंपितुम्मेपाहि ॥ ३७ ॥
आगंन्म । व्विश्श्ववेंदसमस्म्मब्भ्यंव्वसुवित्तमम् ॥ अग्नेसम्म्राड
भिद्युम्म्नमभिसहऽआयंच्छस्व ॥ ३८ ॥ अयमग्निः ॥ अय

---

१ दूडभो रथः । दुःदभः इतिपदम् अत्र "उकारं दुर्दे (शु. य. प्रा. ३ अ. ४२ सू.)" इत्यनेन दुरित्यस्य विसर्गस्य उकारो दकारे परे दन्त्यश्च मूर्धन्यत्वमापद्यते । तेन दकारस्य उकारे दस्य मूर्धन्ये दुउडभः । सवर्णयोरुकारयोः सवर्णदीर्घः । २ सुप्प्रजाः अत्र "स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (४ अ. १०० सू.)" इत्यने प्रजाशब्दघटितप्रकारे परे पकारस्य द्वित्वम् । एवं वरेण्ण्यम् । पुत्त्रासः । द्युम्म्नम् एतादृशेषु स्थलेपु ज्ञेयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मग्निर्गृहपतिर्गार्हपत्त्यः प्प्रजायाव्वसुवित्तमः ॥ अग्ग्ने गृहपते

भि द्युम्न्नमभि सहऽआयच्छस्व ॥ ३९ ॥ अयमग्निः ॥ अय

मग्निः पुरीष्ष्यो रयिमान्पुष्टिवर्द्धनः ॥ अग्ग्ने पुरीष्ष्याभि द्युम्न्न

मभि सहऽआयच्छस्व ॥ ४० ॥ [४-५] गृहामा । बिभीतमा

वेपद्ध्वमूर्ज्जम्बिब्भ्रतऽएमसि ॥ ऊर्ज्जम्बिब्भ्रद्द्वः सुमनाः सुमेधा

गृहानैमि मनसा मोदमानः ॥ ४१ ॥ येषामद्ध्येति । प्प्रवसन्न्येषु[1] ११९

---

१ "प्रवसन्न्येषु" इत्यत्र "स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (१०० शु. य. प्रा. ४ अ. सू.)" इत्यनेन नकारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सौमनसोबहुः ॥ गृहानुपंह्वयामहेतेनोंजानन्तुजानतः ॥४२॥
उपंहूताऽइह । गावऽउपंहूताऽअजावयः ॥ अथोऽअन्नस्य
कीलालऽउपहूतोगृहेषुनः ॥ क्षेमायवःशान्त्यैप्पर्पद्येशिवꣳ
शग्गमꣳशंय्योःशंय्योः ॥ ४३ ॥ [३-६] प्रघासिनोंहवाम
हे । मरुतंश्चरिशादंसः ॥ करम्भेणंसजोषंसः ॥ ४४ ॥
यद्ग्रामें ॥ यद्ग्रामेयदरंण्येयत्सभायांय्यदिन्द्रिये ॥ यदेनं ॥२१॥
श्चकृमाव्वयमिदन्तदवंयजामहेस्वाहा ॥ ४५ ॥ मोषूणः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मोषूणंऽइन्द्रात्रंपृत्सुदेवैरस्तिहि[2]ष्म्मांतेशुष्मिन्नवयाः ॥ मुह
श्चिद्यस्यमीढुषोयुव्याहविष्म्मतोमरुतोवन्दतेगीः॥४६॥ अक्र
न्कर्म्म । कर्म्मकृतं÷सहवाचामयोभुवा ॥ देवेब्भ्यःकर्म्मकृ
त्वास्तम्प्रेतसचाभुवः ॥ ४७ ॥ अवभृथनिचुम्पुण । निचेरुर
सिनिचुम्पुणः ॥ अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्म्मर्त्यकृ
तम्पुरुराव्णोदेव[3]रिषस्प्पाहि ॥ ४८ ॥ [५-७] पूर्णादर्वि ॥

१ मो षूणः । अत्र मो षूनः इतिपदम् । "निषण्णाय रथवाहणम् (३ अ. ८७ सू.)" इत्यनेन णकारस्य निपातः । २ हिष्म्माते । अत्र हेर्मिथोदयः (३ अ. ६८ सू.) इत्यनेन मकारोदये हिशब्दात्परस्य सकारस्य षकारः । तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" इति द्वित्वम् । ३ देवरिषस्प्पाहि । अत्र "अध्वनो रजसो रिषः स्पृशस्पातौ (३ अ. २८ सू.)" इत्यस्मिन् पातौ इति धातुग्रहणात् पाधातो रूपे परेऽपि रिषः विसर्गस्य सकारः । तत ऊष्मान्तस्थाभ्यश्च स्पर्शः (४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्णादर्विपरापतसुपूर्णापुनरापत । वस्नेवविक्रीणावहाऽइष
मूर्जꣳशतक्रतो ॥ ४९ ॥ देहिमे ॥ देहिमेददामितेनिमेधेहि
नितेदधे ॥ निहारञ्चहरासिमेनिहारन्निहराणितेस्वाहा ॥ ५० ॥
[२-८] अक्षन्नमीमदन्त ॥ अक्षन्नमीमदन्तह्यवप्प्रियाऽअ
धूषत ॥ अस्तोषतस्वभानवोविप्प्रानविष्ठयामतीयोजान्विन्द्र
तेहरी ॥ ५१ ॥ सुसन्दृशन्त्वा ॥ [1]सुसन्दृशन्त्वावयम्मघवन्व ॥२२॥

१ सुसन्दृशम् । अत्र "भाविभ्यः सः षं समानपदे (३ अ. ५९ सू.)" इत्यनेन षत्वापत्तौ "अनुसन्तनोतु बृहस्पतिसुतस्यसुसमिद्धायसुसन्दृशम्" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावः न षत्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्दिषीमहिं ॥ प्रनूनम्पूर्णवंन्धुरस्तुतोयासिव्वशाँ २ ॥ ऽअनु
योजान्विन्द्रतेहरीं ॥ ५२ ॥ मनोनु ॥ मनोन्वाह्वामहेनारा
शꣳसेनस्तोमेन ॥ पितॄणाञ्चमन्मभिः ॥ ५३ ॥ आनः ॥
आनंऽएतुमनःपुनःक्रत्त्वेदक्षांयजीवसें ॥ ज्योक्कुसूर्य्यन्दृशे
॥ ५४ ॥ पुनर्न्नः । पितरोमनोददांतुदैव्योजनः ॥ जीवंव्रा
तꣳसचेमहि ॥ ५५ ॥ व्वयꣳसोम । व्रतेतवमनंस्तनूषुबिभ्र
तः ॥ प्रजावन्तꣳसचेमहि ॥ ५६ ॥ [६-९] एषतें । रुद्र १२३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भागःसहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽ[1]आखुस्ते
पशुः ॥ ५७ ॥ अवंरुद्रम् ॥ अवंरुद्रमंदीमह्यवंदेवन्त्र्यंम्बकम् ॥
यथांनो[2]व्वस्यंसस्करद्यथांनः[3]श्श्रेयंसस्करद्यथांनोव्यवसाययांत्
॥ ५८ ॥ भेषजमंसि । भेषजङ्गवेऽश्वांयपुरुंषायभेषजम् ॥
सुखम्मेषायंमेष्यै ॥ ५९ ॥ त्र्यंम्बकँय्यजामहे । सुगन्धिम्पु

१ आखुःते। अत्र "तथयोः सम् (३ अ. ८ सू.)" इत्यनेन तकारे परे सत्वे आखुस्ते इति रूपम् । २ वस्यसस्करत् अत्र "समानपदे च (३ अ. ३० क.)" इत्यप्राप्तौ "कविष्करत्कृधिषु (३ अ. ३२ सू.)" इत्यनेन करत्परे विसर्जनीयस्य सकारः । तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" इति ककारस्य द्वित्वम् । ३ श्रेयसस्करत् अत्र "समानपदे च (३ अ. ३० सू.)" इत्यनेन समानपदे विसर्गस्य ककारे परे सकारः । तत "ऊष्मान्तस्थाभ्यश्च-स्पर्शः (४ अ. १०२ सू.)" इत्यनेन ककारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ष्टिवर्द्धनम् ॥ उर्व्वारुकमिंवबन्धंनान्मृत्त्योर्म्मुक्षीयमामृतात् ॥
त्र्यम्बकँयजामहेसुगन्धिम्पतिवेदनम् ॥ उर्व्वारुकमिंवबन्धं
नादितोमुंक्षीयमामुतः ॥ ६० ॥ एतत्ते । रुद्रावसन्तेनं
परोमूजवतोतीहि ॥ अवततधन्वापिनाकावसःकृत्तिवासा ऽ
अहिंसन्नःशिवोतीहि ॥ ६१ ॥ त्र्यायुषञ्जमदग्नेःकश्यप
पस्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नो ऽअस्तुत्र्यायुषम् ॥ ६२ ॥
शिवोनामं ॥ शिवोनामासिस्वधितिस्तेपितानमस्ते ऽअस्तुमा १२५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संहि. पू. अ.
॥२४॥ ॥४॥

मांहिꣳसीः ॥ निवंर्त्तयाम्म्यायुषेन्नाद्यांयप्प्रजननांयरायस्पो
षांयसुप्प्रजास्त्वायंसुवीर्य्यांय ॥ ६३ ॥ १० ॥ [७-१०]
इतिश्रीवाजसनेयसंहितायांतृतीयोऽध्यायः ॥ ३ ॥ श्रीवेदपुरु
षायनमः ॥ अनुवाकसूत्रम् ॥ एदंद्वे, महीनाम्पयश्चतस्त्र, आकू
त्याऋक्सामयोर्द्विकौ, व्रतंकृणुतषडे,षाते चतस्त्रो, वस्व्य
सितिस्त्र, एषतेद्वे, शुक्रंत्वाचतस्त्रो,ऽऽदित्यास्त्वगंष्टौ, दश सप्त ॥२४॥
त्रिꣳशत् ॥ १० ॥ ३७ ॥ ४ ॥ हरिःॐ ॥ एदम् ॥ [1]एदमगन्म १२६

१ एदमगन्। अत्र आ इदम् अत्र "कण्ठ्यादिवर्ण एकारम् (४ अ. ५३ सू.)" इत्यनेन कण्ठ्यात्परः इवर्णः पूर्वस्वरः परश्च एकारमापद्यते। तेन एदमगन्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवयजंनम्पृथिव्व्यासत्त्रेदेवासोऽअजुंषन्तव्विश्श्वे ॥ ऋक्क्सामा
ब्भ्यांᳬसन्तरंन्तोयजुंब्भीरायस्प्पोषेणसमिषामंदेम ॥ इमाऽ
आपःᳬशमुंमेसन्तुदेवीरोषंधेत्त्रायंस्वस्वधितेमैनंᳬहि[1]ᳬसीः ॥ १ ॥
आपोऽअस्म्मान् ॥ आपोऽअस्म्मान्न्मातरंः[2]शुन्धयन्तुघृतेनं
नोघृतप्प्वंः पुनन्तु ॥ व्विश्श्वᳬहिरिप्प्रम्प्रवहंन्तिदेवीरुदिदाब्भ्यःᳬ

---

१ हिंसीः । (हिᳬसीः) अत्र अनुस्वाराच्च तत्पूर्वात् (शु. य. प्रा. ३ अ. ५७ सू.) इत्यनेन षकारापत्तौ अनुसन्तनोतु (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे अथानुस्वारस्य गूमित्यादेशः शषसहरेफेषु (शु. य. प्रा. परिशिष्ट सू.) इत्यनेन अनुस्वारस्य दीर्घगूंत्वम् । २ शुन्धयन्तु । अच्च स्वरात्० इति सूत्रेण द्वित्वे प्राप्तेऽपि स्ववर्गीये चानुत्तमे (शु. य. प्रा. ४ अ. ११५ सू.) इत्यनेन स्ववर्गीये द्वित्वनिषेधादत्र नकारात्परे स्ववर्गीये धकारे नकारस्य न द्वित्वम् । एवमेवैतादृशेषु स्थलेषु ज्ञेयम् । यथा पुनन्तु । शान्तिः । माच्छन्दः । सन्तु । अन्तरिक्षात् । अजुषन्त । सन्वरन्तः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुचिरापूतऽएमि ॥ दीक्षातपसोस्तनूरसितान्त्वाᳬशिवाᳬ᳘शग्ग्मा
ग्ग्माम्परिदधेभद्द्रंव्वर्ण्णम्पुष्ष्यन्न् ॥२॥ [२-१] महीनाम्पयः ॥
महीनाम्पयोसिव्वर्च्चोदाऽअसिव्वर्च्चोमेदेहि ॥ वृत्रस्यासिकनीन
कश्चक्षुर्दाऽअसिचक्षुर्म्मेदेहि ॥ ३ ॥ चित्तपतिर्म्मा ॥ चित्तपति
र्म्मापुनातुव्वाक्पतिर्म्मापुनातुदेवोमासवितापुनात्त्वच्छिद्द्रेणप
वित्त्रेणसूर्य्यस्यरश्मिभिः ॥ तस्यतेपवित्त्रपतेपवित्त्रपूतस्यय ॥ २५ ॥
त्कामःपुनेतच्छकेयम् ॥४॥ आवः ॥ आवोदेवासऽईमहेव्वामम्प्र

१ पुष्ष्यन्न् । अत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. अ. १०० सू.) इत्यनेन षकारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यत्त्यद्धूरे ॥ आवोदेवासऽआशिषोयज्ञियासोहवामहे ॥ ५ ॥
स्वाहायज्ञम् ॥ स्वाहायज्ञम्मनंसःस्वाहोरोरन्तरिक्षात्त्स्वाहा
द्यावापृथिवीब्भ्याᳪंस्वाहाव्वातादारंभेस्वाहा ॥ ६ ॥ [४-२]
आकूत्त्यैप्प्रयुजे ॥ आकूत्त्यैप्प्रयुजेग्ग्नयेस्वाहामेधायैमनंसेग्ग्न
येस्वाहादीक्षायैतपंसेग्ग्नयेस्वाहासरंस्वत्त्यैपूष्णेग्ग्नयेस्वाहा ॥
आपोदेवीर्बृहतीर्व्विश्वशम्भुवोद्यावापृथिवीऽउरोऽअन्तरिक्ष ॥
बृहस्प्पतंयेहविषाव्विधेमस्वाहा ॥ ७ ॥ व्विश्वोदेवस्य ॥ व्विश्वो १२१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवस्यंनेतुर्म्मर्त्तौवुरीतसुक्ख्यम् ॥ विश्श्वोरायऽइषुद्ध्यातिद्युम्म्नंवृ
णीतपुष्ष्यसेस्वाहा ॥८॥ [२-३] ऋक्कसामयोꣳशिल्प्पे ॥ ऋक्कसा
मयोꣳशिल्प्पैस्त्थस्त्तेवामारंभेतेमांपातमास्ययज्ञस्योद्दचं॥ शा
म्मासिशर्म्मंमेयच्छनमंस्त्तेऽअस्त्तुमामाहिꣳसीः ॥ ९ ॥ ऊर्ग्गं
सि ॥ ऊर्ग्गस्याङ्गिरस्यूर्ण्णम्म्रदाऽऊर्ज्जंमयिंधेहि ॥ सोमंस्यनी
विरंसिविष्ण्णोꣳशर्म्मासिशर्म्मयजमानस्येन्द्रंस्ययोनिंरसिसुस ॥२६॥ १३०
स्याःकृषीस्कृंधि ॥ उच्छ्रंयस्ववनस्प्पतऽऊर्द्ध्वोमांपाह्यꣳहंसऽ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आस्ययज्ञस्योदृचं÷ ॥ १० ॥ [२-४] व्रतङ्कृणुत । व्रतङ्कृणुता

ग्निर्ब्रह्माग्निर्यज्ञोवनस्पतिर्यज्ञियं÷ ॥ दैवीन्धियम्मनाम

हेसुमृडीकामभिष्टयेवर्च्चोधाँयज्ञवाहसꣳसुतीर्त्थानोऽअसद्व

शे॥येदेवामनोजातामनोयुजोदक्षंक्रतवस्तेनोवन्तुतेनं÷पान्तु

तेब्भ्यꣳस्वाहा ॥ ११ ॥ श्वात्राꣳपीताꣳ ॥ श्वात्राꣳपीताभवतयूय

मापोऽअस्म्माकमन्तरुदरेसुशेवा÷ ॥ ताऽअस्म्मभ्यमयक्ष्मा

१ अत्र व्रतम् कृणुत इति पदम् । स्पर्शे परपञ्चमम् (शु. य. प्रा. ४ अ. १२ सू.) इत्यनेन मकारस्य स्पर्शवर्णपरे स्पर्शवर्णस्य पञ्चमाक्षरो भवति तेन ङ्कारः । एवमन्ते तत्र नकारः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऽअनमीवाऽअनागसꣳस्वदन्तुदेवीरमृताऽऋतावृधः ॥ १२ ॥
इयन्ते । यज्ञियातनूरपोमुञ्चामिनप्प्रजाम् ॥ अꣳहोमुचꣳ
स्वाहाकृताꣳपृथिवीमाविशतपृथिव्यासम्भव ॥ १३ ॥ अग्ने
त्त्वम् ॥ अग्नेत्त्वꣳसुजागृहिव्वयꣳसुमन्दिषीमहि ॥ रक्षाणोऽ
अप्प्रयुच्छन्प्रबुधेनꣳपुनस्कृधि ॥ १४ ॥ पुनर्म्मनः ॥ पुनर्म्मनꣳपु
नरायुर्म्मऽआगन्पुनः प्प्राणः पुनरात्त्मामऽआगन्पुनश्चक्षुꣳ

१ पुनस्कृधि । अत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ककारस्य द्वित्वे प्राप्ते ऋवर्णे (शु. य. प्रा. ४ अ. १११ सू.) इत्यनेन ऋवर्णपरे स्पर्शे निषेधान्न ककारस्य द्वित्वम् । यत्र यत्र ऊष्मभ्योऽन्तःस्थेभ्यश्च परः स्पर्शवर्णः ऋविशिष्टश्चेत्तत्र तत्र द्वित्वाभावो ज्ञेयः । यथा-कृषीस्कृधि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुनःश्श्रोत्त्रंम्म ऽआगंन् ॥ व्वैश्श्वानरोऽअदंब्धस्त्तनूपाऽअग्निर्न्नः
पातुदुरितादंवद्यात् ॥ १५ ॥ त्वमंग्ग्ने । व्व्रतपाऽअंसिदेवऽ
आमर्त्त्येष्ष्वा ॥ त्वँय्यज्ञेष्ष्वीड्यः ॥ रास्स्वेयंत्त्सोमाभूयो
भरदेवोनःसवितावसोर्द्दातावस्वंदात् ॥ १६ ॥ [६-५]
एषातें । शुक्क्रतनूरेतद्वर्च्चस्त्तयासम्भंवभ्भ्राजंङ्गच्छ ॥ जूरंसि
धृतामनंसाजुष्ट्टाव्विष्ष्णवे ॥ १७ ॥ तस्यांस्त्ते । सत्त्यसंवसः
प्प्रसवेतन्न्वोयन्त्रमंशीयस्स्वाहां ॥ शुक्क्रमंसिचन्द्रमंस्यमृतंमसिवै १३३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ध्रुवमसि ॥ १८ ॥ चिदसि । मनासि धीरसि दक्षिणासि क्ष
त्रियासि यज्ञियास्यदितिरस्युभयतःशीर्ष्णी ॥ सा नः सुप्राची
सुप्रतीच्येधि मित्रस्त्वा पदि बध्नीतां पूषाध्वनस्पात्विन्द्राया
ध्यक्षाय ॥ १९ ॥ अनु त्वा । माता मन्यतामनु पिताऽनु भ्राता
सगर्भ्योऽनु सखा सयूथ्यः ॥ सा देवि देवमच्छेहीन्द्राय सोमꣳ रु
द्रस्त्वा वर्त्तयतु स्वस्ति सोमसखा पुनरेहि ॥ २० ॥ [४-६] ॥२८॥
वस्व्यसि ॥ वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बृहस्प्पतिष्ट्वासुम्म्नेरंम्म्णातुरुद्द्रोव्वसुंभिराचंके ॥ २१ ॥ अदिं
त्त्यास्त्त्वा । मूर्द्धन्नाजिंघर्म्मिदेवयजंनेपृथिव्याऽइडायास्प्पद
मंसिघृतवत्त्स्वाहा ॥ अस्म्मेरंमस्वास्म्मेतेबन्धुस्त्त्वेरायोमेरायो
माव्वयꣳरायस्प्पोषेंणव्वियौष्म्मतोतोरायं÷ ॥ २२ ॥ सैमंक्ख्ये[1] ।
देव्याधियासन्दाक्षिणयोरुचंक्षसा ॥ मामऽआयुःष्प्रमोषीम्मोंऽ
अहन्तवंव्वीरंव्विंदेयतवंदेविसन्द्दशिं ॥ २३ ॥ [३-७] एषतें ।

१ समकृख्ये । अत्र स्वरात्संयोगा० (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन खकारस्य द्वित्त्वे जाते प्रथमैर्द्वितीयास्तृतीयैश्चतुर्थाः (शु. य. प्रा. ४ अ. १०८ सू.) इत्यनेन खस्थाने ककारो विहितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गायत्त्रोभागऽइतिंमेसोमांयब्रूतादेषतेत्त्रैष्टुभोभागऽइतिंमेसो
मांयब्रूतादेषतेजागंतोभागऽइतिंमेसोमांयब्रूताच्छन्दोनामा
नाꣳसाम्म्राज्ज्यङ्गच्छेतिंमेसोमांयब्रूतादास्म्माकोसिशुक्क्रस्त्ते
ग्ग्रह्योंविचितंस्त्वाविचिन्न्वन्तु ॥ २४ ॥ अभित्त्यम् ॥ अभि
त्त्यन्देवꣳसवितारंमोण्ण्योः[1] कविक्क्रतुमर्च्चांमिसत्त्यसंवꣳरत्नधा
मभिप्प्रियम्मतिङ्कविम् ॥ ऊर्द्ध्वायस्यामतिर्भाऽअदिद्द्युतत्त्सवीं ॥ २९ ॥

---

१ देवꣳसवितारमोण्ण्योः । अत्र देवम् इत्यस्य मकारस्य अनुस्वारं रोष्मसु मकारः (शु. य. प्रा. ४ अ-१ सू.) इत्यनेन उष्मणि सकारे परे अनुस्वारे अथानुस्वारस्य गूंमित्यादेशः शषसहरेफेषु (का. प. १ सू.) इत्यनेन (गूंकारे) कृते गूंविशिष्टं रूपम् । एवम् उरुꣳहिराजा । अꣳहोमुचः । इत्यादिस्थलेषु गूंकारोऽनेन ज्ञेयः । वयꣳसुम. । अग्ने त्वꣳसुजा. । सोमꣳरुद्रस्त्वा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनिहिरंण्ण्यपाणिरमिमीतसुक्रतुंःकृपास्वंः॥ प्रजाब्भ्यंस्त्त्वा
प्प्रजास्त्त्वांनुप्प्राणंन्तुप्प्रजास्त्त्वमंनुप्प्राणिंहि ॥२५॥[२-८]
शुक्रन्त्वां। शुक्रेणंक्रीणामिचन्द्रञ्चन्द्रेणामृतंममृतेंन ॥ सग्ग्मे
तेगोरस्म्मेतेंचन्द्राणितपंसस्त्तनूरंसिप्प्रजापंतेर्व्वर्ण्णंःपरमेणंप
शुनांक्रीयसेसहस्स्रपोषम्पुंषेयम्॥२६॥ मित्त्रोनंः॥ मित्त्रोनऽए
हिसुमिंत्त्रधऽइन्द्रंस्योरुमाविंशदक्षिंणमुशन्नुशन्तंᳪस्योनᳪस्यो
नम्॥ स्वानभ्भ्राजाङ्घांरेबम्भांरेहस्त्तसुहंस्त्तकृशांनवेतेवंःसोम

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्रयंणास्त्तान्त्रंक्षद्धम्मावौदभन्॥ २७॥ परिमा । ग्म्रेदुश्च्रंरिता

द्वाधुस्वामासुचंरितेभज ॥ उदायुंषास्वायुषोदंस्त्थामृताँ २ ॥

ऽअनुं ॥ २८ ॥ प्रतिपन्थांम् ॥ प्रतिपन्थांमपद्महिस्वस्त्तिगा

मंन्नेहसंम् ॥ येनुव्विश्श्वाहंपरिद्द्विषोंव्वृणक्क्तिव्विन्दतेव्वसु ॥ २९ ॥

[४-९] अदिंत्त्यास्त्त्वक् ॥ अदिंत्त्यास्त्त्वगस्यादिंत्त्यैसदुऽआ

सींद ॥ अस्त्तंब्भ्नाद्यांव्वृंषभोऽअन्तरिंक्षममिंमीतव्वरिमाणंम्पृ ॥३०॥

थिव्याः ॥ आसींदुद्विश्श्वाभुवंनानिसम्म्राड्विश्श्वेत्तानिव्वरुंणस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्व्रतानिं ॥ ३० ॥ व्वनेषुवि ॥ व्वनेषुव्व्यन्तरिक्षन्ततानव्वाजम
र्व्वत्सुपयंऽउस्रियासु ॥ हृत्सुक्क्रतुंव्वरुणोव्विक्क्ष्वग्ग्निन्दिवि
सूर्य्यमदधात्सोममद्रौ ॥ ३१ ॥ सूर्य्यस्यचक्षुः ॥ सूर्य्यस्य
चक्षुरारोहाग्नेरक्ष्णःकनीनकम् ॥ यत्रैतंशेभिरीयसेभ्राजमा
नोव्विपश्चिता ॥ ३२ ॥ उस्रावेतम् ॥ उस्रावेतन्धूर्षाहौयुज्ज्ये
थामनश्रूऽअवीरहणौब्ब्रह्मचोदनौ ॥ स्वस्तियजमानस्यगृहा

१ अत्र स्वरात्संयोगा० (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन द्वित्वे प्राप्ते न क्षवृचिश्विसतयेभ्यस्त्रैकम् (शु. य. प्रा. ६ अ. २७ सू.) इत्यनेनैतेभ्यः परस्य त्रशब्दस्य द्वित्वं न भवति तेन क्षत्र, वृत्र, चित्रम्। श्वित्रम्, सत्रस्य। तत्र गच्छ, यत्र पूर्वे। इत्येतेषु द्वित्वाभावो ज्ञेयः।

सं. ६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्गंच्छतम् ॥ ३३ ॥ भुद्रोमें । सि॒प्प्रक्क्षयंवस्वभुवस्प्पतेव्विश्वा पू. अ.
न्यभिधामांनि ॥ मात्त्वांपरिपुरिणोंव्विदुन्मात्त्वांपरिपुन्थिनो ॥ ४ ॥
व्विदुन्मात्त्वाव्वृकांऽअघायवोंव्विदन् ॥ श्येनोभूत्त्वापरापतयज
मानस्यगृहान्गंच्छतन्नौसँस्कृतम् ॥ ३४ ॥ नमोंमित्रस्य ॥ नमो
मित्रस्यव्वरुंणस्यचक्षंसेमहोदेवायतदृतꣳसंपर्य्यत ॥ दूरेदृशेंदेव
जांतायकेतवेंदिवस्प्पुत्त्रायसूर्य्यायशꣳसत ॥ ३५ ॥ व्वरुंणस्यो ॥ २१ ॥
त्तम्भंनम् ॥ व्वरुंणस्योत्तम्भंनमसिव्वरुंणस्यस्कम्भसर्ज्जंनीस्त्थो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्वरुणस्यऽऋतसदंन्यासिब्वरुणस्यऽऋतसदंनमासिब्वरुणस्यऽऋत
सदंनमासीद ॥ ३६ ॥ याते ॥ यातेधामानिहुविषायजंन्ति
तातेब्विश्वापरिभूरंस्तुयुज्ञम् ॥ गयुस्फानंः प्रतरणंः सुवीरो
वीरहाप्प्रचंरासोमदुर्य्यान् ॥ ३७ ॥ [८-१०] इतिश्रीवाज
सनेयसंहितायांचतुर्थोऽध्यायः ॥ ४ ॥ श्रीवेदपुरुषायनमः ॥
अनुवाकसूत्रम्–अग्नेस्तनू, रापतयेत्वाचतुष्कौ, तक्षायनीमेद्वे,
इन्द्रघोषस्त्वास्तिस्त्रो, युंजतेमनाष्टौ, देवस्यत्वाचतस्त्रो, देव

१४१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संहि. स्यत्वापंच, विभूरसिचतस्रो, ज्योतिरसिष, डुरुविष्णोतिस्रो, पू. अ.
॥३२॥ दश त्रिचत्वारिंशत् ॥ [अ. ५ मं. ४३-अनु० १०] हरिःॐ॥ ॥ ५ ॥
अग्नेस्त्तनूः ॥ अग्नेस्त्तनूरसिविष्णवेत्त्वासोमस्यतनूरसिवि
ष्णवेत्त्वातिथेरातित्थ्यमसिविष्णवेत्त्वाश्श्येनायत्त्वासोम
भृतेविष्णवेत्त्वाग्नयेत्त्वारायस्पोषदेविष्णवेत्त्वा ॥ १ ॥
अग्नेर्ज्जनित्रम् ॥ अग्नेर्ज्जनित्रमसिवृषणौस्त्थऽउर्वश्श्यस्या ॥ ३२ ॥
युरसिपुरूरवाऽअसि ॥ गायत्त्रेणत्त्वाच्छन्दसामन्थामित्त्रैष्टुभे १४२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्त्वाच्छन्दंसामन्थामिजागंतेनत्त्वाच्छन्दंसामन्थामि ॥ २ ॥
भवंतन्नंः ॥ भवंतन्नंःसमंनसौसचेतसावरेपसौ ॥ मायुज्ञंः
हिंःसिष्टम्मायुज्ञपंतिज्ञातवेदसौशिवौभंवतमुद्यनंः ॥ ३ ॥
अग्नावग्निः ॥ अग्नावग्निश्चंरतिप्प्रविंष्टऽऋषीणाम्पुत्रोऽअं
भिशास्त्तिपावा ॥ सनंःस्योनःसुयजांयजेहदेवेब्भ्योंहव्यंः
सदमप्प्रंयुच्छन्त्स्वाहां ॥ ४ ॥ [४-१] आपंतयेत्त्वा ॥ आ
पंतयेत्त्वापरिंपतयेगृह्णामितनूनप्त्रेंशाक्क्रायुशक्कंनऽओजिं

१४३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संहि. ष्ठाय ॥ अनांधृष्टमस्यनाधृष्यन्देवानामोजोनंभिशस्त्यभि पू. अ.
॥ ३३॥ शस्तिपाऽअंनभिशस्तेन्यमञ्जंसासत्यमुपंगेषꣳस्वितेमांधाः ॥ ५ ॥
॥ ५ ॥ अग्नेंव्व्रतपाः ॥ अग्नेंव्व्रतपास्त्वेव्व्रंतपायातवंतनूरियꣳ
सामयियोममंतनूरेषासात्त्वयिं ॥ सहनौंव्व्रतपतेव्व्रतान्न्यनुंमे
दीक्षान्दीक्षापंतिर्म्मन्न्यंतामनुतपस्तपंस्प्पातिः ॥ ६ ॥ अꣳ
शुरꣳशुष्टे । देवसोमाप्प्यांयतामिन्द्रांयैकधनविदें ॥ आतुब्भ्य ॥ ३३ ॥
मिन्द्रःप्प्यायंतामात्त्वमिन्द्रांयप्प्यायस्व ॥ आप्प्यांययास्म्मा १४४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्तसर्व्वीन्तसुन्व्यामेधयांस्वस्त्तितेंदेवसोमसुत्त्यामंशीय ॥ एष्ट्वा
रायुꣳष्प्रेषेभगांयऽऋतमृंतवादिब्भ्योनमोद्यावांपृथिवीब्भ्याम्
॥ ७ ॥ यातें ॥ यातेंऽअग्नेयꣳशयातनूर्व्वर्षिष्ठागह्वरेष्ठा ॥ उग्ग्रं
व्वचोऽअपांवधीत्त्वेषंव्वचोऽअपांवधीत्त्स्वाहां ॥ यातेंऽअग्नेरजꣳ
शयातनूर्व्वर्षिष्ठागह्वरेष्ठा ॥ उग्ग्रंव्वचोऽअपांवधीत्त्वेषंव्वचोऽ
अपांवधीत्त्स्वाहां ॥ यातेंऽअग्नेहारिशयातनूर्व्वर्षिष्ठागह्वरेष्ठा ॥
उग्ग्रंव्वचोऽअपांवधीत्त्वेषंव्वचोऽअपांवधीत्त्स्वाहा ॥ ८ ॥ [४-२] १४५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥२४॥ तप्तायंनीमे ॥ तप्तायंनीमेसिव्वित्तायंनीमेस्यवंतान्मानाथिता
दवंतान्माव्व्यथितात् ॥ व्विदेदग्निर्न्नभोनामाग्नेऽअङ्गिरऽआयु ॥५॥
नानाम्नेहियोस्याम्पृथिव्यामसियत्तेनाधृष्टन्नामंयज्ञियन्तेन
त्त्वादंधेव्विदेदग्निर्न्नभोनामाग्नेऽअङ्गिरऽआयुंनानाम्नेहियो
द्वितीयंस्याम्पृथिव्यामसियत्तेनाधृष्टन्नामंयज्ञियन्तेनत्त्वादंधे
व्विदेदग्निर्न्नभोनामाग्नेऽअङ्गिरऽआयुंनानाम्नेहियस्तृतीयं ॥३४॥
स्याम्पृथिव्यामसियत्तेनाधृष्टन्नामंयज्ञियन्तेनत्त्वादंधे ॥ अनु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्त्वादेववीतये ॥ ९ ॥ सिं॒ꣳह्य॒सि । सपत्त्क॒साहीदे॒वेभ्भ्यं॑ कल्प्प॒स्वासिं॒ꣳह्य॒सिसपत्त्क॒साहीदे॒वेभ्भ्यं॑ शुन्धस्वासिं॒ꣳह्य॒सिसपत्त्कसाहीदे॒वेभ्भ्यं॑ शुम्भस्व ॥ १० ॥ [२-३] इन्द्र॒घो॒षस्त्त्वां ॥ इन्द्र॒घो॒षस्त्त्वा॒व॒सुभि॑ पुरस्त्ता॑त्त्पातुप्प्रचे॑तास्त्त्वारु॒द्रैः प॒श्चात्त्पा॑तुमनो॑जवास्त्त्वापि॒तृभि॑र्द्दक्षिण॒तः पा॑तुवि॒श्श्वकं॑र्म्मात्त्वादि॒त्त्यैरु॑त्त्तरतः पां॑त्त्वि॒दमहन्तप्त्तं॑ ॥ वा॒र्बहि॒र्द्धा॒य॒ज्ञान्निःसृं॑जामि ॥ ११ ॥

१ अत्र अनुस्वारं रोष्मसु मकारः (शु. य. प्रा. ४ अ० १ सू.) इत्यनेन मकारस्यानुस्वारे कृते अथानुस्वारस्य गूमित्यादेशः शषसहरेफेषु (शु. य. प्रा. परिशि. सू.) इत्यनेन दीर्घगूंकारे प्राप्ते नानुस्वारः (शु. य. प्रा. ४ अ. १०९ सू.) इत्यनेन स्योन इति संयोगे परे सकारे न दीर्घगुंकारः किन्तु ह्रस्वः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संहि.

॥३५॥ सिꣳह्यसि ॥ सिꣳह्यासिस्वाहासिꣳह्यस्यादित्यवनिःस्वाहा

सिꣳह्यासिब्रह्मवनि÷क्षत्रवनिःस्वाहासिꣳह्यासिसुप्प्रजाव

नीरायस्प्पोषवनिःस्वाहासिꣳह्यस्यावहदेवान्यजमानायस्वा

हाभूतेभ्यस्त्वा ॥ १२ ॥ ध्रुवोसि । पृथिवीन्दृꣳहध्रुवक्षिदस्य

न्तरिक्षन्दृꣳहाच्युतक्षिदसिदिवन्दृꣳहाग्नेःपुरीषमसि ॥ १३ ॥

[३-४] युञ्जतेमन÷ ॥ युञ्जतेमनऽउतयुञ्जतेधियोविप्प्राव्वि ॥३५॥

प्प्रस्यबृहतोविपश्चित÷ ॥ विहोत्रादधेवयुनाविदेकऽइन्मही

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवस्यंसवितुः¹परिंष्टुतिꣳस्वाहां ॥ १४ ॥ इदंविष्णुं÷ ॥ इदं
विष्णुर्विचंक्रमेत्रेधानिदंधेपदम् ॥ समूंढमस्यपाꣳसुरेस्वाहां
॥१५॥ इरांवतीधेनुमती ॥ इरांवतीधेनुमतीहिभूतꣳसूंयवसिनी
मनंवेदशस्या ॥ व्यंस्कभ्नारोदंसीविष्णवेतेदाधर्त्थंपृथिवीम्
भितोमयूखैꣳस्वाहां ॥ १६ ॥ देवश्रुतौदेवेषु ॥ देवश्रुतौदेवेष्वा
घोंषतम्प्राचींप्रेतंमध्वरङ्कल्पयंन्तीऽऊर्ध्वँयज्ञन्नंयतम्माजिंह्व
रतम् ॥ स्वङ्कोष्ठमावंदतन्देवीदुर्य्येंऽआयुर्म्मानिर्वांदिष्टम्प्रजा

१ अत्र रकारात्परस्य सकारस्य परंतु रेफहकाराभ्याम् (शु. य. प्रा. ४ अ. १०१ सू.) इत्यनेन द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म्मानिर्व्वादिष्टमत्रंरमेथांवर्ष्मन्पृथिव्याः ॥ १७ ॥ व्विष्ण्णोर्न्नु ।
कंव्वीर्य्याणिप्प्रवोचँय्यःपार्त्थिवानिव्विममेरजाᳪंसि ॥ योऽ
अस्क्कभायदुत्तरᳪंसधस्त्थंव्विचक्क्रमाणस्त्रेधोरुगायोव्विष्ण्णवे
त्त्वा ॥ १८ ॥ दिवोवा । व्विष्ण्णऽउतवापृथिव्यामहोवाव्वि
ष्ण्णऽउरोरन्तरिक्षात् ॥ उभाहिहस्ताव्वसुनापृणस्वाप्प्रयच्छद
क्षिणादोतसव्व्याद्विष्ण्णवेत्त्वा ॥ १९ ॥ प्रतत् ॥ प्रतद्विष्ण्णु

१ अत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन द्वित्वम् ॥ यथा–विष्ण्णाऽउत वा । विष्ण्णऽ उरोर० । द्विष्ण्णवे त्त्वा । प्रतद्विष्ण्णुः । विष्ण्णोरराटम् । इत्यादिषु बोध्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्तवतेव्वीर्य्यैंणमृगोनभीमः कुचरोगिरिष्ठाः ॥ यस्योरुषुत्त्रिषु
व्विक्क्रमंणेष्ष्वाधिक्षियन्तिभुवनानिव्विश्श्वा ॥ २० ॥ व्विष्ण्णोररा
टम् ॥ व्विष्ण्णोररराटमासिव्विष्ण्णोः श्नप्त्रेस्त्थोव्विष्ण्णोः स्यूर
सिव्विष्ण्णोर्द्धुवोसि ॥ व्वैष्ण्णवमासिव्विष्ण्णवेत्त्वा ॥ २१ ॥ [८-५]
देवस्यंत्त्वा । सवितुः प्प्रंसवेश्विनोर्ब्बाहुब्भ्याम्पूष्ण्णोहस्त्ता
ब्भ्याम् ॥ आददेनार्य्यसीदमहं रक्षसाङ्ग्रीवाऽअपिकृन्तामि ॥
बृहन्नसिबृहद्द्रवाबृहतीमिन्द्रायव्वाचंव्वद ॥ २२ ॥ रक्षोहणंव्व

सं. ७ १५१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लगहनंम् ॥ रक्षोहणंव्वलगहनंव्वैष्णवीमिदमहन्तंव्वंलगमुत्त्कि
रामियम्मेनिष्ट्ट्योयममात्त्योंनिचखानेदमहन्तंव्वंलगमुत्त्किरा
मियम्मेंसमानोयमसंमानोनिचखानेदमहन्तंव्वंलगमुत्त्किरा
मियम्मेसबंन्धुर्य्यमसंबन्धुर्न्निचखानेदमहन्तंव्वंलगमुत्त्किरा
मियम्मेंसजातोयमसंजातोनिचखानोत्त्कृत्त्याङ्किंरामि ॥२३॥
स्वराडंसि । सपत्क्नहासंत्रराडंस्यभिमातिहाजंनराडंसिरक्षोहा
संव्र्वराडंस्यामित्रहा ॥ २४ ॥ रक्षोहणोंवह ॥ रक्षोहणोंवोव्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लगुहनुं प्प्रोक्षांमिव्वैष्णुवान्नरंक्षोहणौंवोव्वलगुहनोवंनयामिव्वै
ष्णुवान्नरंक्षोहणौंवोव्वलगुहनोवंस्तृणामिव्वैष्णुवान्नरंक्षोहणौवां
व्वलगुहनाऽउपंदधामिव्वैष्णुवीरंक्षोहणौवांव्वलगुहनौपर्य्यूंहा
मिव्वैष्णुवीव्वैष्णुवमंसिव्वैष्णुवास्स्थं ॥ २५ ॥ [४-६] देवस्यं
त्वा । सवितुः प्प्रंसुवेऽश्विनोर्बाहुब्भ्यांम्पूष्णोहस्ताब्भ्याम् ॥
आददेनार्य्यसीदमहर्रक्षसाङ्ग्रीवाऽअपिंकृन्तामि ॥ सवौसि
सुवयास्म्मद्द्वेषोसुवयारांतीर्हिवेत्त्वान्तरिंक्षायत्त्वापृथिव्यैत्त्वा १९२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुन्धंन्ताँल्लोकाꣳपितृषदंनाꣳपितृषदंनमसि ॥ २६ ॥ उद्दि
वंम् ॥ उद्दिवꣳस्तभानान्तरिंक्षम्पृणदृꣳहंस्वपृथिव्यान्द्युंतान
स्त्वांमारुतोमिंनोतुमित्रावरुंणौद्धुवेणधर्म्मंणा ॥ ब्रह्मवनिं
त्वाक्षत्रवनिंरायस्पोषवनिपर्य्यूंहामि ॥ ब्रह्मंदृꣳहक्षत्रन्दृꣳ
हायुंर्दृꣳहप्प्रजान्दृꣳह ॥ २७ ॥ ध्रुवासिं । ध्रुवोयꣳयजमानो
स्मिन्नायतंनेप्प्रजयांपशुभिंर्भूयात् ॥ घृतेनंद्यावापृथिवी ॥ ३८ ॥
पूर्य्येथामिन्द्रंस्यच्छदिरंसिविश्वजनस्यंच्छाया ॥ २८ ॥ परिं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वा । गिर्व्वणोगिरऽइमाभंवन्तुव्विश्श्वतं÷ ॥ वृद्धायुमनुवृद्धंयो
जुष्ट्टांभवन्तुजुष्ट्टंयः ॥ २९ ॥ इन्द्रंस्युस्यूः ॥ इन्द्रंस्युस्यूरसी
न्द्रंस्यद्ध्रुवोसि ॥ ऐन्द्रमंसिव्वैश्श्वदेवमंसि ॥ ३० ॥ [५-७]
व्विभूरंसि । प्प्रवाहंणोव्वह्निरसिहव्यवाहंनः ॥ श्वात्त्रोसिप्प्रचे
तास्त्तुथोसिव्विश्श्ववेंदाऽउशिगंसि ॥ ३१ ॥ उशिगंसि । कुवि
रङ्घांरिरासिबम्भांरिरवस्यूरंसिदुवंस्वाञ्छुन्ध्यूरंसिमार्ज्जालीयं÷ १५५
सम्म्राडंसिकृशानु÷परिषद्यौसिपवंमानोनभौसिप्प्रतक्क्वामृष्ट्टो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिहव्यसूदनऽऋतधामासिस्वर्ज्ज्योतिःसमुद्रोसि ॥ ३२ ॥

॥ २९॥ समुद्रोसि। विश्वव्यचाऽअजोस्येकपादहिरसिबुध्न्योवागस्यैन्द्र ॥ ५ ॥

मसिसदोस्यृतस्यद्वारौमामासन्ताप्तमध्वनामध्वपतेप्रमातिर

स्वस्तिमेस्मिन्पथिदेवयानेभूयान्मित्रस्यंमा ॥ ३३ ॥ मित्र

स्यंमा ॥ मित्रस्यंमा चक्षुषेक्षध्वमग्नयःसगराःसगरास्त्थ

सगरेणनाम्नारौद्रेणानीकेनपातमाग्नयःपिपृतमाग्नयोगोपा ॥ ३९ ॥ १६६

यतमानमोवोस्तुमामाहिंसिष्ट ॥ ३४ ॥ [४-८] ज्योति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रसि। व्विश्वरूपंव्विश्वेषान्देवानाᳪंसमित्॥ त्वᳪंसोमतनू

कृद्भ्योद्वेषोभ्योन्न्यकृतेभ्यऽउरुयन्तासिव्वरूथᳪंस्वाहाजुषा

णोऽअप्तुराज्यंस्यव्वेतुस्वाहा॥ ३५॥ शतम्॥ २००॥

अग्नेनयं। सुपथारायेऽअस्म्मान्विश्वानिदेवव्वयुनानिव्वि

द्वान्॥ युयोद्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिंव्विधेम

॥ ३६॥ अयन्नं÷॥ अयन्नोऽअग्निर्व्वरिवस्कृणोत्त्वयम्मृधं÷ १८७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरऽएंतुप्प्रभिन्दन् ॥ अयंव्वाजाञ्जं[1]यतुव्वाजंसातावयꣳशत्रू

ञ्जयतुजर्हृषाणꣳस्वाहां ॥ ३७ ॥ उरुव्विंष्णणो ॥ उरुव्विंष्णणो

व्विक्क्रमस्वोरुक्षयांयनस्कृधि ॥ घृतङ्घृंतयोनेपिबप्प्रप्प्रंयज्ञपंतिं

न्तिरस्वाहां ॥ ३८ ॥ देवंसवितꣳ ॥ देवंसवितरेषतेसोमस्त्तꣳ

रंक्षस्वमात्त्वांदभन् ॥ एतत्त्वन्दैंवसोमदेवोदेवाँ २ ॥ ऽउपां

गाऽइदमहम्मंनुष्ष्यान्त्सहरायस्प्पोषैंणस्वाहानिर्व्वरुंणस्यपा ॥४०॥

---

१ अत्र वाजान् जयतु इति पदे तकारवर्गश्चकारवर्गे चकारवर्गम् । (शु. य. प्रा. ४ अ. ९५ सू.) इत्यनेन वाजान् पदघटिततवर्गस्य नकारस्य जयतुपदघटिते चकारवर्गे परे चवर्गत्वं जातम् । तेन वाजाञ्जयतु । एवं शत्रूञ्जयतु ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शांन्मुञ्चये ॥ ३९ ॥ अग्नेव्व्रतपाः ॥ अग्नेव्व्रतपास्त्वेव्व्रतपाया
तवतनूर्म्मय्यभूदेषासात्त्वयियोममंतनूस्त्वय्यभूदियꣳसाम
यिं ॥ यथायथन्नौव्व्रतपतेव्व्रतान्यनुंमेदीक्षान्दीक्षापंतिरमꣳ
स्तानुतपस्त्तपंस्प्पातिः ॥ ४० ॥ [६-९] उरुव्विंष्ण्णो ॥ उरुव्विं
ष्ण्णोव्विक्रंमस्वोरुक्षयांयनस्कृधि ॥ घृतङ्घृंतयोनेपिबप्प्रप्प्रंयज्ञ
पंतिन्तिरस्वाहा ॥ ४१ ॥ अत्त्यन्न्यान् ॥ अत्त्यन्न्याँ २ ॥
ऽअगान्नान्न्याँ २ ॥ ऽउपांगामर्व्वाक्त्वापरेब्भ्योविंदम्परोवंरे १६१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥४१॥ ॥५॥

ळभ्यहं ॥ तन्त्वाजुषामहेदेवव्वनस्प्पतेदेवयुज्ज्यायैदेवास्त्त्वान्देव
यज्ज्यायैजुषन्ताँव्विष्ष्णवेत्त्वा ॥ ओषधेत्त्रायस्वस्वधितेमैनँ
हिँसीः ॥ ४२ ॥ द्याम्मा ॥ द्याम्मालेखीरन्तरिँक्षम्माहिँ
सीःपृथिव्यासम्भव ॥ अयँहित्त्वास्वधितिस्त्तेतिजानःप्प्रणि
नायमहतेसौभगाय ॥ अतस्त्त्वन्देवव्वनस्प्पतेशतवल्शोव्वि
रोहसहस्रवल्शाव्वियँरुहेम ॥ ४३ ॥ [३-१०१] ॥ ॥४१॥
इति श्रीवाजसनेयसंहितायां पंचमोऽध्यायः ॥ ५ ॥ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ देवस्यत्त्वाषड्, पावी
रसिपंच, माहिःषट्, संतेतिस्रः, समुद्रंगच्छ, हविष्मतीरिमा
द्विकौ, हृदेत्वापंच, देवस्यत्वाष्टौ, अष्टौ सप्तत्रिंशत् ॥
[अ. ६ मं. ३७ अनु. ८] हरिः ॐ॥ देवस्यंत्त्वा। सवितुःप्प्रंसवे
श्विनोर्ब्बाहुब्भ्यांम्पूष्णणोहस्त्ताब्भ्याम् ॥ आददेनार्य्यसीदम्
हꣳरक्षंसाङ्ग्रीवाऽअपिकृन्तामि ॥ यवोसियवयास्म्मद्द्वेषोयव ११
यारांतीर्द्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्यैत्त्वाशुन्धंन्ताँल्लोकाः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ २ ॥ अर्त्थैतंस्त्थ । राष्ट्रदाराष्ट्रम्मैदत्तस्वाहार्त्थैतंस्त्थराष्ट्र

दाराष्ट्रममुष्म्मैदत्तौजंस्वतीस्त्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहौजंस्व

तीस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तापं÷परिवाहिणींस्त्थराष्ट्रदाराष्ट्र २४७

म्मैदत्तस्वाहापं÷परिवाहिणींस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तापा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म्पातिंरसिराष्ट्रदाराष्ट्रम्मैदेहिस्वाहापाम्पातिंरसिराष्ट्रदाराष्ट्रममु
ष्म्मैदेह्यपाङ्गभौंसिराष्ट्रदाराष्ट्रम्मैदेहिस्वाहापाङ्गभौंसिराष्ट्र
दाराष्ट्रममुष्म्मैदेहिसूर्य्यत्त्वचसस्त्थ ॥ ३ ॥ सूर्य्यत्त्व
चसस्त्थ । राष्ट्रदाराष्ट्रम्मैदत्तस्वाहासूर्य्यत्त्वचसस्त्थराष्ट्रदा
राष्ट्रममुष्म्मैदत्तसूर्य्यवर्च्चसस्त्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहासूर्य्य
वर्च्चसस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तमान्दांस्त्थराष्ट्रदाराष्ट्रम्मैदत्त
स्वाहामान्दांस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तव्रजाक्षितांस्त्थराष्ट्रदा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राष्ट्रम्मेदत्तस्वाहाव्रजक्षितस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तवाशा
स्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहावाशास्त्थराष्ट्रदाराष्ट्रममुष्मैदत्त
शविष्ठास्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाशविष्ठास्त्थराष्ट्रदाराष्ट्रम
मुष्मैदत्तशक्वरीस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाशक्वरीस्त्थराष्ट्र
दाराष्ट्रममुष्मैदत्तजनभृतस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाजनभृ
तस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तविश्वभृतस्त्थराष्ट्रदाराष्ट्रम्मेदत्त २४१
स्वाहाविश्वभृतस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तापःस्वराजस्त्थरा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ष्टूदाराष्ट्रममुष्म्मैदत्त ॥ मधुमतीर्म्मधुमतीभिः पृच्यन्ताम्महि
क्षत्रङ्क्षत्रियायवन्वानाऽअनाधृष्टाः सीदतसहौजंसोमहिक्षत्रङ्क्ष
त्रियायदधंतीः ॥ ४ ॥ [४-१] शतम् ॥ ४०० ॥ सोमस्यत्त्वि
षिः ॥ सोमस्यत्त्विषिरसितवैवमेत्त्विषिर्भूयात् ॥ अग्नयेस्वा
हासोमायस्वाहासवित्रेस्वाहासरस्वत्यैस्वाहापूष्णेस्वाहाबृह
स्पतयेस्वाहेन्द्रायस्वाहाघोषायस्वाहाश्लोकायस्वाहाशाय
स्वाहाभगायस्वाहार्य्यम्णेस्वाहा ॥ ५ ॥ पवित्रेस्त्थः ॥ पवि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रैस्त्थोव्वैष्णण्व्यौसावितुर्व्वैः प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेणपवि
त्रैणसूर्य्यस्यरश्मिम्भिः ॥ अनिभृष्टमसिव्वाचोबन्धुस्तपो
जाश्सोमस्यदात्रमसिस्वाहाराजस्वः ॥ ६ ॥ सधमादोद्युम्मिन्न
नीः ॥ सधमादोद्युम्मिन्ननीरापऽएताऽअनाधृष्टाऽअपस्योव्वसा
नाः ॥ पस्त्यासुचक्क्रेव्वरुणःसधस्त्थमपाᳬशिशुर्म्मातृतमा
स्वन्तः ॥ ७ ॥ क्षत्रस्योल्वम् ॥ क्षत्रस्योल्वमासिक्षत्रस्यजरा
य्व्वसिक्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसीन्द्रस्यव्वार्त्रघ्नमसिमि २५१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रस्यांसिव्वरुणस्यासित्त्वयायंव्वृत्रंव्वधेत् ॥ दृबासिंरुजासिंक्षु
मासिं ॥ पातैनम्प्राञ्चम्पातैनम्प्रत्त्यञ्चम्पातैनंन्तिर्य्यञ्चंन्दि
ग्ग्भ्यःपांत ॥ ८ ॥ आविर्म्मर्य्याः ॥ आविर्म्मर्य्याऽआ
विंत्तोऽअग्निर्गृहपतिराविंत्तऽइन्द्रोव्वृद्धश्श्रंवाऽआविंत्तौमित्रा
वरुणौधृतव्रंतावाविंत्तःपूषाव्विश्श्ववैदाऽआविंत्तेद्यावापृथिवीव्वि
श्श्वशंम्भुवावाविंत्तादिंतिरुरुशंम्मा ॥ ९ ॥ [५-२] अवेष्टा

दन्दशूकाः ॥ अवेष्टादन्दशूकाःप्प्राचीमारोहगायत्रीत्त्वांव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तुरथन्तरꣳसामांत्रिवृत्त्स्तोमौव्वसन्तऽऋतुर्ब्रह्मद्द्रविणन्दक्षिणा
मारोह ॥ १० ॥ दक्षिणामारोह । त्रिष्टुप्प्त्वांवतुबृहत्त्सामंपञ्चद
शस्त्तोमौग्ग्रीष्म्मऽऋतुःक्षत्त्रन्द्रविणम्प्रतीचीमारोह ॥ ११ ॥
प्रतीचीमारोह । जगंतीत्त्वावतुव्वैरूपꣳसामंसप्तदशस्त्तोमौ
व्वर्षाऽऋतुर्व्विड्द्रविणमुदीचीमारोह ॥ १२ ॥ उदीचीमारोहा ।
नुष्टुप्प्त्वांवतुव्वैराजꣳसामैकविꣳशस्त्तोमः शरद्दृतुःफलन्द्रविं २५३
णमूर्द्ध्वामारोह ॥ १३ ॥ ऊर्द्ध्वामारोह । पङ्क्तिस्त्त्वांवतुशाक्कर

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रैवतेसामंनीत्रिणवत्त्रयास्त्रिंशौस्तोमौहेमन्तशिशिरावृतूवर्च्चो
द्द्रविणम्प्रत्त्यंस्त्तन्नमुंचेश्शिरं॑ ॥ १४ ॥ सोमंस्युत्त्विषिं॑ ॥
सोमंस्युत्त्विषिंरसितवैवमेत्त्विषिंर्भूयात् ॥ मृत्त्योश्पाह्योजोंसिसहोस्यमृतंमसि ॥ १५ ॥ हिरंण्ण्यरूपाऽउषसं॑ ॥
हिरंण्ण्यरूपाऽउषसोंविरोकऽउभाविन्द्राऽउदिंथश्सूर्य्यश्श्च ॥
आरोंहतंव्वरुणमित्त्रगर्त्तन्ततश्श्चक्षाथामदिंतिन्दितिंञ्चमित्त्रोसि
व्वरुणोसि ॥ १६ ॥ [७-३] सोमंस्यत्त्वा । द्युम्न्नेन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भिषिञ्चाम्म्युग्ग्नेर्ब्भ्राजंसासूर्य्यस्युवर्च्चसेन्द्रस्येन्द्रियेण ॥ क्षत्रा
णांक्षत्रपतिरेस्यातिदिद्यून्पाहि ॥ १७ ॥ इमन्देवाः ॥ इम
न्देवाऽअसपत्नᳯ सुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहते
जानराज्ज्यायेन्द्रस्येन्द्रियाय ॥ इममुमुष्ष्यपुत्रममुष्ष्यैपुत्र
मस्यैविशऽएषवोमीराजासोमोस्म्माकम्ब्राह्मणानाᳯ राजा
॥ १८ ॥ प्रपर्वतस्य । वृषभस्यपृष्ठान्नावश्चरन्तिस्वसिचऽइया
नाः ॥ ताऽआवंवृत्रन्नधराागुदक्ताऽअहिम्बुद्ध्न्यमनुरीयमा

२५५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

णाꣳ ॥ व्विष्ण्णोर्व्वि॒क्क्रम॑णमसि॒व्विष्ण्णो॒र्व्विक्क्रा॑न्तमसि॒व्विष्ण्णोꣳ
क्क्रान्तम॑सि ॥ १९ ॥ प्रजा॑पते॒न । त्त्वदे॒तान्न्य॒न्न्योव्विश्श्वा॑रू॒पा
णि॒परि॒ताब॑भूव ॥ यत्त्का॑मास्त्तेजुहु॒मस्त्तन्नो॑ऽअस्त्त्व॒यम॒मु
ष्ष्या॑पि॒तासा॒वस्स्यापि॒ता॒व्व॒यꣳस्स्या॑म॒पत॑योर॒यी॒णाꣳस्वाहा॑ ॥ रुद्द्र॒
यत्ते॒क्क्रिवि॒पर॒न्नाम॒तस्स्मि॑न्हुतम॑स्यमे॒ष्टम॑सि॒स्वाहा॑ ॥ २० ॥
[४-४] इन्द्द्र॑स्य॒व्वज्ज्र॑÷ ॥ इन्द्द्र॑स्य॒व्वज्ज्रो॑सि॒मि॒त्त्रावरु॑णयोस्त्त्वा
प्प्रशा॒स्त्त्रोः प्प्र॒शिषा॑यु॒नज्ज्मि ॥ अ॒ध्व॑थायै॑त्त्वास्स्व॒धायै॑त्त्वारि॑ष्ट्टोऽ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्ज्जुनोमरुतांम्प्रसवेनंजयापामनंसासमिंन्द्रियेण ॥ २१ ॥
मातें ॥ मातंऽइन्द्रतेव्वयन्तुंराषाडयुंक्तासोऽअब्ब्रह्मताव्वि
दंसाम ॥ तिष्ठारथमधियंव्वज्ज्रहस्त्तारश्म्मीन्देवयमसेस्व
श्श्वान् ॥२२॥ अग्नयेगृहपंतये ॥ अग्नयेगृहपंतयेस्वाहासोमाय
व्वनस्प्पतंयेस्वाहांमरुतामोजंसेस्वाहेन्द्रंस्येन्द्रियायस्वाहा ॥
पृथिविमातर्म्मामांहिꣳसीर्म्मोऽअहन्त्वाम् ॥ २३ ॥ हꣳसश्शु
चिषत् ॥ हꣳसश्शुंचिषद्वसुंरन्तरिक्षसद्धोतांव्वेदिषदतिंथिर्द्दुरोण

१ तिष्ठारथेन । अत्र तिष्ठाद्युदात्तम् (शु. य. प्रा. ३ अ. १०४ सू.) इत्यनेन तिष्ठेत्येतत्पदे आद्युदात्ते तस्याकारस्य दीर्घो भवति । अतो दीर्घाकारः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥९०॥ सत् ॥ नृषद्वरसद्वृतसद्व्योमसदब्जागोजाऽऋृतजाऽअद्रिजाऽ
ऋृतम्बृहत् ॥ २४ ॥ इयदसि ॥ इयदस्यायुरस्यायुर्म्मयिधेहि
युङ्ङसिवर्च्चोसिवर्च्चोमयिधेह्यूर्ग्गस्यूर्ज्जम्मयिधेहि ॥ इन्द्रस्यवां
वीर्य्यकृतोबाहूऽअभ्युपावहरामि ॥ २५ ॥ [५-५] स्योनासि ।
सुषदासिक्षत्रस्ययोनिरसि ॥ स्योनामासीदसुषदामासीदक्षत्र
स्ययोनिमासीद ॥ २६ ॥ निषसाद[1] । धृतव्रतोवरुणःपस्त्यास्वा ॥ ॥ ९० ॥
साम्म्राज्यायसुक्रतुः ॥ २७ ॥ अभिभूरसि ॥ अभिभूरस्येता

१ निषसाद । अत्र नि ससाद इति पदम् ससाद च (शु. य. प्रा. ३ अ. ६० सू.) इत्यनेन नेः परस्य ससादशब्दस्य सकारस्य षकारे निषसादेति रूपम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्तेपञ्च्चदिशं÷कल्प्पन्ताम्ब्रह्मँस्त्त्वम्ब्रह्मासिसवितासिसत्त्य
प्प्रंसवोव्वरुणोसिसत्त्यौजाऽइन्द्रोसिव्विशौजारुद्रोसिसुशेवं÷ ॥
बहुंकार[1]श्श्रेयंस्कर भूयंस्करेन्द्रंस्यव्वज्ज्रोसितेनंमेरध्य ॥ २८ ॥
अग्निः पृथुः ॥ अग्निः पृथुर्द्धर्म्मंणस्प्पतिंर्ज्जुषाणोऽअग्निः पृ
थुर्द्धर्म्मंणस्प्पतिराज्ज्यंस्यव्वेतुस्वाहास्वाहांकृताᳬसूर्य्यंस्यरश्मिम
भिर्य्यंतद्धᳬसजातानांम्मध्यमेष्ठ्यांय ॥ २९ ॥ [४-६] सवि
त्राप्प्रंसवित्रा । सरंस्वत्त्याव्वाचात्त्वष्ट्रांरूपैः पूष्णणापशुभिरिन्द्रे

२५१

सं. १६

[1] श्रेयस्करभूयस्कर इत्यत्र समानपदे च (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन ककारपकारपरयोः यथायोगं समानपदे सकारः षकारश्च विधीयते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

णास्म्मैबृहस्प्पतिंनाब्ब्रह्मणाव्वरुणेनौजसाग्ग्निनातेजसासोमेँ
नराज्ञाव्विष्ण्णुनादशम्म्यादेवतयाप्प्रसूतंप्प्रसर्प्पामि ॥ ३० ॥
[१-७] अश्श्विभ्याम्पच्च्यस्व ॥ अश्श्विभ्याम्पच्च्यस्वसरस्व
त्त्यैपच्च्यस्वेन्द्रायसुत्राम्म्णेपच्च्यस्व ॥ व्वायुश्पूतश्पवित्त्रेणप्प्र
त्त्यङ्[1]क्सोमोऽअतिस्स्रुतः ॥ इन्द्रस्ययुज्ज्यःसखा ॥ ३१ ॥ कुवि
दङ्ग । यवमन्तोयवञ्चिद्यथादान्त्त्यनुपूर्व्वंव्वियूय ॥ इहेहैषाङ्कृणु

१ प्रत्यङ्क्सोमः । अत्र प्रत्यङ् सोम इति पदम् । ङ्नौ काभ्यां सकारे (शु. य. प्रा. ३ अ. १५ सू.) ङकारनकारौ यथासंख्यं ककारतकाराभ्यां सकारे परे व्यवधीयेते । तेनात्र ङकारात्परस्य ककारे रूपम् । लोपागमविकारप्रकृतिभावानां चतुर्णां सन्धीनां मध्येऽयमागमाख्यः सन्धिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिभोजंनानियेबर्हिषोनमंऽउक्तिँय्यजन्ति ॥ उपयामगृंहीतो
स्यश्विभ्यान्त्वासरंस्वत्त्यैत्त्वेन्द्रांयत्त्वासुत्राम्म्णे ॥ ३२॥ युवꣳ
सुरामंम् ॥ युवꣳसुरामंमश्विनानमुंचावासुरेसचा ॥ विपिपा
नाशुंभस्प्पतीऽइन्द्रङ्कर्म्मस्वावतम् ॥ ३३ ॥ पुत्रमिवपितरौ ॥
पुत्रमिवपितरावश्विनोभेन्द्रावथुःकाव्यैर्द्दꣳसनाभिः ॥ यत्सु
रामंव्यपिबःशचीभिःसरंस्वतीत्त्वामघवन्नभिष्णक् ॥ ३४ ॥ २६१
[४-८] इतिश्रीवाजसनेयसंहितायांदशमोऽध्यायः ॥ १० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य.
संहि.
॥९२॥

श्रीवेदपुरुषायनमः। अनुवाकसूत्रम्। युञ्जानएकादश, प्रतूर्त्तं पू. अ.
व्वाजिन्षोडश, देवस्यत्वादशा, पोदेवीर्द्वादशा, पोह्येकादशा, ॥ ११ ॥
दितिश्चापञ्चा, कूतिमग्निमष्टादश, सप्तत्र्यशीतिः॥ [अ. ११
मं. ८३ अनु० ७]॥ हरिःॐ॥ युञ्जानःप्प्रंथमम्॥ युञ्जानः
प्प्रंथमम्मनंस्तत्त्वायंसविताधियंः॥ अग्ग्नेर्ज्योतिर्न्निचाय्यं
पृथिव्याऽअद्ध्याभंरत्॥१॥ युक्तेनमनंसा। व्वयन्देवस्यंसवितुः ॥९२॥
सवे॥ स्वर्ग्यायशक्त्यां॥ २॥ युक्त्वायंसविता। देवान्त्स्वं २६२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

र्य्युतोधियादिवम् ॥ बृहज्ज्योतिः करिष्ष्यतः सविताप्प्रसुवाति
तान् ॥ ३ ॥ युञ्जतेमनः ॥ युञ्जतेमनऽउतयुञ्जतेधियोव्विप्प्रा
व्विप्प्रंस्यबृहतोव्विपश्चितः ॥ व्विहोत्त्रांदधेव्वयुनाविदेकऽइन्महीदेवस्यंसवितुःपरिष्टुतिः ॥ ४ ॥ युजेवांम् ॥ युजेवाम्ब्रह्मपूर्व्यन्नमोभिर्व्विश्श्लोकऽएतुपत्थ्येवसूरेः ॥ शृण्वन्तुव्विश्श्वेऽअमृतस्यपुत्त्राऽआयेधामानिदिव्व्यानितस्थुः ॥ ५ ॥ यस्यप्प्रयाणंम् ॥
यस्यंप्प्रयाणमन्न्वन्न्यऽइद्ययुर्देवादेवस्यंमहि[illegible]नमोजंसा ॥ २५२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि.

॥ ९३ ॥

यःपार्त्थिवानिव्विममेसऽएतशोरजाꣳसिदेवःसवितामहित्त्व
ना ॥ ६ ॥ देवसवितः ॥ देवसवितःप्प्रसुवयज्ञम्प्रसुवयज्ञपति
म्भगाय ॥ दिव्व्योगन्धर्व्वःकेतपूःकेतन्नःपुनातुव्वाचस्प्पतिर्व्वा
चन्नःस्वदतु ॥ ७ ॥ इमन्नः ॥ इमन्नोदेवसवितर्य्यज्ञम्प्रणय[1]
देवाव्यꣳसखिविदꣳसत्राजितन्धनजितꣳस्वर्जितम् ॥ ऋचा
स्तोमꣳसमर्द्धयगायत्रेणरथन्तरम्बृहद्गायत्रवर्त्तनिस्वाहा ॥ ८ ॥

पू. अ. ॥ ११ ॥

॥ ९३ ॥

---

१ प्रणय। अत्र प्र नय इति पदम्। अत्र समानपदाभावेन ऋषरेभ्यः इत्यस्याप्राप्तौ प्रनेतिनुदातिहिनोमीनाम् (शु. य. प्रा॰ ३ अ. ८९ सू.) इत्यनेन प्रपूर्वाणां नेति नुदाति हिनोमि इत्येषां नकारस्य णकारो विधीयते तेनात्र प्रणय इत्यत्र णत्वम्। सूत्रे [illegible] न णत्वम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवस्यंत्त्वा । सवितुश्प्प्रंसवेऽश्विनोर्ब्बाहुब्भ्यांम्पूष्ष्णोहस्त्ताब्भ्या
म् ॥ आदंदेगायत्त्रेणच्छन्दंसाङ्गिरस्वत्पृंथिव्व्याःसधस्त्थांदुग्निं
म्पुरीष्ष्यमाङ्गिरस्वदाभंरत्त्रैष्टुंभेन[1]च्छन्दंसाङ्गिरस्वत् ॥ ९ ॥
अभ्भ्रिरसि ॥ अभ्भ्रिरसिनार्य्यसित्त्वयांव्वयमग्निᳪशंकेमखं
नितुᳪसधस्त्थऽआ ॥ जागंतेनच्छन्दंसाङ्गिरस्वत् ॥ १० ॥
हस्त्तंऽआधायं । सविताबिभ्भ्रंदभ्भ्रिᳪहिरण्ण्ययींम् ॥ अग्ग्ने

१ त्रैष्टुभेन। अत्र ऋषरेभ्यो नकारो णकारᳪ समानपदे (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन समानपदे स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ८६ सू.) इत्यनेन व्यवधानेऽपि विहितस्य प्राप्तस्य णत्वस्य शिलिसिवर्गमध्यमव्यवहितोऽपि (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन शकारलकारसकार (मध्यमवर्ग) चवर्गटवर्गतवर्गव्यवधानेषु ऋषरेभ्यः परस्य नकारस्य प्रकृतिभावादत्र णत्वं निषिध्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. ज्योतिर्न्निचाय्यंपृथिव्याऽअध्याभरदानुष्टुभेनुच्छन्दसाङ्गिर पू. अ.
संहि.
॥९४॥ स्वत् ॥ ११ ॥ [११-१] प्रतूर्त्तंव्वाजिन् ॥ प्रतूर्त्तंव्वाजिन्नाद्रवव्वरिं ॥ ११ ॥
ष्ठामनुंसंव्वतम् ॥ दिवितेजन्मपरममन्तरिक्षेतवनाभिः पृथि
व्यामधियोनिरित् ॥ १२ ॥ युञ्जाथाँरासभम् ॥ युञ्जाथाँ
रासभंयुवमस्मिन्यामेवृषण्वसू ॥ अग्निम्भरन्तमस्मयुम्
॥ १३ ॥ योगेयोगेतवस्तरम् ॥ योगेयोगेतवस्तरंव्वाजेवाजे ॥ ९४ ॥
हवामहे ॥ सखायऽइन्द्रमूतये ॥ १४ ॥ प्रतूर्व्वन्नेहि ॥ प्रतूर्व्व २६६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नेह्यंवक्राम्मुन्नशंस्त्तीरुद्रस्यगाणंपत्त्यम्मयोभूरेहि॥ उर्व्वन्तरीक्षं
वीहिस्स्वस्त्तिगंव्यूतिरभंयानिकृण्णवन्त्पूष्णणासयुजांसह ॥१५॥
पृथिव्याःसधस्त्थांत्॥ पृथिव्याःसधस्त्थांदग्ग्निम्पुंरीष्यमङ्गि
रस्वदाभंराग्ग्निम्पुंरीष्यमाङ्गिरस्वदच्छेमोग्ग्निम्पुंरीष्यमङ्गिर
स्वद्भंरिष्यामः ॥ १६ ॥ अन्वग्ग्निः ॥ अन्वग्ग्निरुषसामग्ग्रं
मक्ख्यदन्वहांनिप्प्रथमोजातवेदाः ॥ अनुसूर्य्यस्यपुरुत्राचं
रश्मीननुद्यावांपृथिवीऽआततन्थ ॥१७॥ आगत्त्यंव्वाजी ॥ २६७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आगत्त्यंव्वाज्ज्यद्ध्वानꣳसर्व्वामृधोव्विधूनुते ॥ अग्निꣳसधस्त्थे

महतिचक्षुषानिचिकीषते ॥ १८ ॥ आक्क्रम्म्यंव्वाजिन् ॥ आक्क्र

म्म्यंव्वाजिन्न्पृथिवीमग्निमिच्छरुचात्त्वम् ॥ भूम्म्यांवृत्त्वाय

नोब्ब्रूहियतꣳखनेमतंव्वयम् ॥ १९ ॥ द्यौस्त्ते । पृष्ठम्पृथिवी

सधस्त्थमात्त्मान्तरिक्षꣳसमुद्द्रोयोनिः ॥ व्विक्ख्यायचक्षु

षात्त्वमभितिष्ठपृतन्न्यतः ॥ २० ॥ उत्क्राम । महतेसौभगाय

स्म्मादास्त्थानाद्द्रविणोदाव्वाजिन् ॥ व्वयꣳस्यामसुमतौपृथि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ष्याऽअग्निङ्क्नंन्तऽउपस्त्थैऽअस्याः॥२१॥उदंक्कमीत्॥ उदंक्क
मीद्द्रविणोदाव्वाज्ज्यर्व्वाकः सुलोकं सुकृतम्पृथिव्याम्॥ ततः
खनेमसुप्प्रतीकमग्निं स्वोरुहांणाऽअधिनाकमुत्तमम्॥२२॥
आत्त्वां।जिघर्म्मिमनंसाघृतेनंप्प्रतिक्षियन्तम्भुवंनानिव्विश्श्वां॥
पृथुन्तिरश्श्चावयंसाबृहन्तंव्यचिष्ठमन्नैरभसन्दृशानम्॥२३॥
आविश्श्वतः।प्प्रत्त्यञ्चञ्जिघर्म्म्यरक्षसामनंसातज्जुषेत॥मर्य्य
श्श्रीस्प्पृहयद्वंण्णोंऽअग्निर्न्नाभिमृशैतन्वाजर्ब्भुराणः॥२४॥ २६१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिवाजंपतिꣳ ॥ परिवाजंपतिꣳकविरग्निर्हव्यान्यक्रमीत् ॥
दधद्रत्नानिदाशुषे ॥ २५ ॥ परित्त्वा । ग्नेपुरंव्वयंव्विप्प्रꣳसह
स्यधीमहि ॥ धृषद्वर्णन्दिवेदिवेहन्तारम्[2]भङ्गुरावताम् ॥ २६ ॥
त्वमग्ने ॥ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वम
श्म्मनस्प्परि ॥ त्वंव्वनेब्भ्यस्त्वमोषधीब्भ्यस्त्वन्[3]नृणान्नृपतेजा

---

१ परिवाजपतिः कविः । अत्र कविष्करत्कृधिपु (शु. य. प्रा. ३ अ. ३२ सू.) इत्यनेन कविपरे पतिशब्दस्य विसर्गस्य षकारे प्राप्ते वाजपतिर्वासऽएदिधिषुरन्तःपर्शव्येनान्तःपार्श्वमिति च (शु. य. प्रा. ३ अ. ३८ सू.) इत्यनेन सकारषकारयोर्निषेधाद्विसर्जनीय एव । २ भङ्गुरावताम् । अत्र अश्वरश्मिमतिसुमति (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे भङ्गुरशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । ३ नृणाम् । अत्र ऋषरेभ्यो नकारो णकारं समानपदे (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन समानपदे ऋकात्परस्य नकारस्य णत्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यसेशुचिं ॥ २७ ॥ [१६-२] देवस्यंत्त्वा । सवितुः प्प्रंस
वेश्श्विनोर्ब्बाहुब्भ्यांम्पूष्णणोहस्त्ताब्भ्याम् ॥ पृथिव्व्याःसधस्त्थां
दग्निम्पुंरीष्ष्यमङ्गिरस्वत्त्खंनामि ॥ ज्योतिष्ष्मन्तन्त्वाग्ग्ने
सुप्प्रतीकमजंस्त्रेणभानुनादीद्द्यंतम् ॥ शिवम्प्रजाब्भ्योहिंᳬ
सन्तम्पृथिव्व्याःसधस्त्थांदग्निम्पुंरीष्ष्यमङ्गिरस्वत्त्खंनामᳬ
॥ २८ ॥ अपाम्पृष्ठम् ॥ अपाम्पृष्ठमंसियोनिरग्ग्नेःसंमुद्द्रम २७१
भितᳬपिन्न्वंमानम् ॥ वर्द्धमानोमहाँ२॥ ऽआचपुष्क्करेदिवो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मात्रेंयाव्वारिम्मणाप्प्रंथस्व ॥ २९ ॥ शर्म्मंच ॥ शर्म्मंचुस्त्थो
व्वर्म्मंचुस्त्थोच्छिद्द्रेबहुलेऽउभे ॥ व्यचंस्वतीसंव्वंसाथाम्भृतम्
ग्निम्पुरीष्ष्यम् ॥ ३० ॥ संव्वंसाथाम् ॥ संव्वंसाथाꣳस्वर्व्विदा
समीचीऽउरसात्क्मनां ॥ अग्निमन्तर्ब्भरिष्ष्यन्तीज्ज्योति
ष्ष्मन्तमजंस्रमित् ॥ ३१ ॥ पुरीष्ष्योसि । व्विश्वभंराऽअथ
र्व्वात्त्वाप्प्रथमोनिरंमन्थदग्ने ॥ त्वामग्ग्नेपुष्क्करादध्ध्यथर्व्वानिर
मन्थत ॥ मूर्द्ध्नोव्विश्श्वंस्यव्वाघतंः ॥ ३२ ॥ तमुंत्त्वा । दध्ध्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ङ्कऋषिं÷पुत्रऽईंधेऽअथर्व्वणꣳ ॥ वृत्रहणंम्पुरन्दुरम् ॥ ३३ ॥
तमुंत्त्वा । पात्थ्योवृषासमींधेदस्युहन्तंमम् ॥ धनञ्जयꣳरणे
रणे ॥ ३४ ॥ सीदंहोतꣳ ॥ सीदंहोतꣳस्वऽउंलोकेचिंकित्त्वा
न्त्सांदयांयुज्ञꣳसुंकृतस्ययोनौं ॥ देवावींर्द्देवान्हविषांयजास्य
ग्ग्नेबृहद्यजंमानेव्वयोंधाꣳ ॥ ३५ ॥ निहोतां । होतृषदंनेव्वि
दांनस्त्त्वेषोदींदिवाँ२॥ऽअंसदत्त्सुदक्षं÷ ॥ अदंब्धव्व्रतप्प्रम
तिर्व्वसिंष्ठꣳसहस्रम्भरःशुचिंजिह्वोऽअग्ग्निः ॥ ३६ ॥ सꣳसी २७३

१ सादय यज्ञम्। इति पदम्। अत्र अयोदारियशोचपनय सादयर्जु० (य. शु. प्रा. ३ अ. ११३ सू.) इत्यनेन यकारे परे दीर्घविधानात्। सादयायज्ञम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दस्व । महाँ २॥ऽअसिशोचस्वदेववीतमः ॥ विधूममग्नेऽअरुष
म्मियेध्यसृजप्प्रशस्त्तदर्शतम् ॥ ३७ ॥ [१०-३] अपोदेवीः ॥
अपोदेवीरुपसृजमधुमतीरयक्ष्माय्यप्प्रजाब्भ्यः ॥ तासामा
स्त्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥ ३८ ॥ सन्ते । वायु
र्म्मातरिश्श्वादधातूत्तानायाहृदयँय्यद्विकस्त्तम् ॥ योदेवानाञ्चर
सिप्प्राणथेनकस्म्मैदेवववषडस्त्तुतुब्भ्यम् ॥ ३९ ॥ सुजातोज्ज्यो
तिषा । सहशर्म्मवरूथमासदत्स्वः ॥ वासोऽअग्नेविश्श्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रूपद्दृ॑ संव्यय॑स्वा॒विभावसो ॥४०॥ उद्दु॑तिष्ठ । स्वध्व॒रावा॑नो[1]दे॒व्या धि॒या ॥ दृ॒शेच॒भा॒सा॑बृ॒ह॒तासु॑शु॒क्कानि॒राग्ने॑या॒हिसु॒श॒स्ति॒ताभि॑ः ॥४१॥ ऊर्द्ध्वऽऊषुण॑ः ॥ ऊर्द्ध्व[2]ऽऊषुणऽऊतये॒तिष्ठा[3]दे॒वो नस॑वि॒ता ॥ ऊर्द्ध्वो॒वाज॑स्य॒सनि॑ता॒यद॒ञ्जिभि॑र्वा॒घाद्भि॑र्वि॒ह्वया॑मह ॥४२॥ सजा॒तः ॥ सजा॒तो॒गर्भो॑ऽअसि॒रोद॑स्यो॒रग्ने॒चारु॒र्वि भृ॑तऽओष॑धीषु ॥ चि॒त्रःशिशु॒ःपरि॒तमा॑ᳪस्य॒क्तूप्र॒मा॒तृभ्यो॒ऽ

१ अवानोधिया । अत्र अवोपसर्गस्य ह्रस्वाकारस्य नोपरे धारययोजाव० (य. शु. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घाकारः । २ ऊर्द्ध्वऽऊषुणः ऊर्द्ध्व ऊ सुनः इत्यत्र ऊश्चापृक्तात् (शु. य. प्रा. ३ अ. ६२ सू.) इत्यनेन अपृक्तसंज्ञादूकारात्परः सकारः षत्वमापद्यते तेन सस्य षकारः । ३ तिष्ठादेवः । अत्र तिष्ठाद्युदात्तम् (शु. य प्रा. ३ अ. १०४ सू.) इत्यनेन यदि तिष्ठेत्येवत्पदं आद्युदात्तं भवेत्तदा दीर्घत्वं प्राप्नोति । अत्र तिष्ठेत्येवस्याद्युदात्तत्वाद्दीर्घः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि. अधिकनिक्क्रदद्दाः ॥ ४३ ॥ स्थिरोभव । व्वीड्वङ्गऽआशुर्ब्भव पू. अ.
व्वाज्यर्व्वन् ॥ पृथुर्ब्भव सुषदस्त्वमग्ग्नेः पुरीषवाहणः[1] ॥ ४४ ॥ ॥ ११ ॥
॥९९॥ शिवोभव । प्रजाब्भ्योमानुषीब्भ्यस्त्वमङ्गिरः ॥ माद्यावा
पृथिवीऽअभिशोचीर्म्मान्तरिक्षम्माव्वनस्प्पतीन् ॥ ४५ ॥ प्रैतु ।
व्वाजीकनिक्क्रदन्नानदद्द्रासभः पत्त्वा ॥ भरन्नग्ग्निम्पुरीष्ष्यम्मा
पाद्यायुषः पुरा ॥ व्वृषाग्ग्निंव्वृषणम्भरन्नपाङ्गर्ब्भꣳसमुद्द्रियम् ॥ ॥९९॥
२७६

१ पुरीषवाहणः । अत्र ऋषरेभ्यो नकारो णकारं समानपदे (शु. य. प्रा. ३ अ. ८५ सू.) इत्यप्राप्तौ स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन ऋषरेभ्यो स्वरयवहकवर्गपवर्गव्यवधानेष्वपि णत्वविधानादत्र वाहनशब्दस्य नस्य णत्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अग्न॒ऽआयांहिव्वीतये ॥ ४६ ॥ ऋतꣳसत्त्यम् ॥ ऋतꣳस॒
त्त्यमृतꣳस॒त्त्यम॒ग्निम्पु॒रीष्य॒माङ्गिर॒स्वद्भरामः ॥ ओष॑धय॒ः
प्प्रति॑मोदद्ध्व॒म॒ग्निमे॒तꣳशि॒वमा॒यन्तम॒भ्ययत्रं॒सु॒ष्मा॑ः ॥ व्यस्य॒
न्विश्श्वा॒ऽअनि॑रा॒ऽअमी॑वानि॒षीदन्नो॒ऽअपदुर्म्म॒तिञ्जहि ॥४७॥
ओष॑धय॒ः प्प्रति॑ । गृभ्णीत॒पुष्प॑वती॒ः सुपिप्प॒लाः ॥ अ॒यंव्वो
गर्ब्भऽऋ॒त्त्वियं॒ः प्प्र॒त्नꣳस॒धस्त्थमासदत् ॥ ४८ ॥ व्विपाजसा ।
पृ॒थुना॒शोशु॒चानो॒बाध॑स्वद्द्वि॒षोर॒क्षसो॒ऽअमी॑वाः ॥ सु॒शर्म्म॑णो २७७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥१००॥ बृहतश्शर्म्मणिस्यामग्नेरहꣳसुहवस्यप्प्रणीतौ ॥४९॥ [१२-४]
आपोहि । ष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायच
क्षसे ॥ ५० ॥ योवः । शिवतमोरसस्तस्यभाजयतेहनः ॥
उशतीरिवमातरः ॥ ५१ ॥ तस्म्माऽअरम् ॥ तस्म्माऽअरङ्ग
मामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ ५२ ॥
मित्रश्सꣳसृज्ज्य । पृथिवीम्भूमिञ्चज्ज्योतिषासह ॥ सुजातञ्जात

---

१ हिष्ठामयः । अत्र हि स्यामयो भुवः । अत्र हेर्मिथोदयः (शु. प. प्रा. ३ अ. ५८ सू.) इत्यनेन हिशब्दात्परः मकारोदयो थकारोदयो वा सकारस्य षकारो विधीयते । तथा सति ष्ठुत्वे थकारस्य ठकारे ऊष्मान्तस्थान्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ठकारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेदसमयुक्ष्मायंत्त्वासहसृंजामिप्प्रजाब्भ्यंः ॥ ५३ ॥ रुद्द्राःसह
सृज्ज्यं । पृथिवीम्बृहज्ज्योतिंःसमींधिरे । तेषांम्भानुरजंस्त्रऽइ
च्छुक्क्रोदेवेषुंरोचते ॥५४॥ सहसंसृंष्ट्टांवसुंभिंः ॥ सहसंसृंष्ट्टांवसुंभी
रुद्द्रैर्द्धीरैंःकर्म्मंण्ण्याम्मृदंम् ॥ हस्त्तांब्भ्याम्मृद्वीङ्कृत्त्वासिंनी
वालीकृंणोतुताम् ॥ ५५ ॥ सिनीवालीसुंकपुर्द्दा । सुंकुरीरा
स्वौंपुशा ॥ सातुब्भ्यंमदितेमह्योखान्दंधातुहस्त्तंयोंः ॥ ५६ ॥
उखाङ्कृंणोतु ॥ उखाङ्कृंणोतुशक्त्यांबाहुब्भ्यामदिंतिर्द्धिया ॥ २७१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातापुत्त्रँय्यथोपस्त्थेसाग्निम्बिभर्त्तुगर्भऽआ ॥ मखस्यशि
रोसि॥५७॥ व्वसंवस्त्त्वा। कृण्ण्वन्तुगायत्त्रेणच्छन्दसाङ्गिरस्वद्ध्रु
वासिपृथिव्व्यसिधारयामयिप्प्रजाᳬरायस्प्पोषङ्गौपत्त्यᳬसुवी
र्य्यᳬसजातान्न्यजमानायरुद्द्रास्त्त्वाकृण्ण्वन्तुत्त्रैष्टुभेनच्छन्दसा
ङ्गिरस्वद्ध्रुवास्यन्तरिक्षमसिधारयामयिप्प्रजाᳬरायस्प्पोषङ्गौ
पत्त्यᳬसुवीर्य्यᳬसजातान्न्यजमानायादित्त्यास्त्त्वाकृण्ण्वन्तु ॥१०१
जागतेनच्छन्दसाङ्गिरस्वद्ध्रुवासिद्यौरसिधारयामयिप्प्रजाᳬ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रा॒यस्पोषं॑ङ्गौप॒त्त्यꣳसु॒वीर्य्य॒ꣳसजा॒तान्य॑जंमानाय॒व्विश्वें॒त्त्वा
दे॒वाव्वैं॑श्वान॒राःकृंण्व॒न्त्वानुं॑ष्टु॒भेन॒च्छन्दं॑साङ्गि॒र॒स्वद्धु॒वासि॒दि
शोंसि॒धा॒रया॒मयि॑प्प्र॒जाꣳरा॒यस्पो॒षं॑ङ्गौप॒त्त्यꣳसु॒वीर्य्य॒ꣳस
जा॒तान्य॑जंमानाय ॥ ५८ ॥ अदि॑त्त्यै॒रास्न्ना॑ ॥ अदि॑त्त्यै॒रा
स्न्ना॒स्यदि॑तिष्टे॒बिलं॑ङ्गृभ्णातु ॥ कृत्त्वा॒य॒सा॒म॒हीमु॒खाम्मृ॒न्मयी॒
य्योनिं॑म॒ग्न्नयें॥पु॒त्रेभ्य॒ꣳप्प्राय॑च्छ॒द॒दि॑तिꣳश्र॒पया॒निति॑ ॥५९॥ २८१
व्व॒सं॑व॒स्त्त्वा । धू॒पय॒न्तु॒गा॒य॒त्रेण॒च्छन्दं॑साङ्गि॒र॒स्वद्रु॒द्रास्त्त्वां॑धूप

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यन्तुत्रैष्टुंभेनुच्छन्दंसाङ्गिरुस्वदांदित्त्यास्त्त्वांधूपयन्तुजागंतेनु
च्छन्दंसाङ्गिरुस्वद्विश्वैंत्त्वादेवाव्वैंश्वानुराधूंपयन्त्वानुंष्टुंभेनुच्छ
न्दंसाङ्गिरुस्वदिन्द्रंस्त्त्वाधूपयतुव्वरुंणस्त्त्वाधूपयतुव्विष्णुंस्त्त्वा
धूपयतु ॥ ६० ॥ [११-५] अदिंतिष्ट्वा । देवीव्विश्वदेंव्यावतीपृ
थिव्याःसुधस्त्थेंऽअङ्गिरुस्वत्त्खंनत्त्ववटदेवानांन्त्वापत्क्नीर्द्देवी
र्व्विश्वदेंव्यावतीःपृथिव्याःसुधस्त्थेंऽअङ्गिरुस्वद्दंधतूखेधिषणा

१ अदितिष्ट्वादेवी । इति पदम् अत्र संधिरंशुरदितिः (शु. य. प्रा. ३ अ. ७६ सू.) इत्यनेन सन्धिः अंशुः अदितिः एतेषां विसर्जनीयसकारस्य षत्वं समानपदे विधीयते । तेनात्र अदितेर्विसर्जनीयस्य षत्वे ष्टुत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ, १०२ सू.) इति टकारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्वादेवीर्व्विश्वदेव्यावतीं पृथिव्याः सधस्थेऽअङ्गिरस्वदभी

न्धतामुखेव्वरूत्रीष्ट्वादेवीर्व्विश्वदेव्यावतीं पृथिव्याः सधस्थे

अङ्गिरस्वच्छ्रपयन्तूखेग्नास्त्वादेवीर्व्विश्वदेव्यावतीं पृथिव्याः

सधस्थेऽअङ्गिरस्वत्त्पचन्तूखेजनयस्त्वाच्छिन्नपत्रादेवीर्व्वि

श्वदेव्यावतीं पृथिव्याः सधस्थेऽअङ्गिरस्वत्त्पचन्तूखे ॥ ६१ ॥

मित्रस्यचर्षणीधृतः ॥ मित्रस्यचर्षणीधृतोवोदेवस्यसानासि ॥

---

१ वरूत्रीः त्वा इति पदम् । अत्र मातृभिरर्चिभिःपायुभिर्वरूत्रीः (शु. य. प्रा. ३ अ. ७९ सू.) इत्यनेन एकाक्षरे त्वापरे वरूत्रीः इत्यस्य विसर्जनीय-सस्य षत्वं षात्तथौमूर्धन्यम् (शु. य. प्रा. ३ अ. ८० सू.) इति मूर्धन्यत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इति द्वित्वे वरूत्रीष्ट्वा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्युम्नञ्चित्रश्श्रवस्तमम् ॥ ६२ ॥ देवस्त्त्वा । सवितोद्वपतुसुपा
णिः स्वङ्गुरिः सुबाहुरुतशक्त्या ॥ अव्यथमानापृथिव्यामाशा
दिशऽआपृण ॥ ६३ ॥ उत्थायबृहती । भवोदुतिष्ठध्रुवात्त्वम् ॥
मित्रैतान्तऽउखाम्परीददाम्म्यभित्त्याऽएषामाभेदि ॥ ६४ ॥
वसवस्त्त्वा ॥ वसवस्त्त्वाच्छृन्दन्तुगायत्रेणच्छन्दसाङ्गिरस्वद्रु
द्रास्त्त्वाच्छृन्दन्तुत्रैष्टुभेनच्छन्दसाङ्गिरस्वदादित्यास्त्त्वाच्छृ
न्दन्तुजागतेनच्छन्दसाङ्गिरस्वद्विश्वेत्त्वादेवावैश्वानराऽआच्छृ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्दुन्त्वानुंष्टुभेनुच्छन्दंसाङ्गिंरस्वत् ॥ ६५ ॥ [५-६] आकूंति

मुग्निम् ॥ आकूंतिमुग्निम्प्रयुजꣳस्वाहामनोंमेधामुग्निम्प्रयु

जꣳस्वाहांचित्तंविज्ञांतमुग्निम्प्रयुजꣳस्वाहांवाचोविधृंतिम्

ग्निम्प्रयुजꣳस्वाहांप्प्रजापंतयेमनंवेस्वाहाग्नयेंवैश्वानरायस्वा

हां ॥ ६६ ॥ विश्वोदेवस्यं । नेतुर्म्मर्त्तौवुरीतसुक्ख्यम् ॥ वि

श्वौरायऽइंषुद्ध्यतिद्युम्नंवृंणीतपुष्ष्यसेस्वाहां ॥ ६७ ॥ मासु ।

भिंत्त्थामासुरिषोम्वंधृष्णुवीरयंस्वसु ॥ अग्निश्चेदङ्कंरिष्य २८५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

थꣳ ॥ ६८ ॥ दृꣳहस्वदेवि । पृथिविस्वस्तयंऽआसुरीमाया
स्वधयांकृतासिं ॥ जुष्टन्देवेब्भ्यंऽइदमंस्तुहव्यमरिंष्टात्त्वमुदिं
हियज्ञेऽअस्मिन् ॥ ६९ ॥ द्व्वन्नꣳसर्प्पिरांसुतिꣳ । प्प्रत्नोहो
ताव्वरेंण्ण्यꣳ ॥ सहंसंस्प्पुत्त्रोऽअद्भुतꣳ ॥ ७० ॥ शतम् ॥ ५०० ॥
परंस्याऽअधिं । संव्वतोंवंराँ२॥ऽअब्भ्यातंर ॥ यत्त्राहमस्म्मि
ताँ२॥ऽअंव ॥ ७१ ॥ परमस्यां÷परावतं÷ ॥ परमस्यां÷
परावतोंरोहिदंश्वऽइहागंहि ॥ पुरीष्ष्य÷पुरुप्प्रियोग्ग्नेत्त्वन्त

१ सहसः पुत्रः इत्यत्र रायः सहसः पोषपुत्रयोः (शु.य.प्रा. ३ अ. २५ सू.) इत्यनेन रायसहसशब्दयोः सकारस्य पोषपुत्रपरयोःपरयोःक्रमेण सत्वम् । सहसस्पुत्रः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रामृधंः ॥ ७२ ॥ यदंग्ने ॥ यदंग्नेकानिकानिंचिदातेदारू
णिदुद्ध्मसिं ॥ सर्व्वन्तदंस्त्तुतेघृतन्तज्जुंषस्वयविष्ठ्य ॥ ७३ ॥
यदत्तिं ॥ यदत्त्युंपजिह्निकायद्धम्म्रोऽअंतिसर्प्पंति ॥ सर्व्वन्त
दंस्त्तुतेघृतन्तज्जुंषस्वयविष्ठ्य ॥ ७४ ॥ अहंरहरप्प्रंयावम् ॥
अहंरहरप्प्रंयावम्भरन्तोश्श्वायेवतिष्ठंतेघासमंस्म्मै ॥ रायस्प्पोषे
णसमिषामदन्तोग्ग्नेमातेप्प्रतिंवेशारिषाम ॥ ७५ ॥ नाभाप्पृ
थिव्व्याः । संमिधानेऽअग्ग्नौरायस्प्पोषांयबृहतेहंवामहे ॥ इर

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म्मुदम्बृहदुंक्क्थँस्यजंत्त्रञ्झेतारमुग्निम्पृतंनासुसासुहिम् ॥७६॥
याःसेनांः ॥ याःसेनांऽअभीत्त्वरीराव्याधिनीरुगंणाऽउत ॥
येस्त्तेनायेचुतस्कंराुस्त्ताँस्त्तेंऽअग्ग्नेपिंदधाम्म्यास्ये ॥ ७७ ॥
दꣳष्ट्राब्भ्याम्मुलिम्म्लूंन् ॥ दꣳष्ट्राब्भ्याम्मुलिम्म्लुञ्जम्भ्यै
स्त्तेंस्कंराँ२॥ऽउत ॥ हनुंब्भ्याꣳस्त्तेनान्भंगवुस्त्ताँस्त्त्वङ्खांदु
सुखांदितान् ॥ ७८ ॥ येजनैषु । मुलिम्म्लंवस्त्तेनासुस्त्तस्कं

१ तस्कराँ॥ऽउत । तत् कराॅ॥ऽउत इति पदे । अत्र तद्बृहतौ करपत्योस्तलोपश्च (शु. य. प्रा. ३ अ. ५२ सू.) इत्यनेन तच्छब्दस्य करशब्दपरे सकारे पूर्वस्य तद्घटिततकारस्य लोपे च कृते ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ककारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राव्वनें ॥ येकक्षेंष्ष्वघायवस्त्ताँस्त्तेंदधामिजम्भंयोह ॥ ७९ ॥
योऽअस्म्मब्भ्यंम् ॥ योऽअस्म्मब्भ्यंमरातीयाद्यश्च्वंनोद्द्वेषंते
जनंः ॥ निन्दाद्योऽअस्म्मान्धिप्प्साच्चसर्व्वन्तम्मंस्म्मसाकुरु
॥ ८० ॥ सꣳशितम्मे ॥ सꣳशितम्मेब्रह्मसꣳशितंव्वीर्य्यम्ब
लंम् ॥ सꣳशितक्षत्त्रञ्जिष्णुयस्याहमास्म्मिपुरोहितह ॥ ८१ ॥
उदेषाम् ॥ उदेषाम्बाहूऽअंतिरमुद्द्वच्चोंऽअथोबलंम् ॥ क्षिणोमि
ब्रह्मंणामित्त्रानुन्नंयामिस्वाँ२॥ ऽअहम् ॥ ८२॥ अन्नंपतेन्नस्य । २८९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नोदेह्यनमीवस्यंशुष्मिमणंः ॥ प्रप्प्रंदातारंन्तारिषऽऊर्ज्जंन्नोधे
हिद्विपदेचतुंष्प्पदे ॥ ८३ ॥ [१८-७] ॥ इतिश्रीवाजसनेय ॥ १२ ॥
॥१०६॥ संहितायाम् एकादशोऽध्यायः ॥ ११ ॥ श्रीवेदपुरुषाय नमः ॥
अनुवाकसूत्रम् ॥ इशानःसप्तदश, दिवस्परिद्वादश, समिधा
ग्निंपंचदशा, पेतसप्तदशा, सुन्वन्तमयजमानंत्त्रयोदश, याऽ
ओषधीः सप्तविंᳬशति, मांमाषोडश, सप्तसप्तदशᳬशतम् ॥ ॥ १०६ ॥
[अ. १२ मं. ११७ अनु. ७] हरिः ॐ ॥ इशानोरुक्मश् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ईशानोरुक्क्मऽउर्व्यांव्व्यद्यौद्दुर्म्मर्षमायुः श्श्रियेरुचानः ॥ अग्नि
रमृतोऽअभवद्वयोभिर्य्यदेनन्द्यौरजनयत्त्सुरेताः ॥ १ ॥ नक्तो
षासासमनसा ॥ नक्तोषासासमनसाव्विरूपेधापयेतेशिशु
मेकꣳसमीची ॥ द्यावाक्षामारुक्मोऽअन्तर्व्विभातिदेवाऽअग्नि
न्धारयन्द्रविणोदाः ॥ २ ॥ व्विश्वारूपाणि ॥ व्विश्वारूपाणि
प्प्रतिमुञ्चतेकविः प्प्रासावीद्भद्रंद्विपदेचतुष्प्पदे ॥ व्विनाकम

१ ईशानः । अत्र ऋषरेभ्यः (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन समानपदे स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ८६ सू.) इत्यनेन एतैरेव व्यवधानेऽपि णत्वविधानात्र णत्वप्राप्तिः । तथापि शिलिसिवर्गमध्यमव्यवहितोऽपि (शु. य. प्रा. ३ अ. ९५ सू.) इत्यनेन णत्वनिषेधः शिष्यबुद्धिव्युत्पादनार्थो ज्ञेयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

करुयत्सविताव्वरेण्ण्योनुंप्प्रयाणंमुषसोव्विराजति॥ ३ ॥ सुपण्र्णों
सि। गुरुत्मौंस्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ ॥ स्तोमऽ
आत्माच्छन्दाᳯंस्यङ्गानियजूᳯंषिनाम ॥ सामंतेतनूर्व्वामदे
व्यँयज्ञायज्ञियम्पुच्छन्धिष्ण्ण्या÷शफाः ॥ सुपण्र्णोसिगरु
त्मान्दिवङ्गच्छस्व÷पत ॥ ४ ॥ व्विष्ण्णोᳯक्क्रम÷ ॥ व्विष्ण्णोᳯ
क्क्रमोसिसपत्नहागायत्रञ्छन्दऽआरोहपृथिवीमनुविक्क्रमस्व
व्विष्ण्णोᳯक्क्रमोस्यभिमातिहात्रैष्टुभञ्छन्दऽआरोहान्तरिक्षम

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नुविक्क्रंमस्वुव्विष्णुोऽंक्क्रमोौस्यरातीयुतोहुन्ताजागंतुञ्छन्दुऽआ
रोंहुदिवुमनुविक्क्रंमस्वुव्विष्णोुऽंक्क्रमोौसिशत्रूयुतोहुन्तानुंष्टुभु
ञ्छन्दुऽआरोंहुदिशोनुविक्क्रंमस्व ॥ ५॥ अक्क्रन्ददुग्निः ॥ अक्क्र
न्ददुग्निस्त्तुनयंन्निवुद्यौःक्षामारेरिंहद्वीरुधंः समुञ्जन् ॥ सुद्यो
जंज्ञानोव्विहीमिद्धोऽअक्ख्युदारोदंसीभानुनाभात्त्युन्तः ॥६॥
अग्नेंब्भ्यावर्त्तिन् ॥ अग्नेंब्भ्यावर्त्तिन्नभिमानिवंर्त्तुस्वायुंषाव्वर्च्चं
साप्प्रजयाधनेंन ॥ सन्न्यामेधयांरुय्यापोषेंण ॥ ७॥ अग्नेंऽ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्गिरः । शतन्तैसन्त्वावृतः सहस्रन्तऽउपावृतः ॥ अधा
पोषस्यपोषेणपुनर्न्नोनष्टमाकृधिपुनर्न्नोरयिमाकृधि ॥ ८ ॥ पुनं
रूर्ज्जा । निवर्त्तस्वपुनरग्नऽइषायुषा ॥ पुनर्न्नः पाह्यꣳहंसः ॥९॥
सहरय्या । निवर्त्तस्वाग्नेपिन्वस्वधारया ॥ विश्वप्स्न्याविश्वत
स्प्परि ॥ १० ॥ आत्त्वा । हार्षमन्तरभूर्द्ध्रुवस्तिष्ठाविचाचलिः ॥
विशस्त्वासर्व्वावाञ्छन्तुमात्त्वद्राष्ट्रमधिभ्रशत् ॥ ११ ॥
उदुत्तमम् ॥ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथाय ॥ अथाव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम
॥ १२ ॥ अग्ग्रेबृहन् ॥ अग्ग्रेबृहन्नुषसामूर्द्ध्वोऽअस्त्थान्निर्ज्ज
गन्वान्तमसोज्ज्योतिषागात् ॥ अग्निर्ब्भानुनारुशतास्वङ्गऽ
आजातोव्विश्श्वासद्म्मान्यप्प्राः ॥ १३ ॥ हꣳसश्शुचिषत् ॥ हꣳ
सश्शुचिषद्वसुरन्तरिक्षसद्धोताव्वेदिषदतिथिर्द्दुरोणसत् ॥ नृष
द्वरसदृतसद्व्योमसदब्ब्जागोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत्

१ अथय इति पदम्। अथोदारिथशोचपनयसादयर्जुवृषमत्रुसकक्ष्माधारात्पूतभवत यकारे (शु. य. प्रा. ३ अ. ११२ सू.) इत्यनेन एतेषां यकारे परे दीर्घः। तेन अथाय इति पदम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ १४ ॥ सीदुत्त्वम् ॥ सीदुत्त्वम्मातुरस्याऽउपस्त्थेव्विश्श्वान्न्य
ग्ग्नेव्वयुनांनिव्विद्द्वान् ॥ मैनान्तपंसामार्च्चिषाभिशोंचीरन्तरं
स्याॐशुक्क्रज्ज्योंतिर्व्विभांहि ॥ १५ ॥ अन्तरंग्ग्ने । रुचात्त्वमु
खायाꣳसदंनेस्वे ॥ तस्यास्त्वꣳहरंसातपञ्ज्ञातवेदꣳशिवोभव
॥ १६ ॥ शिवोभूत्त्वा । मह्यंमग्ग्नेऽअथोंसीदशिवस्त्त्वम् ॥
शिवाꣳकृत्त्वादिशꣳसर्व्वाꣳस्वाँय्योनिंमिहासंदꣳ॥ १७॥[१७-१]
दिवस्प्परिं । प्प्रथमञ्जज्ञेऽअग्ग्निरस्म्मद्द्वितीयम्परिंजातवेदाꣳ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयम्प्प्सुनृमणाऽअजस्रमिन्धानऽएनञ्जरतेस्वाधीः॥१८॥

व्विद्द्माते ॥ विद्द्मातेऽअग्नेत्त्रेधात्त्रयाणिव्विद्द्मातेधामव्विभृ

तापुरुत्त्रा ॥ विद्द्मातेनामम्परमङ्गुहायद्विद्द्मातमुत्त्सँय्यतऽ

आजगन्थ ॥ १९ ॥ समुद्द्रेत्त्वा । नृमणाऽअप्प्स्वन्तर्नृचक्षाऽ

ईधेदिवोऽअग्नऽऊधन् ॥ तृतीयेत्त्वारजसितस्त्थिवाᳬंसमपा

मुपस्त्थेमहिषाऽअवर्द्धन् ॥ २० ॥ अक्क्रन्ददग्निः ॥ अक्क्रन्द २१७

---

१ नृमणा । अत्र ऋषरेभ्यो नकारो णकारं समानपदे (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन णत्वाप्राप्तौ स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ८६ सू.) एतैर्व्यवधानेऽपि ऋषरेभ्यो णत्वविधानात्पवर्गस्य व्यवधानेऽपि णत्वे नृमणा इति रूपम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुग्ग्निस्त्तुनयंन्निवृद्यौश्क्षामारेरिंहद्वीरुधं÷समुञ्ज्ञन् ॥ सुद्योज
ज्ञानोव्विहीमिद्धोऽअक्ख्युदारोदंसीभानुनाभात्त्युन्तश् ॥२१॥ ॥ १२ ॥
श्रीणामुंदुारश् ॥ श्रीणामुंदुारोधुरुणोरय्युीणाम्मंनुीषाणुाम्प्रा
र्प्पंणुःसोमंगोपाः ॥ व्वसुं÷सुनुश्सहंसोऽअुप्प्सुराजाव्विभुात्त्य
ग्ग्रंऽउुषसांमिधुानश् ॥ २२ ॥ व्विश्श्वंस्यकेुतुः ॥ व्विश्श्वंस्यकेुतु
र्ब्भुुवंनस्युगर्ब्भुंऽआरोदंसीऽअपृुणाज्जायंमानः ॥ व्वीडुञ्चिदाद्द्रिं
मभिनत्त्परायुञ्जनाुयदुग्ग्निमयंजन्तुपञ्च्वं ॥ २३ ॥ उुशिक्क्पां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वकः ॥ उशिक्पावकोऽअरतिःसुमेधामर्त्त्येष्वग्निरमृतोनि
धायि ॥ इयर्त्तिधूममरुषम्भरिभ्रदुच्छुक्रेणशोचिषाद्यामिनं
क्षन् ॥ २४ ॥ दृशानोरुक्मः ॥ दृशानोरुक्मऽउर्व्याव्यद्यौदु
र्मर्षमायुःश्रियेरुचानः ॥ अग्निरमृतोऽअभवद्वयोभिर्य
देनन्द्यौरजनयत्सुरेताः ॥ २५ ॥ यस्ते ॥ यस्तेऽअद्यकृण
वद्भद्रशोचेपूपन्देवघृतवन्तमग्ने ॥ प्रतन्नयप्रतरंवस्योऽअच्छा
भिसुम्नन्देवभक्तंयविष्ठ ॥ २६ ॥ आतम् ॥ आतम्भजसौ २११

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्श्रवसेष्ष्वंग्नऽउक्थऽउंक्थऽआभंजशुस्यमांने ॥ प्प्रियश्सूरुये
प्प्रियोऽअग्नाभंवात्त्युज्जातेनंभिनदुदुज्जानिंत्त्वैः ॥ २७ ॥
त्वामंग्ग्ने ॥ त्वामंग्ग्नेयजंमानाऽअनुद्यून्न्विश्श्वावसुंदधिरेव्वा
र्य्याणि ॥ त्वयांसुहद्द्रविंणमिच्छमांनाव्व्रजङ्गोमंन्तमुशिजोव्वि
वंव्व्रुः ॥ २८ ॥ अस्त्ताव्ग्यग्ग्निः ॥ अस्त्ताव्ग्यग्ग्निर्न्नराᳫंसुश्शे
वोव्वैश्श्वानरऽऋषिंभिःसोमंगोपाः ॥ अद्वेषेद्यावांपृथिवीहुवेम
देवांधत्त्तरयिमुस्म्मेसुवीरंम् ॥ २९ ॥ [१२-२] सुमिधाग्ग्निम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुमिधाग्निन्दुंवस्यत घृतैर्ब्बौधयुताातिंथिम् ॥ आस्मिन्मन्हृव्याजुं
होतन ॥ ३० ॥ उदुंत्त्वा ॥ उदुंत्त्वाव्विश्श्वेंदेवाऽअग्ग्नेभरंन्तु
चित्तिंभिः ॥ सनोंभवाशिवस्त्वᳫं सुप्प्रतींकोव्विभावंसुः ॥ ३१ ॥
प्रेत् ॥ प्रेदंग्ग्नेज्ज्योतिंष्म्मान्याहिशिवेभिंरर्च्चिंभिष्ट्वम् ॥ बृहद्भिं
र्ब्भानुभिर्ब्भासन्मा हिंᳫंसीस्त्तन्न्वाप्प्रजाः ॥ ३२ ॥ अक्रंन्द

१ आर्चिभिस्त्वम् इति पदम् । अत्र मातृभिरर्चिभिः पायुभिर्वरूत्रीः (शु. य. प्रा. ३ अ. ७९ सू.) इत्यनेन मातृभिः आर्चिभिः पायुभिः वरूत्रीः एतेषां पदानां एकाक्षरे प्रत्यये विसर्जनीयसकारस्य षः । तेन सस्य षत्वे, षात्तथौ मूर्धन्यम् (शु. य. प्रा. ३ अ. ८० सू.) इत्यनेन त्वमित्यस्य तस्य मूर्धन्ये टकारे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इति टस्य द्वित्वे आर्चिभिष्ट्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुग्निः ॥ अक्रन्दद्ग्निस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधः
समञ्जन् ॥ सद्योजज्ञानोविहीमिद्धोऽअक्ख्यदारोदसीभानु
नाभात्यन्तः ॥ ३३ ॥ प्रप्प्रायम् ॥ प्रप्प्रायमग्निर्भरतस्य
शृण्वेविवयत्सूर्योनरोचतेबृहद्भाः ॥ अभियःपूरुम्पृतनासुत
स्त्थौदीदायदैव्योऽअतिथिःशिवोनः ॥ ३४ ॥ आपोदेवीः ॥
आपोदेवीःप्प्रतिगृभ्णीतभस्मैतत्स्योनेकृणुद्ध्वःसुरभाऽउ
लोके ॥ तस्मैनमन्ताञ्जनयःसुपत्क्नीर्म्मातेवपुत्त्रम्बिभृता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्स्वेनत् ॥ ३५ ॥ अप्प्स्वग्ग्ने ॥ अप्प्स्वग्ग्नेसधिष्ट्व[1]सौषधी[2]

रनुरुद्ध्यसे ॥ गब्भेसञ्जायसेपुनः ॥ ३६ ॥ गब्भोऽअसि ॥

गब्भोऽअस्योषधीनाङ्गब्भोव्वनस्प्पतीनाम् ॥ गब्भोव्विश्वस्य

भूतस्याग्ग्नेगब्भोऽअपामसि ॥ ३७ ॥ प्रसद्यभस्म्मना ॥

प्रसद्यभस्म्मनायोनिमपश्चपृथिवीमग्ग्ने ॥ सहसृज्ज्यमातृभिष्ट्व[3]

१ सधिष्ट्व । अत्र सधिस्त्व इति पदद्वयम् । अत्र विसर्गस्य परसवर्णे, सधिरंशुरदितिः (शु. य. प्रा. ३ अ. ७६ सू.) इत्यनेन षत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः इत्यनेन टस्य द्वित्वम् । २ सः ओषधीः इति पदद्वयम् । अत्र सऽओषधीमयोः (शु. य. प्रा. ३ अ, १५ सू.) इत्यनेन ओषधीपरे सः पदस्य विसर्जनीयस्य लोपे, सन्ध्यक्षर ऐकारौकारौ (शु. य. प्रा. ४ अ. ५७ सू.) इत्यनेन वृद्धौ सौषधी इति पदम् । ३ मातृभिस्त्वम् इति पदम् । मातृभिर- २०३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्ज्योतिष्म्मान्पुनरासंदः ॥ ३८ ॥ पुनंरासद्यं ॥ पुनंरासद्य
सदंनमपश्चपृथिवीमंग्ग्ने ॥ शेषेंमातुर्य्यथोपस्त्थेन्तरंस्याᳬ
शिवतंमः ॥ ३९ ॥ पुंनरूर्ज्जा । निर्वर्त्तस्वपुनरग्ग्नऽइषायुषा ॥
पुनर्न्नःपाह्यह्हंसः ॥ ४० ॥ सहरय्या । निर्वर्त्तस्वाग्ग्नेपिन्वं
स्वधारंया ॥ विश्वप्स्न्यांविश्वतस्प्परिं ॥ ४१ ॥ बोधांमे ।
ऽअस्यवचंसोयविष्ठमᳬहिष्ठस्यप्प्रभृंतस्यस्वधावः ॥ पीयंति ॥११३॥

र्चिभिः पायुभिर्वरूत्रीः (शु. य. प्रा. ३ अ. ७९ सू.) इत्यनेन मातृभिः अर्चिभिः पायुभिः वरूत्रीः एतेषां पदानां विसर्जनीयस्य सकारस्य षकार एकाक्षरे प्रत्यये परे इति षत्वे च षात्तथौ मूर्धन्यम् (शु. य. प्रा. ३ अ. ८० सू.) इत्यनेन तस्य मूर्धन्ये टकारे ऊष्मान्त० इत्यनेन टस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्त्वोऽअनुंत्त्वोगृणातिव्वृन्दा[1]रुष्ट्टेतन्न्वंव्वन्देऽअग्ग्ने ॥ ४२ ॥ स
बोधि । सूरिर्म्मघवाव्वसुपतेव्वसुदावन् ॥ युयोद्ध्यस्म्मद्द्वेषांᳪं
सिव्विश्श्वकर्म्मणेस्वाहा ॥ ४३ ॥ पुनस्त्त्वा । दित्त्यारुद्द्राव्वसवᳬ
समिन्धताम्पुनर्ब्ब्रह्माणोव्वसुनीथयज्ञैः ॥ घृतेनत्त्वन्तन्न्वंव्वर्द्धय
स्वसत्त्याःसन्तुयजमानस्यकामाᳬ ॥ ४४ ॥ [१५-३] अपेत ॥
अपेतव्वीतव्विचसर्प्पतातोयेत्त्रस्त्थपुराणायेचनूतनाᳬ ॥ अदा

१ वृन्दारुष्ट्टे अत्र वृन्दारुः ते इति पदद्वयम् । वृन्दारुर्माकिः (शु. य. प्रा. ३ अ. ७४ सू.) इत्यनेन वृन्दारोः विसर्गस्य परसवर्णे, षात्तथौ मूर्धन्यम् इत्यनेन च ते इत्यस्य मूर्धन्ये टेकारे कृते ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इति टकारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य.
संहि.
॥११४॥

द्यमोवसानंम्पृथिव्याऽअक्क्रन्निमम्पितरोंल्लोकमंस्म्मै ॥ ४५ ॥ पू. म.
सँज्ञानंमसि । कामधरंणम्ममायितेकामधरंणम्भूयात् ॥ अग्ग्ने ॥ १२ ॥
र्ब्भस्म्मांस्यग्ग्नेःपुरीषमसिचितस्त्थपरिचितंऽऊर्द्ध्वचितं÷श्रय
द्ध्वम् ॥ ४६ ॥ अयᳬसः ॥ अयᳬसोऽअग्ग्निर्य्यस्म्मिन्त्सो
ममिन्द्रं÷सुतन्दधेजठरेंव्वावशानः ॥ सहस्त्रियंव्वाजमत्त्यं
न्नसप्प्तिᳬससवान्त्सन्त्स्तूयसेजातवेदः ॥ ४७ ॥ अग्ग्नेयत् ॥ ॥११४॥
३०६
अग्ग्नेयत्तेंदिविव्वर्च्चः÷पृथिव्यांय्यदोषंधीष्ष्वप्प्स्वायंजत्र ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

येनान्तरिक्षमुर्व्वाततन्थत्त्वेषश्सभानुरर्ण्णवोनृचक्षाः[1] ॥४८॥
अग्नेदिवः ॥ अग्नेदिवोऽअर्ण्णमच्छाजिगास्यच्छादेवाँ२॥
ऽऊँचिषेधिष्ण्याये ॥ यारोचनेपरस्तात्त्सूर्य्यस्ययाश्चावस्तात्
दुपतिष्ठन्तऽआपः ॥ ४९ ॥ पुरीष्ष्यासोऽअग्नयः । [2]प्राव
णेभिःसजोषसः ॥ जुषन्ताँय्यज्ञमद्रुहोनमीवाऽइषोमहीः
॥ ५० ॥ इडामग्ने । पुरुदꣳसꣳसनिङ्गोःशश्वत्तमꣳहवमा

१ यत्र यकारवकाररहितदीर्घस्वरितस्वरात्परो विसर्गस्तत्र कनिष्ठिकाक्षेपः सर्वत्र कार्यः । २ प्रावणेभिः । अत्र प्रवणश्रृङ्गयासेषु (शु. य. प्रा. ३ अ. १०५ सू.) इत्यनेन वन श्रृङ्ग यास इत्येतेषु परेषु प्र इत्येतत्पदस्य ह्रस्वाकारस्य दीर्घाकारो विधीयते । अत्र प्रशब्दाद्वनशब्दः परः । तेन प्रशब्दाकारो दीर्घः ।

शु. य. संहि. ॥११५॥ नायसाध ॥ स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्व पृ. अ.
स्म्मे ॥ ५१ ॥ अयन्ते ॥ अयन्तेयोनिर्ऋत्त्वियोयतोजातोऽ ॥ १२ ॥
अरोचथाः ॥ तञ्जानन्नग्नऽआरोहाथांनोवर्द्धयारयिम् ॥५२॥
चिदंसि ॥ चिदंसितयांदेवतंयाङ्गिरस्वद्ध्रुवासीदपरिचिदंसित
यांदेवतंयाङ्गिरस्वद्ध्रुवासीद ॥ ५३ ॥ लोकम्पृण । च्छिद्रम्पृ
णाथोसीदद्ध्रुवात्त्वम् ॥ इन्द्राग्नीत्त्वाबृहस्प्पतिरस्म्मिन्न्योनां ॥ ११५ ॥ ३०८
वसीषदन् ॥ ५४ ॥ ताऽअंस्य ॥ ताऽअंस्यसूदंदोहसः सोमंॐ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीणान्तिपृश्नंयः ॥ जन्मन्देवानांव्विशंस्त्रिष्ष्वारोचनेदिवः

॥ ५५ ॥ इन्द्रंव्विश्वाः ॥ इन्द्रंव्विश्वाऽअवीवृधन्त्समुद्द्रव्यचस

सङ्गिरः ॥ रथीतम[1]ᳬरथीनांव्वाजानाᳮसत्त्पतिम्पतिम् ॥ ५६ ॥

समितम् ॥ समितङ्गसङ्कल्पेथाᳮसम्प्रियौरोचिष्णूसुमनस्य

मानौ ॥ इषमूर्ज्जमभिसंव्वसानौ ॥ ५७ ॥ सं[2]वाम् ॥ संवा

---

१ रथितमम्। इति पदम् । रथि तकारनकारयोः (शु. य. प्रा. ३ अ. ११२ सू.) इत्यनेन तकारे नकारे च परे रथि इत्येतत्पदं दीर्घं भवति। तेन रथीतमम्। २ उपसर्गात्परो यस्तु स वकारो लघुर्मतः। वो वां वा वै मंत्रपाठे लघवो गुरवः पदे। इति वामित्यस्यात्र लघुत्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म्मनांᳮसिसंव्व्रतासमुंच्चित्तान्याकंरम्[1] ॥ अग्ग्नेंपुरीष्ष्याधिपा
भंव्वत्त्वन्नऽइषमूर्ज्ज्ँ᳭य्यजंमानायधेहि ॥ ५८ ॥ अग्ग्नेत्त्वम् ॥
अग्ग्नेत्त्वम्पुंरीष्ष्योरयिमान्न्पुंष्टिमाँ२॥ऽअंसि ॥ शिवाःकृत्त्वा
दिशंःसर्व्वाःस्वँय्योनिंमिहासंदः ॥ ५९ ॥ भवंतन्नः ॥ भवं
तन्नःसमंनसौसचेंतसावरेपसौ ॥ मायज्ञᳬहिंᳬसिष्टम्मायज्ञ
पंतिञ्जातवेदसौशिवौभंवतमद्यनंः ॥६०॥ मातेवंपुत्त्रम् ॥ माते

---

१ अत्र मकारोच्चारे दक्षिणहस्तेन मुष्ट्याकृतिः कार्या । यत्र यत्रावसानगतो मकारस्तत्र मुष्ट्याकृतिः "मुष्ट्याकृतिर्मकारे स्यात्" इति या. शिक्षायाम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वंपुत्रम्पृथिवीपुरीष्यमुग्निꣳस्वेयोनावभारुखा ॥ तांव्विश्वैर्द्दे
वैर्ऋतुभिः संविदानःप्रजापतिर्व्विश्वकर्म्माव्विमुञ्चतु ॥ ६१ ॥
[१७-४] असुंन्वन्तमयंजमानम् ॥ असुंन्वन्तमयंजमान
मिच्छस्त्तेनस्येत्त्यामान्व्विहितस्क्करस्य ॥ अन्न्यमस्म्मदिच्छ
सातंऽइत्त्यान्नमोदेविनिर्ऋतेतुब्भ्यंमस्त्तु ॥ ६२ ॥ नमꣳसुते ॥
नमꣳसुतेनिर्ऋतेतिग्ग्मतेजोयस्म्मयंव्विचृताबन्धमेतम् ॥ यमे

१ वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः। आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतरः। यत्र पदादौ वकारस्तत्रोच्चारणं गुरुभूतम्। यत्र पदादेर्मध्ये यदा च पदस्यान्ते वकारस्तदा तु क्रमेण लघु लघूतरं मध्यमवृत्त्योच्चारणम्। अत्र वकारः पदस्य मध्ये वर्तते तेन न गुरुभूतत्वच्चारणश्चेति ध्रुति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्त्वँऽयम्म्यासँविदानोत्तमेनाकेऽअधिरोहयैनम् ॥ ६३ ॥
यस्यास्ते। घोरऽआसञ्जुहोम्म्येषाम्बन्धानामवसर्ज्जनाय ॥ या
न्त्वाजनोभूमिरितिप्प्रमन्दतेनिर्ऋतिन्त्वाहम्परिवेदव्विश्वतः
॥ ६४ ॥ यन्ते। देवीनिर्ऋतिराबबन्धपाशङ्ग्रीवास्वविचृत्त्यम् ॥
तन्ते[1]व्विष्ष्याम्म्यायुषोनमद्ध्यादथैतम्पितुमद्धिप्प्रसूतः ॥ नमो
भूत्त्यैयेदञ्चकार ॥ ६५ ॥ निवेशनःसङ्गमनः ॥ निवेशनः

१ विष्ष्यामि अत्र विस्यामि इति पदम्। अत्र वेर्युदयः (शु. य. प्रा. ३ अ. ६७ सू.) इत्यनेन वेः उपसर्गात्परस्य यकारोदयस्य सकारस्य षकारे कृते स्वरात्संयोगादिर्द्विरुच्यते (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन षकारस्य द्वित्वे रूपम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुङ्गमंनोव्वसूनांव्विश्श्वांरूपाभिचंष्ट्टेशचीभिः ॥ देवऽइंवसविता

सत्त्यधर्म्मैन्द्रोनतस्त्थौसमरेपंथीनाम् ॥ ६६ ॥ सीरांसुञ्जन्ति ।

कवयोंयुगाव्वितंन्वतेपृथक् ॥ धीरादेवेषुंसुम्न्नया ॥ ६७ ॥

युनक्तसीरां ॥ युनक्तसीराव्वियुगातंनुद्ध्वङ्कृतेयोनौव्वपतेहबी

जंम् ॥ गिराचंश्श्रुष्टिश्सभंराऽअसंन्नोनेदीयऽइत्त्सृण्ण्यःपक्कमे

यांत् ॥ ६८ ॥ शुनꣳसु । फालाव्विकृंषन्तुभूमिꣳशुनङ्कीना

शाऽअभियंन्तुव्वाहैः ॥ शुनांसीराहविषातोशंमानासुपिप्पला ३१३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऽओषधीःकर्त्तनास्मे ॥ ६९ ॥ घृतेनसीता ॥ घृतेनसीतामधु
नासमंज्यताविश्वैर्देवैरनुमतामरुद्भिः ॥ ऊर्ज्जस्वतीपयंसापि
न्वमानास्मान्त्सीतेपयंसाभ्यावंवृत्स्व ॥ ७० ॥ लाङ्गलु
म्पवीरवत् ॥ लाङ्गलम्पवीरवत्सुशेवंसोमपित्सरु ॥ तदुद्वंप
तिगामविंम्प्रफर्व्यञ्चपीवंरीम्प्रस्त्थावंद्रथवाहंणम् ॥ ७१ ॥
कामंङ्कामदुघे । धुक्ष्वमित्रायवरुणायच ॥ इन्द्रायाश्विभ्या
म्पूष्णेप्रजाभ्यऽओषधीभ्यः ॥ ७२ ॥ विमुच्यध्वम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्विमुंञ्चध्वमग्घ्न्यादेवयानाऽअगंन्मुतमंसस्स्पारमुस्य ॥ ज्ज्यो
तिंरापाम ॥ ७३ ॥ सुजूरब्दं÷ ॥ सुजूरब्दोऽअयंवोभिंःसुजू
रुषाऽअरुंणीभिंः ॥ सुजोषंसाव्वुश्श्विनादꣳसोंभिंःसुजूश्शूरऽ
एतंशेनसुजूर्व्वैंश्श्वानुरऽइडंयाघृतेनुस्वाहां ॥ ७४ ॥ [१३-५]
याऽओषंधीःं ॥ याऽओषंधीुःपूर्व्वाजातादुवेब्भ्यांस्त्रियुगम्पुरा ॥
मनैनुबब्भ्रूणांमुहꣳशुतन्धामांनिसुप्तचं ॥ ७५ ॥ शुतंवं÷ ॥

---

१ तमसस्पारम् । अत्र तमसोऽपरस्मात् (शु. य. प्रा. ३ अ. २६ सू.) इत्यनेन विसर्जनीयः सकारमापद्यतेऽपरस्माच्छन्दे परे । इति तमस इत्यस्य विसर्गस्य सकारे कृते तमसस्पारम् । अन्यथा तमसः पारम् इति स्यात् । अपरस्मात्किम् । आदित्यवर्णन्तमसः परस्तात् (संहिता अ. ३१ मं. १८)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥११९॥ शतंवो[1]ऽअम्बधामानिसहस्रमुतवोरुहः ॥ अधाशतक्रत्वोयु
यमिमम्मेऽअगदङ्कृत ॥ ७६ ॥ ओषधीःप्प्रति । मोदद्ध्वम्पु
ष्प्पवतीःप्प्रसूवरीः ॥ अश्वाऽइवसजित्त्वरीर्व्वीरुधःपारयि
ष्ण्णवः ॥ ७७ ॥ ओषधीरिति । मातरस्तद्द्वोदेवीरुपब्रुवे ॥
सनेयमश्वङ्गाम्वासऽआत्मानन्तवपूरुष ॥ ७८ ॥ अश्वत्थे
वः ॥ अश्वत्थेवोनिषदनम्पर्ण्णेवोव्वसतिष्[2]कृता ॥ गोभाजऽइ ॥११९॥

१ त्वदर्थवाचिनौ वो वां वा वै यदि निपातजौ। आदेशाश्चं विकल्पार्थो ईषत्स्पृष्टास्तु ते स्मृताः। अर्थादेते लघव उच्चारणीयाः (या. शि.) २ वसतिः कृता इति पदम्। आविनिरिडइडायावसतिर्वैरिवः (शु. य. प्रा. ३ अ. २३ सू.) इत्यनेन ककारपकारयोः परयोरेतेषां सस्य षत्वम्। तेन वसतिष्कृता।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्त्विकलाँसथ्यत्त्सनवंथपूरुषम् ॥ ७९ ॥ यत्रौषधीः ं । सम

ग्ग्मंतराजानःं समिंताविव ॥ व्विप्प्रःं सऽउंच्च्यतेभिषग्ग्रंक्षोहा

मींवचातनःं ॥ ८० ॥ अश्श्वावतीॐ सोमावतीम् ॥ अश्श्वाव

तीॐ सोमावतीमूर्ज्जयन्तीमुदोजसम् ॥ आवित्त्सिसर्व्वाऽओषं

धीरस्म्माऽअंरिष्टतांतये ॥ ८१ ॥ उच्छुष्म्माः ं ॥ उच्छुष्म्माऽ

ओषंधीनाङ्गावोगोष्ठादिवेरते ॥ धनंः सनिष्ष्यन्तींनामात्क्मा

---

१ अश्श्ववतीम् । इति पदम् । अत्र अश्वरश्मिसुमति० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे अश्श्वशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । तेन अश्श्वावतीम् । एवं सोमावतीं रश्मीवतीम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्नन्तवंपूरुष ॥ ८२ ॥ इष्कृतिर्न्नामं । वोमातार्थोसूयठंस्त्थनि
ष्कृतीं ॥ सीराश्पंतत्रिणींस्त्थनयदामयतिनिष्कृथ ॥ ८३ ॥
अतिविश्श्वाः । परिष्ठास्त्तेनऽइंवव्रजमंक्रमुः ॥ ओषंधीःप्प्रा
चुंच्यवुर्य्यत्किञ्चंतन्न्वोरपः ॥ ८४ ॥ यदिमाः ॥ यदिमाव्वा
जयंन्नहमोषंधीर्हस्त्तंऽआदधे ॥ आत्क्मायक्ष्मंस्यनश्श्यतिपु
राजीवगृभोयथा ॥ ८५ ॥ यस्यौषधीः । प्प्रसर्प्पथाङ्गंमङ्ग
म्पपरुष्प्परुः ॥ ततोयक्ष्मंव्विबांधद्ध्वऽउग्ग्रोमंद्ध्यमशीरिव ॥८६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साकँऽयक्ष्म ॥ साकँऽयक्ष्मप्प्रपत चाषेणकिकिदीविना ॥ सा
कंव्वातस्यद्ध्राज्ज्यासाकन्नंश्श्यनिहाकया ॥ ८७ ॥ अन्न्यावः ॥
अन्न्यावोऽअन्न्यामवत्त्वन्न्यान्न्यस्याऽउपावत ॥ ताःसर्व्वाःसं
विदानाऽइदम्मेप्प्रावताव्वचः[1] ॥ ८८ ॥ याःफलिनीः ॥ याः
फलिनीर्य्याऽअफलाऽअपुष्प्पायाश्श्चपुष्प्पिणीः ॥ बृहस्प्पति
प्प्रसूतास्त्तानोमुञ्चन्त्वꣳहसः ॥ ८९ ॥ मुञ्चन्तुमा । शप

१ इदम्मेप्प्रावताव्वचः । अत्र अश्वरश्मिमतिसुमतिश्वसुतचारयघृणिसेदिमेन्द्रियधारयचित्रभङ्गुरवयुनाश्वस्यहृदयघुष्यत्तौभ्यवताध्यर्वशक्तिपुरुत्वाचि चकारे (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वचः इत्यस्य वकारे परे अवत इत्यस्य ह्रस्वाकारस्य दीर्घाकारः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्थ्यादथोव्वरुण्ण्यादुत ॥ अथोयमस्यपड्वीशात्त्सर्व्वस्म्माद्देवकि
ल्बिषात् ॥ ९० ॥ अवपतन्तीरवदन् ॥ अवपतन्तीरवदन्दि
वऽओषधयस्प्परि ॥ यञ्जीवमश्नवामहैनसरिष्ष्याति[1]पूरुषः
॥ ९१ ॥ याऽओषधीः ॥ याऽओषधीःसोमराज्ञीर्ब्बह्वीःशत
विचक्षणाः ॥ तासामसित्त्वमुत्तमारङ्कामायशंहृदे ॥ ९२ ॥
याऽओषधीः ॥ याऽओषधीःसोमराज्ञीर्व्विष्ठिताःपृथिवीमनु ॥

१ पूरुषः । अत्र पुरुषोऽवसाने (शु. य. प्रा. ३ अ. १२० सू.) पुरुष इति दीर्घो निपात्यते अवसाने चेत् । अत्र पू इत्यस्य निपातनाद्दीर्घः । अनवसाने पुरुषऽएवेदम् । अत्र ह्रस्व एव ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बृहस्पतिंप्प्रसूताऽअस्यैसन्दंत्तव्वीर्य्यम् ॥ ९३ ॥ याश्चं ॥
याश्चेदमुंपशृण्ण्वन्तियाश्चंदूरम्परांगताः ॥ सर्वाःसङ्गत्यंव्वी
रुधोस्यैसन्दंत्तव्वीर्य्यम् ॥ ९४ ॥ मावंः ॥ मावोरिषत्त्खनि
तायस्म्मैचाहङ्खनामिवः ॥ द्विपाच्चतुष्प्पादस्म्माकुसर्व्वम
स्त्वनातुरम् ॥ ९५ ॥ ओषंधयःसम् ॥ ओषंधयःसमंवद
न्तसोमेनसहराज्ञा ॥ यस्म्मैकृणोतिब्राह्मणस्त्तराजन्पार ३२१
यामसि ॥ ९६ ॥ नाशयित्त्रीबलासंस्य ॥ नाशयित्त्रीबलास

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

।१२२॥

स्यार्शंसऽउपुचितांमसि ॥ अथौंशुतस्युयक्ष्मांणाम्पाकुारोरंसि

नाशंनी ॥ ९७ ॥ त्वाङ्गंन्धुर्व्वाः ॥ त्वाङ्गंन्धुर्व्वाऽअंखनुँस्त्वा ॥ १२ ॥

मिन्द्रुस्त्वाम्बृहुस्पातिंः ॥ त्वामौंषधेसोमोराजाविद्वान्य

क्ष्मांदमुञ्चयत ॥ ९८ ॥ सहंस्वमे ॥ सहंस्वमेऽअरांतींःसहंस्व

पृतनायुतः ॥ सहंस्वुसर्व्वैंपाप्मानुङ्सहंमानास्योषधे ॥ ९९ ॥

दुीर्ग्घायुंस्त्ते ॥ दुीर्ग्घायुंस्त्तऽओषधेखुनितायस्म्मैचत्त्वाखनां ॥ १२२ ॥

म्म्युहम् ॥ अथोत्त्वन्दुीर्ग्घायुंर्भूत्त्वाशुंतवंल्शाविरोंहतात् ३२२

१ अत्र लकारशकारयोर्योगे हरितारख्या स्वरभक्तिर्बोध्या ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ १०० ॥ त्वमुत्तमा । स्योषधेतवंवृक्षाऽउपस्त्तयः ॥ उपं
स्त्तिरस्त्तुसोस्म्माकँँय्योऽअस्म्माँ२॥ऽअभिदासंति ॥ १०१ ॥
[२७-६] मामां ॥ मामांहिꣳसीज्जनितायः पृथिव्यायोवा
दिवꣳसत्त्यधर्म्मार्व्यानंट् ॥ यश्चापश्चन्द्राःप्प्रंथमोजजानक
स्म्मैदेवायंहविषांविधेम ॥ १०२ ॥ अब्भ्यावंर्त्तस्व । पृथि
विय्यज्ञेनपयंसासह ॥ व्वपान्तेऽअग्निरींषितोऽअंरोहत् ॥ १०३ ॥
अग्नेयत् ॥ अग्नेयत्तेशुक्क्रँय्यच्चन्द्रँय्यत्पूतँय्यच्चंयज्ञियंम् ॥ ३२३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तद्देवेब्भ्योभरामासि ॥ १०४ ॥ इषमूर्ज्जम् ॥ इषमूर्ज्जमुहमि
तऽआदंमृतस्ययोनिम्महिषस्यधाराम् ॥ आमागोषुविशत्त्वा
तनूषुजहामिसेदिमनिरामममीवाम् ॥ १०५ ॥ अग्नेतव ॥
अग्नेतवश्रवोव्वयोमहिभ्राजन्तेऽअर्च्चयोविभावसो ॥ बृह
द्भानोशवसाव्वाजमुक्थ्यन्दधासिदाशुषेकवे ॥ १०६ ॥
पावकवर्च्चाःशुक्रवर्च्चाः ॥ पावकवर्च्चाःशुक्रवर्च्चाऽअनूनवर्च्चाऽ ॥ १२६ ॥ ३२४
उदियर्षिभानुना ॥ पुत्रोमातराविचरन्नुपावसिपृणक्षिरोदसीऽ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उभे ॥ १०७ ॥ ऊर्ज्जोनपात् ॥ ऊर्ज्जोनपाज्जातवेदꣳसुश
स्तिभिर्म्मन्दस्वधीतिभिर्हितः ॥ त्वेऽइषꣳसन्दधुर्भूरिवर्प्प
सश्चित्रोतयोव्वामजाताꣳ ॥ १०८ ॥ इरज्ज्यन्नग्ने । प्प्रथय
स्वजन्तुभिरस्म्मेरायोऽअमर्त्त्य ॥ सदर्शतस्यव्वपुषोव्विराज
सिपृणक्षिसानसिङ्क्रतुम् ॥ १०९ ॥ इष्कर्त्तारमद्ध्वरस्य ॥
इष्कर्त्तारमद्ध्वरस्यप्प्रचेतसङ्क्षयन्तꣳराधंसोमहः ॥ रातिंव्वामस्य

१ निश्चयेन कर्तारम् निष्कर्तारमिति प्राप्ते निशब्दो बहुलम् (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेन क्वचिन्नकारमात्रस्य लोपे इष्कर्तारम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुभगाम्महीमिषन्दधासिसानसिꣳरयिम् ॥ ११० ॥ [1]ऋतावा
नम्महिषं । विश्वदर्शतमग्निꣳसुम्नायंदधिरेपुरोजनाः ॥ श्रुत्क
र्णꣳसुप्रथस्तमन्त्वागिरादैव्यम्मानुषायुगा ॥ १११ ॥ आ
प्यायस्व ॥ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम् ॥ [2]भवा
वाजस्यसङ्गथे ॥ ११२ ॥ सन्ते ॥ सन्तेपयाꣳसिसमुयन्तु
वाजाःसंवृष्ण्यान्यभिमातिषाहः ॥ आप्यायमानोऽअमृ

१ ऋतावानम् । अत्र अश्वरश्मि० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे ऋतशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । २ भवव्वाजस्य इति पदम् । अत्र वाजस्य परे भव इत्यस्य ह्रस्वाकारस्य स चावरूथ्यवाजस्य पायुषु च (शु. य. प्रा. ३ अ. ११० सू.) इत्यनेन दीर्घे भवाव्वाजस्य । तथैव भवापायुर्व्विशोऽअस्याऽअदब्धः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तांयसोमदिविश्श्रवांᳫंस्युत्तमानिंधिष्ष्व ॥ ११३ ॥ आप्प्यांय
स्व । मदिन्तमुसोमुव्विश्श्वैभिरङ्ग्शुभिं÷ ॥ भवांनᳫंसुप्प्रथंस्त्त
मुᳫंसखांवृधे ॥ ११४ ॥ आतें । व्वृत्त्सोमनोंयमत्त्परमाच्चिं
त्त्सधस्त्थांत् ॥ अग्ग्नेत्त्वाङ्कांमयागिरा ॥ ११५ ॥ तुब्भ्यु
न्ताः ॥ तुब्भ्युन्ताऽअङ्गिरस्त्तमुव्विश्श्वां÷सुक्षितयᳫंपृथंक् ॥
अग्ग्नेकामांययेमिरे ॥ ११६ ॥ अग्ग्निश्प्प्रियेषु ॥ अग्ग्निः

१ भवनः इति पदम् । भव इत्येतस्य ह्रस्वाकारस्य नः परे भव च (शु. य. प्रा. ३ अ. १०९ सू.) इत्यनेन दीर्घाकारे कृते भवानः इति पदम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्प्रियेषुधार्मसुकार्मोभूतस्यभव्यंस्य ॥ सुम्म्राडेकोव्विराजति
॥ ११७ ॥ [१६-७] इतिश्रीवाजसनेयसंहितायांद्वादशोऽ
ध्यायः ॥ १२ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥
मयिगृह्णामिपंचदश, ध्रुवास्येकादश, मधुव्वाताऽएकादश,
सम्यक्स्रवंतिनवे,मंमाषड,पांत्वैका,ऽयंपुरःपंच, सप्ताष्टापंचा
शत् [अनु. ७ मं. ५८ अ. १३] ॥ हरिःॐ ॥ मयिं ॥१२५॥ ३२८
गृह्णामि ॥ मयिंगृह्णाम्म्यग्ग्रेंऽअग्निᳬरायस्प्पोषांयसुप्प्रजा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्वायंसुवीरुर्ख़ाय ॥ मामुंदेवताःसचन्ताम् ॥ १ ॥ अपाम्पृ
ष्ठम् ॥ अपाम्पृष्ठमंसियोनिंरग्नेःसंमुद्रम्भितःपिन्वंमानम् ॥
वर्द्धमानोमुहाँ२॥ऽआचपुष्करेदिवोमात्रंयावरिम्णाप्रथंस्व
॥ २ ॥ ब्रह्मंयज्ञानम् ॥ ब्रह्मंयज्ञानम्प्रथमम्पुरस्त्ताद्विसी
मतःसुरुचोवेनऽआंवः ॥ सबुध्न्याऽउपमाऽअंस्यविष्ठाःसत
श्चयोनिमसंतश्चविवंः ॥ ३ ॥ हिरण्यगर्भःसम् ॥ हिरण्य
गर्भःसमंवर्त्ततांग्रेभूतस्यंजातःपतिरेकंऽआसीत् ॥ सदांधार

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाविधेम ॥ ४ ॥ द्रप्प्स
श्चस्कन्द । पृथिवीमनुद्यामिमञ्चयोनिमनुयश्चपूर्व्वः ॥ समा
नँय्योनिमनुसञ्चरन्तन्द्रप्प्सञ्जुहोम्म्यनुसप्तहोत्राः ॥ ५ ॥
नमोस्तु । सर्प्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदि
वितेभ्यः सर्प्पेभ्योनमः ॥ ६ ॥ याऽइषवः ॥ याऽइषवो
यातुधानानाँय्येवावनस्प्पतीँ१॥रनु ॥ येवावटेषुशेरतेतेभ्यः
सर्प्पेभ्योनमः ॥ ७ ॥ येवा ॥ येवामीरोचनेदिवोयेवा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूर्य्यस्यरश्मिम्मषुं ॥ येषांमप्सुसंदस्कृतन्तेब्भ्यं÷सर्प्पेब्भ्योन
मंः ॥ ८ ॥ कृणुष्ष्वपाजं÷ ॥ कृणुष्ष्वपाजंःप्प्रासितिन्नपृत्थ्वीँ
ऽयाहिराजेवामंवाँ२॥ऽइभेन ॥ तृष्ष्वीमनुप्प्रासितिन्द्रूणानो
स्त्तांसिविद्ध्यंरक्षसस्त्तपिंष्ठैः ॥ ९ ॥ तवंब्भ्रमासं÷ ॥ तवंब्भ्र
मासंऽआशुयापंतन्त्यनुंस्प्पृशधृषताशोशुंचानः ॥ तपूंष्ष्य

---

१ सदस्कृतम् । अत्र सदोद्यौर्नमस्कृतग्पिता पथेषु (शु. य. प्रा. ३ अ. ३४ सू.) इत्यनेन यथासंख्यं सदः द्यौः नमः एतेषां विसर्जनीयसंबन्धिनः सस्य क्रमेण कृतं पिता पथः एतेषु पदेषु परेषु षकारः । एवं षकारे कृते ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ककारस्य द्वित्वे प्राप्ते ऋवर्णे (शु. य. प्रा. ४ अ. १११ सू.) इत्यनेन ककारस्य द्वित्वनिषेधः । ३३१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्ग्नेजुह्वापतङ्गानसांन्दितोव्विसृंजव्विष्वंगुल्काः ॥ १० ॥ प्रति
स्पशंः ॥ प्रतिस्पशोव्विसृंजतूर्णिंतमोभवांपायुर्व्विशोऽअ
स्याऽअदंब्धः ॥ योनोदूरेऽअघशंꣳसोयोऽअन्त्यग्ग्नेमाकिंष्ट्टे
व्यथिरादंधर्षीत् ॥ ११ ॥ उदंग्ग्ने । तिष्ठप्प्रत्त्यातंनुष्व्वन्न्यू
मित्राँ२॥ऽओषतात्तिग्ग्महेते ॥ योनोऽअरांतिꣳसमिधानच
क्रेनीचातन्धंक्क्ष्यतसन्नशुष्कंम् ॥१२॥ ऊर्द्ध्वोभंव ॥ ऊर्द्ध्वोभंव
प्प्रातिंविद्ध्याद्ध्यस्म्मदाविष्कृंणुष्व्वदैव्व्यांन्न्यग्ग्ने ॥ अवंस्त्थिरा

१ माकिष्टे । अत्र वृन्दारुर्माकिः (शु. य. प्रा. ३ अ. ७४ सू.) इत्यनेन विसर्गस्य सस्य षत्वे द्वित्वे रूपम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तंनुहियातुजूनांञ्जामिमजामिम्प्रमृंणीहिशत्रून् ॥ अग्नेष्ट्वा

तेजंसासादयामि ॥ १३ ॥ अग्निर्म्मूर्द्धा । दिवःकुकुत्पतिः

पृथिव्याऽअयम् ॥ अपाᳬरेताᳬसिजिन्वति ॥ इन्द्रंस्यत्त्वौज

सासादयामि ॥ १४ ॥ भुवोयज्ञस्य ॥ भुवोयज्ञस्यरजंसश्चने

तायत्रानियुद्भिःसचसेशिवाभिः ॥ दिविमूर्द्धानंन्दधिषेस्वर्षा

ञ्जिह्वामंग्नेचकृषेहव्यवाहम् ॥ १५ ॥ [१५-१] ध्रुवासि । ३३३

धरुणास्तृताविश्वकर्म्मणा ॥ मात्त्वांसमुद्रऽउद्वधीन्मासुप

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

णर्णोद्व्यंथमानापृथिवीन्दृंᳪह ॥ १६ ॥ प्रजापंतिष्ट्वा । साद
यत्त्वपाम्पृष्ठेसंमुद्रस्येमंन् ॥ व्यचंस्वतीम्प्रथंस्वतीम्प्रथंस्वपृथि
व्यसि ॥ १७॥ भूरंसि ॥ भूरंसिभूमिंरस्यदिंतिरासिविश्वधांया
विश्वंस्यभुवंनस्यधुर्त्री ॥ पृथिवींऽयंच्छपृथिवीन्दृंᳪहपृथिवी
म्माहिंᳪसीः ॥ १८ ॥ विश्वंस्म्मैप्प्राणायं ॥ विश्वंस्म्मैप्प्रा
णायांपानायंव्व्यानायोंदानायंप्प्रतिष्ठायैचरित्त्रांय ॥ अग्निष्ट्वा

१ प्रजापतिष्ट्वा । सकारपरे च (शु. य. प्रा. ३ अ. ७८ सू.) इत्यनेन सकारः परो यस्मादेकाक्षरात्तस्यैकाक्षरे प्रत्यये विसर्जनीयसकारस्य षत्वम् । अत्र प्रजापतिशब्दे पाधातोः पतिशब्दस्य सस्य षकारे ष्टुत्वे द्वित्वे रूपम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भिपांतुमुह्यास्वुस्त्याच्छुर्द्दिषाशन्तंमेनुतयांदेुवतंयाङ्गिरुस्वद्धु

वासींद ॥ १९ ॥ काण्डांत्काण्डात्प्रुरोहंन्ती ॥ काण्डां

त्काण्डात्प्रुरोहंन्तीपरुंषःपरुषुस्प्परिं[1] ॥ एुवानोंदूर्वेप्प्रतंनुस

हस्रेंणशुतेनंच ॥ २० ॥ याशुतेनं । प्प्रतुनोषिंसुहस्रेंणाव्रिरो

हंसि ॥ तस्यांस्तेदेवीष्टकेविधेमंहुविषांव्वुयम् ॥ २१ ॥ यास्तें ॥

यास्तेंऽअग्ग्नेसूर्य्येरुचोदिवंमातुन्वन्तिंरुश्मिमाभिंः ॥ ताभिं

३३५

१ परुषः परुषस्प्परि। अत्र समानपदे च (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन सकारे प्राप्ते न परुषः परुषि (शु. य. प्रा. ३ अ. ३७ सू.) इत्यनेन परुषि परे पूर्वपरुषशब्दघटितविसर्जनीयस्य सकारो निषिध्यते। अतो न सकारः किन्तु विसर्ग एव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्नौऽअद्यसर्व्वाभीरुचेजनायनस्कृधि ॥ २२ ॥ यावः ॥ या
वौदेवाःसूर्य्येरुचोगोष्ष्वश्श्वेषुयारुचः ॥ इन्द्राग्ग्नीताभिःस
र्व्वाभीरुचन्नोधत्तबृहस्प्पते ॥ २३ ॥ विराड्ज्योतिः ॥ वि
राड्ज्योतिरधारयत्त्स्वराड्ज्योतिरधारयत् ॥ प्रजापतिष्ट्वासा
दयतुपृष्ठेपृथिव्व्याज्ज्योतिष्मतीम् ॥ विश्श्वस्म्मैप्प्राणायापाना
यव्व्यानायविश्श्वञ्ज्योतिर्य्यच्छ ॥ अग्ग्निष्टेधिपतिस्तयादेवत

१ अग्निष्टे। अग्निस्ते इति पदम्। अत्र वायुरग्निरग्नेरेकाक्षरे (शु. य. प्रा. ३ अ. ७७ सू.) इत्यनेन एकाक्षरे ते पदे परे अग्निशब्दघटितस्य सस्य षत्वे ष्टुत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन टस्य द्वित्वम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

याङ्गिरस्वद्ध्रुवासीद ॥ २४ ॥ मधुश्च ॥ मधुश्चमाधवश्चवास
न्तिकावृतूऽअग्नेरन्तꣳश्लेषोसिकल्पेतान्द्यावापृथिवीकल्प
न्तामापऽओषधयꣳकल्पन्तामग्नयꣳ पृथङ्ममज्ज्यैष्ठ्यायस
व्रताꣳ ॥ येऽअग्नयꣳसमनसोन्तराद्यावापृथिवीऽइमे ॥ वास
न्तिकावृतूऽअभिकल्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तु
तयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ २५ ॥ अषाढासि ॥ अषा

१ अभिसंविशन्तु । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) अनेन प्राप्तस्य षकारस्य अनुसन्तनोतुबृहस्पतिसुतस्यसुसमिन्द्राय-सुसन्दृशमभिसत्वाऽभिसंविशन्तु० (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे षत्वाभावः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

याङ्गिरस्वद्ध्रुवासीद ॥ २४ ॥ मधुंश्च ॥ मधुंश्चमाधंवश्चव्वासं

न्तिकावृतूऽअग्नेरंन्तःश्लेषोसिकल्प्पेंतान्द्यावांपृथिवीकल्प्पं

न्तामापऽओषंधयःकल्प्पंन्तामग्नयः पृथङ्ममज्ज्यैष्ठ्यायस

व्व्रंताः ॥ येऽअग्नयःसमंनसोन्तराद्यावांपृथिवीऽइमे ॥ व्वासं

न्तिकावृतूऽअंभिकल्प्पंमानाऽइन्द्रंमिवदेवाऽअंभिसंविंशन्तु

तयांदेवतंयाङ्गिरस्वद्ध्रुवेसींदतम् ॥ २५ ॥ अषाढासि ॥ अषां

१ अभिसंविशन्तु । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) अनेन प्राप्तस्य षकारस्य अनुसन्तनोतुर्बृहस्पतिसुतस्यसुसमिन्द्राय-सुसन्दृशमभिसत्वाऽभिसंविशन्तु० (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे षत्वाभावः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

 ढासिसहंमानासहुस्वारांतीᳬसहंस्वपृतनायतः ॥ सुहस्त्रंवीर्य्या
 सिसामांजिन्व ॥ २६ ॥ [११-२] मधुव्वाताᳬ ॥ मधुव्वाताऽऋ
तायतेमधुंक्क्षरन्तिसिन्धंवᳬ ॥ माद्ध्वीर्न्नᳬसन्त्वोषंधीᳬ ॥ २७ ॥
मधुनक्तम् ॥ मधुनक्तमुतोषसोमधुंमत्त्पार्त्थिवꣳरजः ॥ म
धुद्यौरंस्त्तुनᳬपिता ॥ २८ ॥ मधुंमान्नᳬ ॥ मधुंमान्नोव्वनस्प्पति
र्म्मधुंमाँ२॥ऽअस्त्तुसूर्य्यः ॥ माद्ध्वीर्ग्गावोंभवन्तुनᳬ ॥ २९ ॥
अपाङ्गम्भंन् ॥ अपाङ्गम्भंन्त्सीदुमात्त्वासूर्य्योभितांप्प्सीन्मा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्निर्व्वैश्वानरः ॥ अच्छिन्नपत्राःप्रजाऽअंनुवीक्षस्वानुंत्त्वादि
व्यावृष्टिं÷सचताम् ॥ ३० ॥ त्रीन्त्संमुद्रान् ॥ त्रीन्त्संमुद्रा
न्त्समंसृपत्त्स्वर्ग्गांनुपाम्पतिर्वृंषभऽइष्टंकानाम् ॥ पुरींषंव्वसांनः
सुकृतस्यंलोकेतत्रंगच्छयत्रपूर्व्वंपरैताः ॥ ३१ ॥ महीद्यौः ।
पृंथिवीचंनऽइमँय्यज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः
॥ ३२ ॥ व्विष्णोःकर्म्माणि । पश्यतयतोंव्रतानिंपस्पशे ॥ ३३१
इन्द्रंस्ययुज्ज्यःसखां ॥ ३३ ॥ ध्रुवासि । धरुणेतोजज्ञेप्रथम

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मेभ्योयोनिभ्योऽअधिजातवेदाः ॥ सगायत्र्यात्रिष्टुभानुष्टु
भाचदेवेभ्योहव्यंवहतुप्रजानन् ॥ ३४ ॥ इषेराये । रमस्व
सहसेद्युम्नऽऊर्जेऽअपत्याय ॥ सम्राडसिस्वराडसिसार
स्वतौत्वोत्सौप्रावताम् ॥३५॥ अग्नेयुक्ष्व ॥ अग्नेयुक्ष्वाहि
येतवाश्वासोदेवसाधवः ॥ अरंवहन्तिमन्यवे ॥ ३६ ॥
युक्ष्वाहि। देवहूतमाँ२॥ऽअश्वाँ२॥ऽअग्नेरथीरिव॥निहोता ॥१३१
पूर्व्यःसदः ॥ ३७ ॥ [११-३] सम्यक्स्रवन्ति । सरितो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नधेनाऽअन्तर्हृदामनंसापूयमानाः ॥ घृतस्यधाराऽअभिचाक
शीमिहिरण्ययोव्वेतसोमद्ध्येऽअग्नेः ॥ ३८ ॥ ऋचेत्त्वा ।
रुचेत्त्वाभासेत्त्वाज्ज्योतिषेत्त्वा ॥ अभूदिदंव्विश्श्वस्यभुवनस्य
व्वाजिनमग्नेर्व्वैश्श्वानरस्यंच ॥ ३९ ॥ अग्निर्ज्योतिषा ॥
अग्निर्ज्योतिषाज्ज्योतिष्म्मान्रुक्क्मोव्वर्च्चसाव्वर्च्चस्वान् ॥ सहस्र
दाऽअसिसहस्रायत्त्वा ॥ ४० ॥ आदित्त्यङ्गर्ब्भम् ॥ आदित्त्य

१ यत्र रकारपरस्य हकारपरस्य च स्पर्शवर्णस्य द्वित्वं तत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ज्ञेयम्। अस्य परं तु रेफहकाराभ्याम् इत्यनेन विधीयमानस्य द्वित्वस्यापवादभूतत्वात्। यथा संवर्चसा। गर्भम्। पार्थिवम्। चक्षुर्म्मित्रस्य। अग्निर्ज्योतिषा।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ङ्गर्ब्भम्पयंसासमङ्ग्धिसहस्रंस्यप्रतिमांव्विश्वरूपम् ॥ परिंवृङ्ग्धि

हरंसामाभिमᳪंस्थाःशतायुंषङ्कृणुहिचीयमानः ॥४१॥ व्वातं

स्यजूतिं । व्वरुंणस्यनाभिमश्वंञ्जज्ञानᳪंसंरिरस्यमद्ध्ये ॥ शिशुं

न्नदीनांᳪंहरिमाद्रिंबुद्ध्नमग्नेमाहिᳪंसीःपरमेव्योमन् ॥४२॥

अजंस्रमिन्दुम् ॥ अजंस्रमिन्दुमरुषम्भुरण्युमग्निमीडे

---

१ मंस्थाः । अत्र संयोगाद्यश्च यो भवेत् । (या. शि.) यत्र संयोगाद्योऽनुस्वारो मात्रिको द्विमात्रिको वा वर्णो भवेत्तत्र ऋवर्णव्यञ्जनादिगं संयोगाद्यं वर्जयित्वा ह्रस्व एव बोध्यः । संयोगात्पूर्वः संयोगपूर्वः इति समासः । अत्र नानुस्वारः (शु. य. प्रा. ४ अ. १०९ सू.) लिङ्गम् । २ वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः । (या. शि.) मात्रिकेऽ (ह्रस्ववर्ण पूर्वे) नुस्वारे सो द्विमात्रिको लेख्यो बोध्य उच्चारणीयश्च । अत्र अनुस्वारो ह्रस्वपूर्वोऽध्यर्धमात्रा पूर्वा चार्धमात्रेति (शु. य. प्रा. ४ अ. १४८ सू.) प्रमाणम् । ३ द्विमात्रिके मात्रिकः स्यादिति (या. शि.) । यत्रानुस्वारात्पूर्ववर्णो द्विमात्रिकस्तत्र मात्रिकोऽ (ह्रस्वः ᳪइत्याकारकः) नुस्वारो विधेयो ह्रस्वोच्चारणीयश्च । अत्र दीर्घाद्दर्धमात्रा पूर्वा चाध्यर्धा (शु. य. प्रा. ४ अ. १४९ सू.) लिङ्गम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्व्वचित्तिन्नमोभिः ॥ सपर्व्वभिर्ऋतुशः कल्प्पमानो गाम्माहिं
सीरदितिंविराजम् ॥ ४३ ॥ वरूत्रीन्त्वष्टुः ॥ वरूत्रीन्त्व
ष्टुर्व्वरुणस्यनाभिमविञ्जज्ञानाᳬंरजसः परस्म्मात् ॥ महीᳬं
साहस्रीमसुरस्यमायामग्नेमाहिंसीः परमेव्योमन् ॥ ४४ ॥
योऽअग्निः ॥ योऽअग्निरग्नेरध्यजायतशोकात्पृथिव्याऽउत
वादिवस्परि ॥ येनप्रजाविश्वकर्म्माजजानतमग्नेहेडः परि
तेवृणक्तु ॥ ४५ ॥ चित्रन्देवानाम् ॥ चित्रन्देवानामुदगाद ३४३

सं. २३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नीकुञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्ग्नेः ॥ आप्प्राद्यावापृथिवीऽअन्त
रिक्षꣳसूर्य्यऽआत्मा जगतस्तस्थुषश्च ॥ ४६ ॥ [९-४]
इमम्मा । हिꣳसीर्द्विपादम्पशुꣳसहस्राक्षो मेधायचीयमानः ॥
मयुम्पशुम्मेधमग्ग्ने जुषस्व तेन चिन्न्वानस्तन्न्वो निषीद ॥ मयु
न्ते शुगृच्छतु यन्द्विष्मस्तन्ते शुगृच्छतु ॥ ४७ ॥ इमम्मा ।
हिꣳसीरेकशफम्पशुङ्कनिक्रदंव्वाजिनंव्वाजिनेषु ॥ गौरमार ॥ १२२ ।

१ यत्र स्वरात्परस्य संयोगस्याद्यक्षरस्य द्वित्वं दृश्यते तत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन ज्ञेयम् । चिन्न्वानः । संव्व्यच्यमानः । जनित्रम् । वरुणस्याग्ग्नेः । परञ्च स संयोगः सजातीयकण्ठ्यतालव्यदन्त्यमूर्धन्यौष्ठ्यवर्णानां न चेत् तत्र तु द्वित्वाभाव एव यथा इमम्मा । गौरन्ते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ण्ण्यमनुंतेदिशामितेनंचिन्वानस्त्तन्वोनिषींद ॥ गौरन्तेशुगृं
च्छतुयन्द्विष्मस्त्तन्तेशुगृंच्छतु ॥ ४८ ॥ इमꣳसाहस्रम् ॥
इमꣳसाहस्रꣳशतधांरमुत्संव्यच्यमांनꣳसरिरस्यमद्ध्ये ॥
घृतन्दुहांनामदितिञ्जनायाग्नेमाहिꣳसीःपरमेव्योमन् ॥ गव
यमांरण्ण्यमनुंतेदिशामितेनंचिन्वानस्त्तन्वोनिषींद ॥ गवय
न्तेशुगृंच्छतुयन्द्विष्मस्त्तन्तेशुगृंच्छतु ॥ ४९ ॥ इममूंर्ण्णा
युं । वरुंणस्यनाभिन्त्वचंम्पशुनान्द्विपदाञ्चतुंष्पदाम् ॥ त्वष्टुंः ३४५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥१३४॥ प्प्रजानांम्प्रथममज्ञ्जनित्रमग्ग्नेमाहिं॑ᳮसीःᳮपरमेव्योमन् ॥ उष्ट्रं॑ ॥ पू. अ. ॥ १३ ॥

मारण्ण्यमनुंतेदिशामितेनांचिन्न्वानस्तन्न्वोनिषीद ॥ उष्ट्रन्ते

शुगृंच्छतुयन्द्विष्ष्मस्तन्तेशुगृंच्छतु ॥ ५० ॥ अजोहि ॥ अजो

ह्यग्ग्नेरजंनिष्टशोकात्त्सोऽअंपश्श्यज्जनितारमग्ग्रे ॥ तेनंदेवादेव

तामग्ग्रंमायँस्तेनरोहंमायन्नुपमेद्ध्यांसःᳮ ॥ शरभमांरण्ण्यमनुंते

दिशामितेनांचिन्न्वानस्तन्न्वोनिषीद ॥ शरभन्तेशुगृंच्छतुय ॥ १३४ ॥

न्द्विष्ष्मस्तन्तेशुगृंच्छतु ॥ ५१ ॥ त्वँय्यंविष्ठ । दाशुषोनॄँः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पाहिशृणुधीगिरं÷ ॥ रक्षातोकमुतत्क्मना ॥ ५२ ॥ [६-५]
अपान्त्वा ॥ अपान्त्वेम[1]न्त्सादयाम्म्युपान्त्वोद्मन्त्सादयाम्म्यु
पान्त्वाभस्म्मन्त्सादयाम्म्युपान्त्वाज्ज्योतिषिसादयाम्म्युपा
न्त्वायनेसादयाम्म्यर्णवेत्त्वासदनेसादयामिसमुद्रेत्त्वासदने
सादयामिसरिरेत्त्वासदनेसादयाम्म्युपान्त्वाक्क्षयेसादयाम्म्यु
पान्त्वासाधिषिसादयाम्म्युपान्त्वासदनेसादयाम्म्युपान्त्वासध
स्त्थेसादयाम्म्युपान्त्वायोनौसादयाम्म्युपान्त्वापुरीषेसादया

१ एमनि इति पदम् । निशब्दो बहुलम् (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेन क्वचिन्निकारघटितेकारस्यापि लोपः । एवं लोपे एमन् भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म्म्यपान्त्वापाथंसिसादयामिगायत्रेणत्त्वाच्छन्दसासादयामि
त्रैष्टुंभेनत्त्वाच्छन्दंसासादयामिजागंतेनत्त्वाच्छन्दंसासादया
म्म्यानुष्टुभेनत्त्वाच्छन्दंसासादयामिपाङ्क्तेनत्त्वाच्छन्दंसासाद
यामि ॥ ५३ ॥ [१-६] अयम्पुरः ॥ अयम्पुरोभुवस्त्तस्यं
प्प्राणोभौवायनोव्वंसन्तःप्प्राणायनोगांयत्रीव्वांसन्तीगांयत्र्यै
गांयत्रङ्गांयत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्रिवृतोरथन्तरंव्वसिष्ठऽ
ऋषिंःप्प्रजापंतिगृहीतयात्त्वयाप्प्राणङ्गृह्णामिप्प्रजाब्भ्यंः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ ५४ ॥ अयन्दक्षिणा । विश्वकर्म्मा तस्य मनो वैश्वकर्म्मणङ्ग्री
ष्मो मानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभः स्वारꣳ स्वारादन्तर्य्यामोन्त
र्य्यामात्पञ्चदशः पञ्चदशाद्बृहद्बृहद्भरद्वाजऽऋषिः प्रजापतिगृही
तया त्वया मनो गृह्णामि प्रजाभ्यः ॥ ५५ ॥ अयम्पश्चात् ॥
अयम्पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाश्चाक्षु
ष्यो जगती वार्षी जगत्याऽऋक्समम् ऋक्समाच्छुक्रः शुक्रात्सप्त ३४१
दशः सप्तदशाद्वैरूपञ्जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चक्षुर्गृह्णामिप्रजाभ्यः ॥ ५६ ॥ इदमुत्तरात् ॥ इदमुत्त
रात्स्वस्तस्यश्रोत्रꣳसौवꣳशरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टुभंऽऐ
डमैडान्मन्थीमन्थिनंऽएकविꣳशऽएकविꣳशाद्वैराजंविश्वा[1]मि
त्रऽऋषिःप्रजापतिगृहीतयात्वयाश्रोत्रङ्गृह्णामिप्रजाभ्यः
॥ ५७ ॥ इयमुपरिमतिस्तस्यैवाङ्[2]मात्याहेमन्तोवाच्यायनःप
ङ्क्तिर्हैमन्तीपङ्क्त्यैनिधनवन्निधनवतऽआग्रयणऽआग्रयणात्त्रि ॥ १३६ ॥

१ विश्वामित्रः । अत्र नरहामित्रेषु च (शु. य. प्रा. ३ अ. १०३ सू.) इत्यनेन मित्रशब्दपरे विश्वशब्दस्य दीर्घाकारः । २ वाक्मात्या इति पदम् । पञ्चमेऽपञ्चमम् । (शु. य. प्रा. ४ अ. १२१ सू.) पञ्चमे स्पर्शे प्रत्यये परेऽपञ्चमः पञ्चममापद्यते । इत्यनेन ककारस्य पञ्चमे स्वरे पञ्चमः । वाङ्मात्या ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

णवत्त्रयस्त्रिꣳशौत्त्रिणवत्त्रयस्त्रिꣳशाब्भ्याꣳशाक्क्वरैवतेव्विश्श्वक
र्म्मऽऋषिं÷प्प्रजापतिगृहीतयात्त्वयाव्वाचङ्गृह्णामिप्प्रजाब्भ्यो
लोकन्ताऽइन्द्रम् ॥ ५८ ॥ [५-७] इतिश्रीवाजसनेयसंहि
तायांत्रयोदशोऽध्यायः ॥ १३ ॥ श्रीवेदपुरुषायनमः ॥
अनुवाकसूत्रम् ॥ ध्रुवक्षितिर्षट्, सजूर्ऋतुभिर्द्विका, मूर्द्धाव्वयो
द्विका, इन्द्राग्नीऽअव्यथमानाꣳषडा, युमैंषडा, शुक्त्रिवृद्देका, ३५१

१ अध्यायः १२-लोकंपृण. १ । ताऽअस्य. २ । इन्द्रंविश्वाः. ३ ॥ इति प्रतीकानि ॥
५४ ५५ ५६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्नेर्भागोसिचतुष्कै,कयाचतुष्का,ष्टावेकत्रिꣳशत् [अ. १४
मं. ३१ अनु. ८] ॥ हरिः ॐ ॥ ध्रुवाक्षितिर्द्ध्रुवयोनिः ॥
ध्रुवाक्षितिर्द्ध्रुवयोनिर्द्ध्रुवासिद्ध्रुवँय्योनिमासीदसाधुया ॥ उक्ख्य
स्यकेतुम्प्रथमञ्जुषाणाअश्विनाद्ध्वर्य्यूसादयतामिहत्त्वा ॥ १ ॥
कुलायिनीघृतवती ॥ कुलायिनीघृतवतीपुरन्धिःस्योनेसीदुस
दनेपृथिव्याः ॥ अभित्त्वारुद्द्रावसवोगृणन्त्विमाब्रह्मपीपि

१ ध्रुवयोनिः ॥ अत्र समानपदे ऋषरेभ्यः स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ६२ सू.) इत्यनेन णत्वप्राप्तौ इन्द्राग्नी चित्रभानो० (य. शु. प्रा. ३ अ. ९३ सू.) इत्यनेन णत्वनिषेधः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ह्रिसौ भंगायाश्विनांद्धुरुर्य्यूंसांदयतामिहत्त्वां ॥ २ ॥ स्वैर्द्दक्क्षैः ॥
स्वैर्द्दक्क्षैर्द्दक्क्षेपितेहसींदद्देवानांᳬसुम्नेबृहतेरणांय ॥ पितेवैधि
सूनवऽआसुशेवांस्स्वावेशातन्न्वासांविंशस्वाश्विनांद्धुरुर्य्यूंसांदयता
मिहत्त्वां ॥ ३ ॥ पृथिव्याःपुरीषम् ॥ पृथिव्याःपुरीषमुस्य
प्प्सोनामतान्त्वाविश्वेंऽअभिगृंणन्तुदेवाः ॥ स्तोमंपृष्ठाघृतवं
तीहसींदप्प्रजावंदस्म्मेद्द्रविणायंजस्वाश्विनांद्धुरुर्य्यूंसांदयतामि
हत्त्वां ॥ ४ ॥ अदिंत्त्यास्त्त्वा । पृष्ठेसांदयाम्म्यन्तारिंक्षस्यधुर्त्रीं २५३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रिष्टुम्भंनीन्द्रिशामधिपत्क्नीम्भुवनानाम् ॥ ऊर्म्मिर्द्रप्सोऽ

अपामसिविश्वकर्म्मातऽऋषिरश्विनांध्वर्यूसादयतामिहत्वां
॥५॥ शुक्रश्च ॥ शुक्रश्चशुचिश्चग्रैष्म्मावृतूऽअग्नेरन्तःश्लेषो
सिकल्पेतान्द्यावापृथिवीकल्पन्तामापऽओषधयःकल्पन्ता
मग्नयःपृथङ्ममज्ज्यैष्ठ्यायसव्रताः ॥ येऽअग्नयःसमनसो
न्तराद्यावापृथिवीऽइमे ॥ ग्रैष्म्मावृतूऽअभिकल्पमानाऽइन्द्र
मिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[६-१]सजूर्ऋतुभिंः।सजूर्विधाभिंःसजूर्देवैःसजूर्देवैर्वयोनाधै
रग्नयेत्त्वावैश्वानरायाश्विनांध्वर्यूसांदयतामिहत्त्वांसजूर्ऋतु
भिंःसजूर्विधाभिंःसजूर्वसुंभिःसजूर्देवैर्वयोनाधैरग्नयेत्त्वावै
श्वानरायाश्विनांध्वर्यूसांदयतामिहत्त्वांसजूर्ऋतुभिंःसजूर्वि
धाभिंःसजूरुद्रैःसजूर्देवैर्वयोनाधैरग्नयेत्त्वावैश्वानरायाश्वि
नांध्वर्यूसांदयतामिहत्त्वांसजूर्ऋतुभिंःसजूर्विधाभिंःसजूरां
सं. २४ दित्यैःसजूर्देवैर्वयोनाधैरग्नयेत्त्वावैश्वानरायाश्विनांध्वर्यूसां ३५५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि.

पू. अ.

॥१३९॥ दयतामिहत्त्वांसजूर्ऋतुभिःसजूर्व्विधाभिःसजूर्व्विश्वैर्द्देवैःस ॥ १४ ॥
जूर्द्देवैर्व्वयोनाधैरग्नयेत्त्वावैश्वानरायाश्विनाध्वर्य्यूसादयतामि
हत्त्वा ॥ ७॥ प्राणम्मे । पाह्यपानम्मेपाहिव्यानम्मेपाहिचक्षु
र्म्मऽउर्व्याव्विभाहिश्रोत्रम्मेश्लोकय ॥ अपःपिन्वौषधीर्ज्जिन्व
द्विपादवचतुष्पात्पाहिदिवोवृष्टिमेरय ॥ ८ ॥ [२-२] मूर्द्धा
वयः । प्रजापतिश्छन्दःक्षत्रंव्वयोमयन्दञ्छन्दोविष्टम्भो ॥ १३९ ॥
वयोधिपतिश्छन्दोविश्वकर्म्मावयःपरमेष्ठीच्छन्दोबस्तो

३५६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्वयो॑व्विवलञ्छन्दो॒व्वृष्णि॑र्व्वयो॑व्विशालञ्छन्दः॑ पुरु॑षो॒व्वय॑स्त
न्द्रञ्छन्दो॑ व्याघ्रो॒व्वयो॒नाधृ॑ष्टञ्छन्दः॑ सिंहो॒व्वय॑श्छदिश्छ
न्दः॑ पष्ठवाड्वयो॑ बृहतीच्छन्द॑ऽउक्षा व्वयः॑ ककुप्छन्द॑ऽऋषभो
व्वयः॑ सतोबृहतीच्छन्दो॑नड्वान्व्वयः॑ ॥९॥ अनड्वान्व्वयः॑ । पङ्क्ति
श्छन्दो॑ धेनुर्व्वयो॒ जगतीच्छन्द॑स्त्र्यविर्व्वय॑स्त्रिष्टुप्छन्दो॑ दित्य
वाड्वयो॑ व्विराट्छन्दः॑ पञ्चाविर्व्वयो॑ गायत्रीच्छन्द॑स्त्रिवत्सो॒व्वय॑ऽउ
ष्णिक्छन्द॑स्तुर्य्यवाड्वयो॑नुष्टुप्छन्दो॑ लो[१]कन्ताऽइन्द्रम् ॥१०॥ ३९७

१ अध्यायः १२ लोकंपृण. १ ताऽअस्य. २ । इन्द्रंविश्वाः. ३ ॥ इति प्रतीकानि ॥
५४ ५५ ५६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[२-३] इन्द्राग्नीऽअव्यथमानाम् ॥ इन्द्राग्नीऽअव्यं
थमानामिष्टकान्दृꣳहतँ युवम् ॥ पृष्ठेन द्यावापृथिवीऽअन्त
रिक्षञ्च विबाधसे ॥ ११ ॥ विश्वकर्म्मा त्त्वा । सादयत्त्वन्त
रिक्षस्य पृष्ठे व्यचस्वतीम्प्रथस्वतीमन्तरिक्षँ यच्छान्तरिक्ष
न्दृꣳहान्तरिक्षम्माहिꣳसीः ॥ विश्वस्मै प्राणायापानाय
व्यानायोदानाय प्रतिष्ठायै चरित्राय ॥ वायुष्ट्वाभिपातु मह्यास्व ॥ १४० ॥
स्त्या च्छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवासीद ॥ १२ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शतम् ॥ ७०० ॥ राज्ञ्यंसि ॥ राज्ञ्यंसिप्प्राचीदिग्ग्विराडंसि
दक्षिणादिक्सम्म्राडंसिप्प्रतीचीदिक्स्वराडस्युदींचीदिगधिप
त्न्यसिबृहतीदिक् ॥ १३ ॥ व्विश्वकंर्म्मात्त्वा । सादयत्त्व
न्तरिक्क्षस्यपृष्ठेज्ज्योतिंष्म्मतीम् ॥ व्विश्वंस्म्मैप्प्राणायांपानाय
व्यानायव्विश्वञ्ज्योतिंर्य्यच्छ ॥ व्वा[1]युष्ट्टेधिंपतिस्त्तयांदेवतंया
ङ्गिरस्वद्ध्रुवासींद ॥ १४ ॥ नभंश्च । नभस्यश्च्वार्षिकावृतूऽ

[1] वायुष्टे। अत्र वायुस्ते इति पदम्। "वायुरग्निरग्नेरेकाक्षरे" (शु. य. प्रा. ३ अ. ७७ सू.) इत्यनेन एकाक्षरे पदे परे वायुः अग्निः अग्नेः एतेषां विसर्गस्य षत्वं भवति। ततः ष्टुत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन द्वित्वे रूपम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अग्नेरन्तःश्लेषोसिकल्पेतान्द्यावापृथिवीकल्पन्तामापऽओ ॥ १४ ॥
षधयुःकल्पन्तामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः ॥ ये ऽ
अग्नयःसमनसोन्तराद्यावापृथिवीऽइमे ॥ वार्षिकावृतूऽअ
भिकल्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गि
रस्वद्ध्रुवेसीदतम् ॥ १५ ॥ इषश्च ॥ इषश्चोर्ज्जश्चशारदा
वृतूऽअग्नेरन्तःश्लेषोसिकल्पेतान्द्यावापृथिवीकल्पन्तामा
पऽओषधयःकल्पन्तामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

येऽअग्न्नयः॑समंनसोन्तराद्यावापृथिवीऽइमे ॥ शारदावृतूऽ
अभिकल्प्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतया
ङ्गिरस्वद्ध्रुवेसीदतम् ॥ १६ ॥ [६-३] आयुर्म्मे । पाहिप्प्रा
णम्मेपाह्यपानम्मेपाहिव्यानम्मेपाहिचक्क्षुर्म्मेपाहिश्श्रोत्रम्मे
पाहिव्वाचंम्मेपिन्न्वमनोमेजिन्न्वात्क्मानंम्मेपाहिज्ज्योतिर्म्मेय
च्छ ॥ १७ ॥ माच्छन्दः । प्प्रमाच्छन्दः प्प्रतिमाच्छन्दोऽअस्त्री
वयश्[1]च्छन्दःपङ्क्तिश्च्छन्दऽउष्णिक्क्छन्दोबृहतीच्छन्दोनुष्टु

१ अत्र "अस्त्रीवयश्छन्दः" इत्यत्र "चछयोः शम्" इत्यनेन यकारोत्तरवर्तिनो विसर्जनीयस्य शकारः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

येऽअग्न्नयुᳬसमंनसोन्तराद्यावांपृथिवीऽइमे ॥ शारदावृतूऽ
अंभिकल्प्पंमानाऽइन्द्रंमिवदेवाऽअंभिसंविंशन्तुतयांदेवतंया
ङ्गिरस्वद्ध्रुवेसींदतम् ॥ १६ ॥ [६-३] आयुंम्मैं । पाहिप्प्रा
णम्मैंपाह्यपानम्मैंपाहिव्यानम्मैंपाहिचक्क्षुंम्मैंपाहिश्श्रोत्रंम्मे
पाहिव्वाचंम्मेपिन्न्वमनोंमेजिन्न्वात्क्मानंम्मेपाहिज्ज्योतिंम्मेंय
च्छ ॥ १७ ॥ माच्छन्दंः । प्प्रमाच्छन्दंःप्प्रातिमाच्छन्दोंऽअस्त्री
वय[1]श्छन्दंःपङ्क्तिश्छन्दंऽउष्णिणक्छन्दोंबृहतीच्छन्दोंनुष्टुप् ३५१

[1] अत्र "अस्त्रीवयश्छन्दः" इत्यत्र "चछयोः शम्" इत्यनेन यकारोत्तरवर्तिनो विसर्जनीयस्य शकारः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्पच्छन्दोंव्विराट्छन्दोंगायत्रीच्छन्दंस्त्रिष्टुप्पच्छन्दोजगतीच्छन्दः
॥ १८ ॥ पृथिवीच्छन्दः ॥ पृथिवीच्छन्दोन्तरिक्षञ्छन्दो
द्यौश्छन्दः समाश्छन्दोनक्षत्राणिच्छन्दोव्वाक्छन्दोमन
श्छन्दः कृषिश्छन्दोहिरंण्यञ्छन्दोगौश्छन्दोजाच्छन्दो
श्वश्छन्दः ॥ १९ ॥ अग्निर्द्देवता ॥ अग्निर्द्देवताव्वातोदेव
तासूर्य्योंदेवताचन्द्रमादेवताव्वसंवोदेवतारुद्रादेवतादित्यादेव
तामरुतोदेवताव्विश्वेदेवादेवताबृहस्पतिर्द्देवतेन्द्रोदेवताव्वरुणो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवता ॥ २० ॥ मूर्द्धासि ॥ मूर्द्धासिराड्ध्रुवासिधरुणाधर्त्र्यसि
धरणी ॥ आयुषेत्त्वावर्च्चसेत्त्वाकृष्यैत्त्वाक्षेमायत्त्वा ॥ २१ ॥
यन्त्रीराट् ॥ यन्त्रीराड्यन्त्र्यसियमनीध्रुवासिधरित्री ॥ इषेत्त्वो
र्ज्जेत्त्वारय्यैत्त्वापोषायत्त्वालोकन्ताऽइन्द्रम् ॥ २२ ॥ [६-५]
आशुस्त्रिवृत् ॥ आशुस्त्रिवृद्भान्तः पञ्चदशो व्व्योमासप्तदशोधरु
णंऽएकविंशः प्प्रतूर्त्तिरष्टादशस्तपोनवदशोभीवर्त्तः सविंशो

१ अध्याय १२–लोकंपृण. ५४ १–ताऽअस्य. ५५ २। इंद्रंविश्वाः. ३ ५६ ॥ इति प्रतीकानि ॥ २ अभीवर्त्तः। अत्र "अश्वरश्मिमतिसुमतिश्वसुत- चारयघृणिसेदिमेन्द्रियधारयचित्रभङ्गुरवयुनाश्वस्यहृदयघुष्यर्त्तोध्यवताभ्यर्चशक्तिपुरुशचि वकारे" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे अभि इत्यस्य ह्रस्वेकारस्य दीर्घेकारः। ३६३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्वर्च्चौद्वाविꣳशःसम्भरणस्त्रयोविꣳशोयोनिश्चतुर्व्विꣳशोगर्ब्भाः
पञ्चविꣳशऽओजस्त्रिणवःक्रतुरेकत्रिꣳशःप्प्रतिष्ठात्रयस्त्रिꣳशो
ब्रध्नस्यव्विष्टपञ्चतुस्त्रिꣳशोनाकः षट्त्रिꣳशोव्विवर्त्तोष्टाचत्त्वारिꣳ
शोधर्त्रञ्चतुष्टोमः ॥ २३ ॥ [१-६] अग्नेर्भागः ॥ अग्नेर्भा
गोसिदीक्षायाऽआधिपत्यम्ब्रह्मस्पृतन्त्रिवृत्स्तोमऽइन्द्रस्यभा

---

१ बध्नस्य । अत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन द्वित्वम् । न त्वत्र धकारोत्तरवर्तिनो नकारस्य स्ववर्गीयत्वेन स्ववर्गीये चानुत्तमे (शु. य. प्रा. ४ अ. ११५ सू.) इत्यनेन निषेधः । तस्यानुत्तमे एव स्ववर्गीये वर्णपरे निषेधात् । अत्र तु अनुनासिकाश्चोत्तमाः (य. शु. प्रा. १ अ. ८६ सू.) इत्यनेन वर्गोत्तमा ङञणनमाः (वर्गोत्तमसंज्ञकाः) अनुनासिका भवन्ति । इति धकारोत्तरवर्तिनो नकारस्य वर्गोत्तमत्वात्तदतिरिक्तेषु वर्णपरेषु स्ववर्गीयेष्वेव द्वित्वनिषेधो बोध्यः । एवं तत्तत्स्थलेषु ज्ञेयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गोसिविष्णोराधिपत्त्यङ्क्षत्रऽंस्पूतम्पंञ्चदुशस्त्तोमोनूचक्ष्व

साम्भागोसिधातुराधिंपत्त्यञ्जनित्रंऽस्पूतꣳसंप्तदुशस्त्तोमो

मित्रस्यंभागोसिवरुणस्याधिंपत्त्यन्दिवोवृष्टिर्व्वातंस्पूतऽएंक

विꣳशस्त्तोमोव्वसूंनाम्भागः ॥ २४ ॥ व्वसूंनाम्भागः ॥ व्वसूं

नाम्भागोसिरुद्राणामाधिंपत्त्यञ्चतुंष्पात्स्पूतञ्चंतुर्व्विꣳशस्त्तो

मंऽआदित्त्यानांम्भागोसिमरुताामाधिंपत्त्यङ्गर्भास्पूताःपंञ्च

विꣳशस्त्तोमोदित्त्यैभागोसिपूष्णऽआधिंपत्त्यमोजंस्पूतन्त्रिं ३६६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

णवस्त्तोमोदेवस्यंसवितुर्भागोसिबृहस्प्पतेराधिंपत्त्यꣳसमी
चीर्द्दिशंस्पृताश्चंतुष्टोमस्त्तोमोयवानाम्भागः ॥ २५ ॥ यवां
नाम्भागः ॥ यवांनाम्भागोस्ययवानामाधिंपत्त्यम्प्रजास्पृता
श्चंतुश्चत्त्वारिꣳशस्त्तोमंऽऋभूणाम्भागोसिविश्वेंषान्देवानामा
धिंपत्त्यम्भूतꣳस्पृतन्त्रंयस्त्रिꣳशस्त्तोमꣳसहंश्च ॥ २६ ॥ सहं
श्च । सहस्यश्चहैमंन्तिकावृतूऽअग्नेरंन्तःश्लेषोसिकल्प्पेतान्द्या
वांपृथिवीकल्प्पंन्तामापऽओषंधयःकल्प्पंन्तामग्नयःपृथङ्म

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुज्यैष्ठ्यांयसब्ब्रंताꣳ॥ येऽअग्नयꣳसमंनसोन्तराद्यावांपृथिवीऽ इमे ॥ हैमंन्तिकावृतूऽअंभिकल्प्पंमानाऽइन्द्रंमिवदेवाऽअंभि संविंशन्तुतयांदेवतंयाङ्गिरस्वद्ध्रुवेसींदतम् ॥२७॥ [४-७] एकं यास्तुवत । प्प्रजाऽअंधीयन्तप्प्रजापंतिराधिंपतिरासीत्तिसृभिंर स्तुवतब्ब्रह्मांसृज्ज्यतब्ब्रह्मंणस्प्पातिराधिंपतिरासीत्पञ्चभिंरस्तु वतभूतान्यंसृज्ज्यन्तभूतानाम्पतिराधिंपतिरासीत्सप्तभिंरस्तु

१ तिसृभिः। अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षत्वप्राप्तौ "ऋकाररेफारुदयश्च" (शु. य. प्रा. ३ अ. ८३ सू.) इत्यनेन यत्र ऋकारोदयः, रेफोदयः, अरुदयश्च सकारस्तत्र प्रकृत्या स्यात्तेनात्र सस्य ऋकारोदयत्वान्न षत्वम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वतसप्तऽऋषयोसृज्ज्यन्तधाताधिपतिरासीन्नवभिरस्तुवत
॥२८॥ नवभिरस्तुवत। पितरोसृज्ज्यन्तादितिराधिपत्न्यासीदे
कादशभिरस्तुवतऽऋतवोसृज्ज्यन्तार्त्तवाऽअधिपतयऽआसँस्त्र
योदशभिरस्तुवतमासाऽअसृज्ज्यन्तसंवत्सरोधिपतिरासीत्त्प
ञ्चदशभिरस्तुवतक्षत्रमसृज्ज्यतेन्द्रोधिपतिरासीत्तसप्तदशभि
रस्तुवतग्ग्राम्म्याःपशवोसृज्ज्यन्तबृहस्प्पतिरधिपतिरासीन्नव ॥ १४५ ॥
दशभिरस्तुवत॥२९॥नवदशभिरस्तुवत।शूद्द्रार्य्यावसृज्ज्येता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महोरात्रेऽअधिपत्नीऽआस्त्तामेकांविꣳशत्त्यास्त्तुवतैकशफाः
पशवोसृज्ज्यन्तव्वरुणोधिपतिरासीत्त्रयोंविꣳशत्त्यास्त्तुवतक्क्षु
द्राःपशवोसृज्ज्यन्तपूषाधिपतिरासीत्त्पञ्चविꣳशत्त्यास्त्तुवतार
ण्ण्याःपशवोसृज्ज्यन्तव्वायुरधिपतिरासीत्त्सप्तविꣳशत्त्यास्त्तुव
तद्यावापृथिवीव्यैतांव्वसवोरुद्राऽआदित्त्याऽअनुव्यायँस्तऽए
वाधिपतयऽआसन्नवविꣳशत्त्यास्त्तुवत॥३०॥ नवविꣳशत्त्या ३६१
स्त्तुवत ॥ नवविꣳशत्त्यास्त्तुवतव्वनस्प्पतयोसृज्ज्यन्तसोमोधि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पतिरासीदेकंत्रि ᳪ शतास्तुवतप्रजाऽअसृज्यन्तयवाश्चायवा
श्चाधिपतयऽआसँस्त्रयंस्त्रि ᳪ शतास्तुवतभूतान्यशाम्यन्प्रजा
पतिᳪ परमेष्ठ्यधिपतिरासील्लोकन्ताऽइन्द्रम् ॥ ३१ ॥ [४-८]
इतिश्रीवाजसनेयसंहितायांचतुर्दशोऽध्यायः ॥ १४ ॥ श्रीवेद
पुरुषायनमः ॥ अनुवाकसूत्रम् ॥ अग्नेजातान्पञ्च, रश्मिना
सत्यायचतस्रो, राज्ञ्यसिपञ्चा, यंपुरःपञ्चा, ग्निर्मूर्द्धैकोनत्रि ᳪ श, ॥ १४६ ॥

१ अध्यायः १२–लोकंपृण. १–ताऽअस्य. २ । इंद्रविश्वाः. ३ इति प्रतीकानि ॥
॥ मंत्राः ॥ ५४ ५५ ५६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्येनऽऋषयोष्टौ, तपश्चनव, सप्त पञ्चषष्टिः ॥ [अ. १५ मं. ६५
अनु. ७] ॥ हरिः ॐ ॥ अग्नेजातान् ॥ अग्नेजातान्प्रणुदा
नꣳसपत्नान्प्रत्त्यजातान्नुदजातवेदः ॥ अधिनोब्रूहिसुमनाऽअ
हेडँस्तवंस्यामशर्म्मँस्त्रिवरूथऽउद्भौ ॥१॥ सहंसाजातान् ॥ सहं
साजातान्प्रणुदानꣳसपत्नान्प्रत्त्यजाताञ्जातवेदोनुदस्व ॥ अधि
नोब्रूहिसुमनस्यमानोव्वयꣳस्यामप्प्रणुदानꣳसपत्नान् ॥ २ ॥

---

१ प्रणुदानः । अत्र प्रनुदान इति पदम् । अत्र समानपदत्वाभावेन "ऋषरेभ्यः" इत्यनेन णत्वाप्राप्तौ "प्रनेतिनुदातिहि गोमीनाम्" (शु. य. प्रा. ३ अ. ८९ सू.) इत्यनेन प्रशब्दात्परे स्थितानामेतेषां नकारस्य णत्वविधानादत्र णत्वम् । तथा चात्र प्रनुद नः दकारोत्तरवर्तिनः ह्रस्वाकारस्य नकारे परे "धारयोव०" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घाकारः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षोडशीस्तोमः ॥ षोडशीस्तोमऽओजोद्द्रविणञ्चतुश्चत्वारिंश
स्तोमोव्वर्च्चोद्द्रविणम् ॥ अग्नेःपुरीषमस्यप्प्सोनामतान्त्वा
व्विश्वेऽअभिगृणन्तुदेवाः ॥ स्तोमपृष्ठाघृतवतीहसीदप्प्रजावं
दस्म्मेद्द्रविणायंजस्व ॥ ३ ॥ एवश्छन्दः ॥ एवश्छन्दो
व्वरिवश्छन्दःशम्भूश्छन्दःपरिभूश्छन्दऽआच्छच्छन्दो
मनश्छन्दोव्यचश्छन्दःसिन्धुश्छन्दःसमुद्रश्छन्दःस
रिरञ्छन्दःककुप्छन्दस्त्रिककुप्छन्दःकाव्यञ्छन्दोऽअङ्कुप

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ञ्छन्दोक्षरंपङ्क्तिश्छन्दं÷पदपङ्क्तिश्छन्दौविष्टारपङ्क्तिश्छ
न्दं÷क्षुरोभ्रजश्छन्दंऽआच्छच्छन्दं÷प्रच्छच्छन्दं÷ ॥ ४ ॥
आच्छच्छन्दं÷प्रच्छच्छन्दं÷ । सँय्यच्छन्दौविय्यच्छन्दौबृ
हच्छन्दौरथन्तरञ्छन्दौनिकायश्छन्दौविवधश्छन्दोगिर
श्छन्दोभ्रजश्छन्दं÷सꣳस्तुप्छन्दौनुष्टुप्छन्दऽएवश्छ
न्दोवरिवश्छन्दोवयश्छन्दौवयस्कृच्छन्दोविष्पर्द्धाश्छ
न्दौविशालञ्छन्दश्छदिश्छन्दौदूरोहणञ्छन्दस्तन्द्रञ्छ ३७३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्दोऽअङ्काङ्कञ्छन्दः ॥ ५ ॥ [५-१] रश्मिम्मनासत्त्वा
यं । सत्त्यञ्जिन्वप्प्रेतिनाधर्म्मणाधर्म्मञ्जिन्वान्वित्त्यादिवादि
वञ्जिन्वसन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्वप्प्रतिधिनापृथि
व्यापृथिवीञ्जिन्वविष्टम्भेनवृष्ट्यावृष्टिञ्जिन्वप्प्रवयान्हाहर्ज्जि
न्वानुयारात्र्यारात्रीञ्जिन्वोशिजावसुभ्योवसूञ्जिन्वप्प्रकेते
नादित्त्येभ्यऽआदित्त्याञ्जिन्वतन्तुनारायः ॥ ६ ॥ तन्तु
नारायः ॥ तन्तुनारायस्पोषेणरायस्पोषञ्जिन्वसꣳसर्प्पेणश्श्रु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तायंश्श्रुताञ्जिन्वैडेनौषंधीभिरोषंधीर्जिन्वोत्तमेनंतनूभिस्तनू
र्जिन्ववय्योधसाधींतेनाधीतञ्जिन्वाभिजितातेजंसातेजोंजिन्व
॥ ७ ॥ प्रतिपदंसि । प्प्रातिपदैत्त्वानुपदंस्यनुपदेत्त्वासम्पदं
सिसम्पदैत्त्वातेजोंसितेजंसेत्त्वात्रिवृदंसि ॥ ८ ॥ त्रिवृदं
सि । त्रिवृतेत्त्वाप्प्रवृदंसिप्प्रवृतैत्त्वाव्विवृदंसिव्विवृतैत्त्वासवृदंसि
सवृतैत्त्वाक्क्रमोस्याक्क्रमायंत्त्वासङ्क्रमोसिसङ्क्रमायंत्त्वोत्क्रमोस्यु
त्क्रमायत्त्वोत्क्रान्तिरस्युत्क्रान्त्यैत्त्वाधिपतिनोर्ज्जोंर्ज्जञ्जिन्व ३७९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ ९ ॥ [४-२] राज्ञ्यसि ॥ राज्ञ्यसिप्प्राचीदिग्ग्वसवस्ते
देवाऽअधिपतयोग्ग्निर्हेतीनाम्प्प्रतिधर्त्ताञ्त्रिवृत्त्वास्तोमः पृथि
व्याᳬश्रयत्त्वाज्ज्यमुक्क्थमव्यथायैस्तब्भ्नातुरथन्तरᳬसाम
प्प्रतिष्ठित्त्याऽअन्तरिक्क्षऽऋषयस्त्त्वाप्प्रथमजादेवेषुदिवोमा
त्त्रयाव्वरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्श्चतेत्त्वासर्व्वेसंवि
दानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु ॥ १० ॥ व्विरा

३७५

डसि ॥ व्विराडसिदक्क्षिणादिग्ग्रुद्रास्त्तेदेवाऽअधिपतयऽइन्द्रो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हेतीनाम्प्रंतिधुर्त्तापंञ्चदुशस्त्त्वास्त्तोमं÷पृथिव्याॐश्रंयतुप्प्रऽ
उंगमुक्थमव्व्यंथायैस्त्तब्भ्रातुबृहत्त्सामुप्प्रतिंष्ठित्त्याऽअुन्तरिं
क्षुऽऋषंयस्त्त्वाप्प्रथमुजादुवेषुंदुिवोमात्रंयाव्वारिम्मणाप्प्रंथन्तु
व्विधुर्त्ताच्चायमाधिंपतिश्श्चतेत्त्वासर्व्वेसंविदुानानाकंस्यपृष्ठेस्वुर्ग्गें
लोकेयजंमानन्त्रसादयन्तु ॥ ११ ॥ सुम्म्राडंसि । प्प्रतीचीु
दिगांदित्त्यास्त्तेंदुवाऽअधिंपतयोव्वरुंणोहेतीुनाम्प्रंतिधुर्त्तासंप्त ३७७
दुशस्त्त्वास्त्तोमं÷पृथिव्याॐश्रंयतुमरुत्त्वुतीयंमुक्थमव्व्यं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

थायैस्त्तम्ब्नातुवैरूपꣳसामप्प्रतिष्ठित्यै। अन्तरिक्षऽऋषयस्

त्त्वाप्प्रथमजादेवेषुदिवोमात्रयावरिम्णाप्प्रथन्तुविधर्त्ताचा
यमधिपतिश्चतेत्त्वासर्व्वेसंविदानानाकस्यपृष्ठेस्वर्गेलोकेयजमा
नञ्चसादयन्तु ॥ १२॥ स्वराडसि ॥ स्वराडस्युदीचीदिङ्मरुतस्त्ते
देवाऽअधिपतयꣳसोमोहेतीनाम्प्रतिधर्त्तैकविꣳशस्त्वास्त्तो
मंꣳपृथिव्याꣳश्रयतुनिष्केवल्यमुक्थमव्यथायैस्त्तम्ब्नातुवैरा ॥१५०॥
जꣳसामप्प्रतिष्ठित्यै। अन्तरिक्षऽऋषयस्त्त्वाप्प्रथमजादेवे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षुंदिवोमात्त्रंयावरिम्म्णाप्प्रंथन्तुविधर्त्ताचायमधिंपतिश्चतेत्त्वा
सर्व्वेसंविदानानाकंस्यपृष्ठेस्वर्ग्गेलोकेयजंमानञ्चसादयन्तु ।१३।
अधिंपत्न्न्यसि। बृहतीदिग्विश्वेतेदेवाऽअधिंपतयोबृहस्प्पतिर्हे
तीनाम्प्रंतिधर्त्तात्त्रिंणवत्त्रयस्त्रिंशौत्त्वास्त्तोमौपृथिव्याᳬंश्रय
तांवैश्वदेवाग्निमारुतेऽउक्थेऽअव्यंथायैस्त्तब्भ्नीताᳬंशाक्वररै
वतेसामंनीप्प्रतिंष्ठित्त्याऽअन्तरिंक्षऽऋषंयस्त्वाप्प्रथमजादेवे ३७१
सं. २६ षुंदिवोमात्त्रंयावरिम्म्णाप्प्रंथन्तुविधर्त्ताचायमधिंपतिश्चतेत्त्वा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

 सर्व्वैसंविदुानानाकंस्यपृष्ठेस्वुर्गैलुोकेयजंमानन्नसादयन्तु ।१४।
॥१५१॥ [५-३] अुयम्पुरः ॥ अुयम्पुरोहरिंकेशुःसूर्य्यरश्म्मिुस्त्तस्य ॥ १५ ॥
रथगृत्त्सश्चुरथौजाश्चसेनानीग्ग्रामुण्ण्यौ ॥ पुुञ्जिकुुस्त्थुलाचंक्र
तुस्त्थुलाचाप्प्सुरसौदुङ्क्ष्णवं ÷पुशवौहेुतिःपौरुंषेयोव्वुधःप्प्रहैति
स्त्तेब्भ्युोनमौंऽअस्त्तुतेनौवन्तुतेनौमृडयन्तुतेयन्द्विुष्म्मोयश्च्च
नुोद्वेष्टितमैषाुञ्जम्भैदद्ध्मः॥१५॥अुयन्दंक्क्षिुणा।वि्श्वकंर्म्मुा ॥ १५१ ॥
तस्यंरथस्वुनश्चुरथैंचित्रश्चसेनानीग्ग्रामुण्ण्यौ ॥ मेुनुकाचंसहज

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्याचाप्सरसौयातुधानाहेतीरक्षांसिप्रहेतिस्तेभ्योन
मोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमे
षाञ्जम्भेदद्ध्मः ॥ १६ ॥ अयम्पश्चात् ॥ अयम्पश्चाद्विश्वव्यं
चास्तस्यरथप्प्रोतश्चासमरथश्चसेनानीग्ग्रामण्यौ ॥ प्रम्म्लो
चन्तीचानुम्म्लोचन्तीचाप्सरसौव्याग्घ्राहेतिस्सर्प्पाःप्रहेति
स्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्च
नोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥ १७ ॥ अयमुत्तरात् ॥ अयमु ३८१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्तुरात्त्सँ॒ऽउयद्द्वसु॒स्त्तस्यु॒ताक्क्ष्यु॒श्श्चारिष्टनेमिश्श्चसेनानीग्ग्राम
ण्ण्यौ ॥ व्विश्श्वाचींचघृताचींचाप्प्सु॒रसा॒वापोहे॒तिर्व्वात॒ᳬप्प्रहेतिः
स्त्तेब्भ्यो॒नमोऽअस्त्तुतेनोवन्त्तुतेनोमृडयन्त्तुतेयन्द्विष्म्मोयश्श्च
नो॒द्वेष्टितमेषा॒ञ्जम्भेदद्ध्मᳬ॥१८॥ अ॒यम्मु॒परि॥ अ॒यम्मु॒परुर्व्वा
ग्ग्वसु॒स्त्तस्यंसेनु॒जिच्चसु॒षेणश्श्चसेनानीग्ग्राम॒ण्ण्यौ ॥ उ॒र्व्वशीचपू
र्व्वचित्तिश्श्चाप्प्सु॒रसावव॒स्प्फूर्ज्जंह्ले॒तिर्व्विद्द्युत्त्प्रहेति॒स्त्तेब्भ्यो॒नमोऽ
अस्त्तुतेनोवन्त्तुतेनोमृडयन्त्तुतेयन्द्विष्म्मोयश्श्चनो॒द्वेष्टितमेषा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्ञम्भैदद्ध्मः ॥ १९ ॥ [५-४] अग्निर्म्मूर्द्धा । दिवःकुकु
त्पतिः पृथिव्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ २० ॥
अयमग्निः । सहस्रिणोव्वाजस्यशतिनस्पतिः ॥ मूर्द्धाकवी
रयीणाम् ॥ २१ ॥ त्वामग्ने ॥ त्वामग्नेपुष्कराद्ध्यथर्व्वानिर
मन्थत ॥ मूर्द्ध्नोविश्वस्यव्वाघतः ॥ २२ ॥ भुवोयज्ञस्य ॥ भुवोय
ज्ञस्यरजसश्चनेतायत्रानियुद्भिःसचसेशिवाभिः ॥ दिविमूर्द्धा
नन्दधिषेस्वर्षाञ्जिह्वामग्नेचकृषेहव्यवाहम् ॥ २३ ॥ अबोद्ध्य ३८३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्निः । सुमिधाजनांनाम्प्रतिधेनुमिवायतीमुषासम्[1] ॥ युह्वाऽ
इवप्प्रवयामुज्जिहांनाः प्प्रभानवंः सिस्रतेनाकुमच्छं ॥ २४ ॥
अवोचामकवये ॥ अवोचामकवयेमेघ्यांयवचोवन्दारुवृषभा
यवृष्णे ॥ गविंष्ठिरोनमंसास्तोमंमग्नौदिवीवरुक्ममुरुव्यंचमश्रेत् ॥ २५ ॥ अयमिह । प्प्रथमोधायिधातृभिर्होतायजिं
ष्ठोऽअध्वरेष्वीड्यंः ॥ समप्नंवानोभृगंवोविरुरुचुर्वनेंषुचित्रं ॥१५३॥

१ धेनुमिवायतीमुषासम् । अत्र ईम्शब्दात्परस्थ उषशब्दस्य.कारस्य "उषमहोभिर्नक्तेमी०" (शु. य. प्रा. ३ अ. ११८ सू.) इत्यनेन दीर्घः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्विषँव्वांव्विशोविशे ॥ २६ ॥ जनस्यगोपाः ॥ जनस्यगोपाऽअ
जनिष्टजागृविरग्निःसुदक्षःसुवितायनव्यसे ॥ घृतप्रतीको
बृहतादिविस्पृशा[1]द्युमद्विभातिभरतेभ्यःशुचिः ॥ २७ ॥
त्वामग्ने ॥ त्वामग्नेऽअङ्गिरसोगुहाहितमन्वविन्दञ्छिश्रि
याणंव्वनेवने ॥ [2]संजायसेमथ्यमानःसहोमहत्त्वामाहुःसहस

---

१ दिविस्पृशाः । अत्र "भाविभ्यः सः षः समानपदे" इत्यनेन प्राप्तस्य षत्वस्य अनुसंतनोतुबृहस्पतिसुतस्यसुसन्निद्घायसुसन्दृशमभिसत्त्वाऽभिसंविशन्तुसुसस्याऽअतिस्थूलम्मुसलेपत्नीसंयाजानृकतुस्थलाञ्जिसकथो दिविस्पृशा०" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे षत्वनिषेधः । २ सः जायसे । अत्र "व्यञ्जने च" (शु. य. प्रा. ३ अ. १६ सू.) इत्यनेन जायसे परे स इत्यस्य विसर्जनीयस्य लोपे सञ्जायसे इति पदम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्विभ्भ्वांव्विशोविंशे ॥ २६ ॥ जनंस्यगोपाः ॥ जनंस्यगोपाऽअं
जनिष्टजागृंविरग्निःसुदक्षंः सुवितायनव्यंसे ॥ घृतप्रंतीको
बृहतादिंविस्पृशाद्युमाद्विभांतिभरतेभ्युःशुचिंः ॥ २७ ॥
त्वामंग्ने ॥ त्वामंग्नेऽअङ्गिरसोगुहांहितमन्वंविन्दञ्छिश्रि
याणंव्वनेंवने ॥ [2]संजांयसेमथ्यमांनःसहांमहत्त्वामांहुःसहंस

१ दिविस्पृशाः । अत्र "भाविभ्यः सः षः समानपदे" इत्यनेन प्राप्तस्य षत्वस्य अनुसंतनोतुबृहस्पतिसुतस्यसुसमिद्धायसुसन्दृशमभिसत्त्वाऽभिसंविशन्तुसुसस्याऽअतिस्थूलम्मुसलेपत्नीसंयाजानृकतुस्थलाञ्जिसक्थो दिविस्पृशा०" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे षत्वनिषेधः । २ सः जायसे । अत्र "व्यञ्जने च" (शु. य. प्रा. ३ अ. १६ सू.) इत्यनेन जायसे परे स इत्यस्य विसर्जनीयस्य लोपे सञ्जायसे इति पदम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्स्पुत्रमङ्गिरः ॥ २८ ॥ सखायः सम् ॥ सखायः संवः सम्म्य
ञ्चमिषꣳस्तोमञ्चाग्नये ॥ वर्षिष्ठायक्क्षितीनामूर्ज्जोनप्त्रेसहस्व
ते ॥ २९ ॥ सꣳसमित् ॥ सꣳसमिद्युवसेवृषन्नग्नेविश्वान्यर्य्य
ऽआ ॥ इडस्प्पदेसमिंध्यसेसनोवसून्याभर ॥ ३० ॥ त्वाञ्चि
त्रश्श्रवस्त्तम ॥ त्वाञ्चित्रश्श्रवस्त्तमहवन्तेविक्क्षुजन्तवः ॥
शोचिष्क्केशम्पुरुप्प्रियाग्नेहव्यायवोढवे ॥ ३१ ॥ एनावः ॥

१ इडः पदे इति पदम् । अत्र "आविनिरिडद्दडाय। वसतिर्वरिवः" (शु. य. प्रा. ३ अ. २३ सू.) इत्यनेन विसर्जनीयस्य ककारपकारपरयोः सकारः-षकारश्च यथायोगं विधीयते । इडस्प्पदे इति रूपम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एनावोऽअग्निन्नमंसोर्ज्जोनपातमाहुवे ॥ प्रियञ्चेतिष्ठमरतिᳬं
स्वंध्वरंव्विश्श्वंस्यदूतममृतंम् ॥ ३२ ॥ व्विश्श्वंस्यदूतम् ॥ व्विश्श्वंस्य
दूतममृतंव्विश्श्वंस्यदूतममृतंम् ॥ सयोजतेऽअरुषाव्विश्श्वभोजसा
सदुंद्द्रवत्स्वाहुतᳬं ॥ ३३ ॥ सदुंद्द्रवत् ॥ सदुंद्द्रवत्स्वाहुतᳬंसदुद्द्र
वत्स्वाहुतᳬं ॥ सुब्रह्मांयज्ञश्सुशमीव्वसूनान्देवᳬंराधोजनानां
म् ॥ ३४ ॥ अग्नेव्वाजस्य ॥ अग्नेव्वाजस्यगोमंतऽईशानᳬंसहसो
यहो ॥ अस्म्मेधेहिजातवेदोमहिश्श्रवं÷ ॥ ३५ ॥ सऽइधानश् ॥ ३८७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सऽइंधानोवंसुष्कविरग्निरीडेन्यौगिरा ॥ रेवदुस्म्मब्भ्यम्पुर्व्वणी
कदीदिहि ॥ ३६ ॥ क्षपोरांजन् ॥ क्षपोरांजन्नुतत्क्मनाग्ग्नेव्वस्त्तो
रुतोषसं÷ ॥ सतिंग्ग्मजम्भरक्क्षसोंदहुप्प्रति ॥ ३७ ॥ भुद्रोनं÷ ॥
भुद्रोनोऽअग्निराहुंतोभुद्राराुतिश्सुंभगभुद्रोऽअंद्ध्वरश ॥ भुद्राऽ
उतप्प्रशंस्त्तयह ॥ ३८ ॥ भुद्राऽउत । प्प्रशंस्त्तयोभुद्रम्मनं÷
कृणुष्ष्वव्वृत्रतूर्य्ये ॥ येनांसुमत्त्सुंसासहं÷ ॥ ३९ ॥ येनांसुम

१ वसुष्कविः इति । "कविष्करत्कृधिषु" (शु. य. प्रा. ३ अ. ३२ सू.) इत्यनेन कविः करत् कृधिः एतेषु परेषु विसर्जनीयस्य सकारः षकारश्च भवति । तेनात्र कविः परे पूर्वविसर्जनीयस्य षकारे कृते "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ककारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्त्सु । सासहोवंस्त्थिरातंनुहि भूरिशर्द्धंताम् ॥ व्वनेमातेऽअभि
ष्टिभिः ॥ ४० ॥ अग्निन्तम् ॥ अग्निन्तम्मन्न्येयोव्वसुरस्त्तँ
स्यँस्यन्तिधेनवंः ॥ अस्त्तमर्व्वन्तऽआशवोस्त्तन्नित्त्यासोव्वा
जिनऽइषंस्तोतृब्भ्यऽआभर ॥ ४१ ॥ सोऽअग्निः॰ ॥ सोऽ
अग्निर्य्योव्वसुर्गृणेसँस्यमायन्तिधेनवंः ॥ समर्व्वन्तोरघु
द्द्रुवःसं सुजातासंः सूरयऽइषंस्तोतृब्भ्यऽआभर ॥ ४२ ॥
उभेसु॰ श्चन्द्र । सर्प्पिषोदर्व्वीश्श्रीणीषऽआसनि ॥ उतोनऽउत्त्पु

१ सोऽअग्निः । अत्र "व्यञ्जने" च (शु. य. प्रा. ३ अ. १७ सू.) इति सूत्रे व्यञ्जने परे एव विसर्गस्य लोपविधानान्न लोपस्ततो विसर्गस्य रुत्वे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्व्याँऽउक्थेषुंशवसस्पतऽइषᳪंस्तातृभ्यऽआभंर ॥ ४३ ॥
अग्नेतम् ॥ अग्नेतमद्याश्वन्नस्तोमैᳪंक्रतुन्नभद्रᳪंहृदिस्पृ
शम् ॥ ऋद्ध्यामांतऽओहैᳪं ॥ ४४ ॥ अधाहि ॥ अधा
ह्यंग्नेक्रतोर्भद्रस्यदक्षंस्यसाधोः ॥ रथीऽर्ऋतस्यंबृहतो
बभूर्थ ॥ ४५ ॥ एभिर्न्नः ॥ एभिर्न्नोऽअर्कैर्भवानोऽअर्व्वा
ङ्स्वर्ण्णज्ज्योतिः ॥ अग्नेविश्वेभिःᳪंसुमनाऽअनीकैᳪं ॥ ४६ ॥

ओत्वे सोऽअग्निः इति पदम् । २ सुश्चन्द्रः । अत्र "चन्द्रेशु शकारेण" (शु. य. प्रा. ३ अ. ५४ सू.) इत्यनेन चन्द्रशब्दे परे सुशब्दः शकारेण व्यवधीयते । तत "ऊष्मान्तस्थाभ्यश्च" स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन चकारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अग्निꣳ होतारम् ॥ अग्निꣳ होतारम्मन्न्येदास्वन्तंव्वसुꣳ सूनुꣳ
सहसोजातवेदसंव्विप्प्रन्नजातवेदसम् ॥ यऽऊर्द्ध्वयास्वद्ध्वरोदेवो
देवाच्च्याकृपा ॥ घृतस्यविभ्भ्राष्टिमनुवष्टिशोचिषाजुह्वानस्य
सर्प्पिषः ॥ ४७ ॥ अग्नेत्त्वम् ॥ अग्नेत्त्वन्नोऽअन्तमऽउत
त्त्राताशिवोभवावरूत्थ्यः ॥ व्वसुरग्निर्व्वसुश्श्रवाऽअच्छानक्षि
द्द्युमत्तमꣳ रयिन्दाः ॥ तन्त्वाशोचिष्ठदीदिवः सुम्म्नायनूनमी
महेसखिब्भ्यः ॥ ४८ ॥ [२९-५] येनऽऋषयः ॥ येनऽऋषय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्तपंसासत्रमायन्निन्धांनाऽअग्निᳯंस्वंराभरंन्तः ॥ तस्मिन्न
हन्निदंधेनाकेंऽअग्निँस्यमाहुर्म्मनंवस्त्तीर्ण्णंबंर्हिषम् ॥ ४९ ॥
तम्पत्नींभिः ॥ तम्पत्नींभिरनुंगच्छेमदेवाःपुत्रैर्ब्भ्रातृंभिरुत
वाहिरंण्ण्यैः ॥ नाकंङ्गृब्भ्णानाःसुंकृतस्यंलोकेतृतीयेंपृष्ठेऽअधि
रोचनेदिवः ॥ ५० ॥ आवाचः ॥ आवाचोमध्ध्यंमरुहद्भुर
ण्युरयमग्निःसत्त्पंतिश्चेकिंतानः ॥ पृष्ठेपृंथिव्व्यानिहिंतोदवि
द्युतदस्प्पदङ्कृंणुताँस्येपृंतन्न्यवंः ॥ ५१ ॥ अयमग्निः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अयमग्निर्व्वीरतंमोव्वयोधाः सहस्त्रियोद्योततामप्प्रयुच्छन् ॥ व्वि
भ्राजमानꣳसरिरस्यमद्ध्यऽउपप्प्रयाहिदिव्व्यानिधामं ॥ ५२ ॥
सम्प्रच्यवद्ध्वमुपं । सप्प्रयातांग्नेपथोदेवयानांन्कृणुद्ध्वम् ॥ पुनंः
कृण्ण्वानापितरायुवानान्वाताꣳसीत्त्वयितन्तुमेतम् ॥ ५३ ॥
उद्बुद्ध्यस्व ॥ उद्बुद्ध्यस्वाग्नेप्प्रतिजागृहित्त्वमिष्टापूर्त्तेसꣳसृजेथा
मयञ्च ॥ अस्म्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्विश्श्वेदेवायजमा
नश्चसीदत ॥ ५४ ॥ येनव्वहसि । सहस्रꣳयेनांग्नेसर्व्ववेदु ३१२

सम् ॥ तेनेमँऽस्यज्ञन्नोनयस्वर्द्देवेषुगन्तवे ॥ ५५ ॥ अयन्ते ॥
अयन्तेयोनिंऽऋत्त्वियोयतोजातोऽअरोचथाः ॥ तञ्जानन्न
ग्नऽआरोहाथांनोवर्द्धयारयिम् ॥ ५६ ॥ [८-६] तपश्च ॥
तपश्चतपस्यश्चशैशिरावृतूऽअग्नेरन्तःश्लेषोसिकल्पेतान्द्या
वांपृथिवीकल्पन्तामापऽओषधयःकल्पन्तामग्नयःपृथङ्म
मज्यैष्ठ्यायसव्रताः॥ येऽअग्नयःसमनसोन्तराद्यावापृथिवीऽ
इमे ॥ शैशिरावृतूऽअभिकल्पमानाऽइन्द्रमिवदेवाऽअभिसं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्विशन्तुतयांदेवतंयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ ५७ ॥ परमेष्ठी
त्त्वां । सादयतुदिवँ[1]स्पृष्ठेज्ज्योतिष्म्मतीम् ॥ व्विश्वंस्म्मैप्प्राणा
यांपानायंव्यानायव्विश्वञ्ज्योतिर्य्यच्छ ॥ सूर्य्यस्त्तेधिपतिस्त्त
यांदेवतंयाङ्गिरस्वद्ध्रुवासीद ॥ ५८ ॥ लोकम्पृण । च्छिद्रम्पृ
णाथोसीदद्ध्रुवात्त्वम् ॥ इन्द्राग्नीत्त्वाबृहस्प्पतिरस्म्मिन्न्योनां
वसीषदन् ॥ ५९ ॥ ताऽअस्य ॥ ताऽअस्यसूददोहसꣳसोमꣳ ३१५

१ दिवष्पृष्ठे । इत्यत्र "दिवोऽककुत्पृथिव्योः" (शु. य. प्रा. ३ अ. २४ सू.) इत्यनेन दिवः सम्बन्धिनः विसर्गस्य षकारत्त्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीणन्तिपृश्नन्नंयं ॥ जन्मन्देवानांव्विशस्त्रिष्ष्वारोचनेदिवः
॥ ६० ॥ इन्द्रंव्विश्वाः ॥ इन्द्रंव्विश्वाऽअवीवृधन्त्समुद्रव्यचं
सङ्गिरः ॥ रथीतमंरथीनांव्वाजानांसत्पतिम्पतिम् ॥ ६१ ॥
प्रोथदश्वः ॥ प्रोथदश्वोनयवसेविष्यन्यदामहःसंवरणाद्व्य
स्थात् ॥ आदस्यव्वातोऽअनुवातिशोचिरधस्म्मतेव्व्रजनङ्कृष्णम
स्ति ॥ ६२ ॥ आयोष्ट्वा ॥ आयोष्ट्वासदनेसादयाम्म्यवत
श्छायायांसमुद्रस्यहृदये ॥ रश्मीवतीम्भास्वतीमायाद्या

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म्भास्यापृथिवीमोर्व्वन्तरिक्षम् ॥ ६३॥ परमेष्ठीत्त्वा । सादय
तुदिवस्पृष्ठेव्यचस्वतीम्प्रथस्वतीन्दिवँय्यच्छदिवन्दृꣳहदिव
म्माहिꣳसीः ॥ विश्वस्म्मैप्प्राणायापानायव्यानायोदानाय
प्प्रतिष्ठायैचरित्त्राय ॥ सूर्य्यस्त्वाभिपातुमह्यास्वस्त्याच्छर्द्दि
षाशन्तमेनतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ ६४ ॥ सहस्र
स्यप्प्रमासि । सहस्रस्यप्प्रतिमासिसहस्रस्योन्मासिसाहस्रोसि
सहस्रायत्त्वा ॥ ६५ ॥ [९-७] इतिश्रीवाजसनेयसंहितायां ३१७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चदशोऽध्यायः ॥ १५ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक-सूत्रम् ॥ नमस्तेषोडश, हिरण्यबाहव, ऽउष्णीषिणे, तक्षभ्यो, ज्येष्ठायपञ्चकाः, स्नुत्यायचतस्रः, शंभवायैका, पार्य्यायपञ्च, द्रापेऽअंधसोविᳪशति, र्नवषट्षष्टिः [अ. १६ मं. ६६ अनु. ९] ॥ हरिः ॐ ॥ नमस्ते ॥ नमस्तेरुद्रमुन्यवऽउतोतुऽइषवेन मः ॥ बाहुब्भ्यामुततेनमः ॥ १ ॥ यातै । रुद्रशिवातनूरघो

१ नमस्ते । इत्यत्र "तथयोः सम्" (शु. य. प्रा. ३ अ. ८ सू.) इत्यने मकारोत्तरवर्तिनो विसर्जनीयस्य तकारे परे सकारे कृते नमस्ते इति सिद्ध्यति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाक
शीहि ॥२॥ यामिषुम् ॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे ॥
शिवाङ्गिरित्रताङ्कुरुमाहिंᳬसीᳬपुरुषञ्जगत् ॥ ३ ॥ शिवेनुव्व
चसा । त्वागिरिशाच्छावदामसि ॥ यथानᳬसर्व्वमिज्जगदय
क्ष्मᳬसुमनाऽअसत् ॥ ४ ॥ अद्ध्यवोचत् ॥ अद्ध्यवोचदाधिव
क्ताप्प्रथमोदैव्व्योभिषक् ॥ अहीँश्चसर्व्वाञ्जम्भयन्तसर्व्वाश्चयातु

१ अहीन् च । इत्यत्र "चच्छयोः शम्" (शु. य. प्रा. ३ अ. १३५ सू.) इत्यनेन नकारस्य चछयोः परयोः शकारं विधीयते उपधायामनुनासिकमपि । तथा अहीँश्च इति कृते "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यने चकारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धान्योधराचीर्ठ॑परासुव ॥ ५ ॥ असौयः ॥ असौयस्त्ताम्म्रोऽ
अंरुणऽउतबुब्भ्रुश्शुंमङ्गलं॑ ॥ येचैनᳬरुद्राऽअभितोंदिक्क्षु
श्श्रिताश्संहस्स्रशोवैषाᳬंहेडंऽईमहे ॥ ६ ॥ असौयः ॥ असौयो
वसर्प्पंतिनीलंग्ग्रीवोविलौंहितर्ठ॑ ॥ उतैनंङ्गोपाऽअंदृश्श्रन्नदृश्श्र
न्नुदहार्य्युर्ठ॑सदृष्टोमृंडयातिनर्ठ॑ ॥ ७ ॥ नमोंस्त्तु ॥ नमोंस्त्तु
नीलंग्ग्रीवायसहस्राक्क्षायंमीढुषे॥अथोयेऽअंस्यसत्त्वांनोहन्ते

१ दिक्षुश्श्रिताः। अत्र दिक्षु इति पदम्। "करेफाभ्याञ्च" (शु. य. प्रा. ३ अ. ५८ सू.) इत्यनेन करेफाभ्यां सरस्य षकारस्य षत्वं निषीयते। तेनात्र सकारस्य षत्वे कषसंयोगे क्षः इति क्षत्वे रूपम्। "स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र" (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन शकारस्य द्वित्वम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्भ्योकरन्नमः ॥ ८ ॥ प्रमुंञ्च ॥ प्रमुञ्चधन्वनस्त्वमुभयो
रात्क्यौर्ज्याम् ॥ याश्चतेहस्तऽइषवः परातार्भगवोवप ॥ ९ ॥
विज्ज्यन्धनुः कपर्द्दिनोविशल्योबाणवाँ२॥ऽउत ॥ अनेश
न्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥ यातें । हेति
र्म्मीढुष्टमहस्तेबभूवतेधनुः ॥ तयास्म्मान्विश्वतस्त्वमय
क्ष्मयापरिभुज ॥ ११ ॥ परिते ॥ परितेधन्वनोहेतिरस्म्मा
न्वृणक्तुविश्वतः ॥ अथोयऽइषुधिस्तवारेऽअस्म्मन्निधेहि ४०१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तम् ॥ १२ ॥ अवतत्त्यधनुं÷ ॥ अवतत्त्यधनुष्ट्वꣳसहंस्राक्क्षश
तेंषुधे ॥ निशीर्य्यंशल्ल्यानाम्मुखांशिवोनं÷सुमनांभव ॥ १३ ॥
नमंस्त्ते ॥ नमंस्त्तऽआयुंधायानांततायधृष्णवे ॥ उभा
ब्भ्यांमुततेनमोबाहुब्भ्यान्तवधन्न्वंने ॥ १४ ॥ मानं÷ ॥
मानोमहान्तंमुतमानोऽअब्भंकम्मानऽउक्क्षन्तमुतमानंऽउ
क्क्षितम् ॥ मानोव्वधीꣳपितरम्मोतमातरम्मानं÷प्प्रियास्त्तन्वो
रुद्द्ररीरिषꣳ ॥ १५ ॥ मानंस्त्तोके । तनयेमानऽआयुंषिमानो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गोषुमानोऽअश्श्वेषुरीरिषः ॥ मानोंव्वीरान्नुद्द्रभामिनोंव्वधीर्हं
विष्मंन्तःसदुमित्त्वांहवामहे ॥ १६ ॥ [१६-१] शतम्
॥ ८०० ॥ नमोहिरंण्ण्यबाहवे ॥ सेनान्न्येदिशाञ्चपतंयेनमो
नमोंव्वृक्षेब्भ्योहरिकेशेब्भ्यःपशूनाम्पतंयेनमोनमंः शुष्प्पिञ्ज
रायुत्त्विषींमतेपथीनाम्पतंयेनमोनमोहरिकेशायोपवीतिनेंपु
ष्टानाम्पतंयेनमोनमोंबब्भ्लुशायं ॥ १७ ॥ नमोंबब्भ्लु
शायं । व्याधिनेन्नांनाम्पतंयेनमोनमोंभवस्यंहेत्त्यैजगंताम्पतं ४०३

सं. २८

१ त्विषिमते । अत्र शृणुतत्विषिध्रजिभवतपिन्नेतस्मातिष्ठरक्षा मकारे (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे परे एने दीर्घा भवन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

येनमोनमौरुद्द्रायांततायिनेक्षेत्त्राणाम्पतयेनमोनमंः सूताया
हंन्त्यैवनानाम्पतयेनमोनमोरोहिताय ॥ १८ ॥ नमोरोहि
ताय । स्त्थपतयेवृक्षाणाम्पतयेनमोनमौभुवन्तयेवारिवस्कृ
तायौषधीनाम्पतयेनमोनमौमन्त्रिणेवाणिजायकक्क्षाणाम्पत
येनमोनमंऽउच्चैर्घोषायाक्रन्दयतेपत्तीनाम्पतयेनमोनमंः
कृत्स्नायतयां ॥ १९ ॥ नमंः कृत्स्नायतया । धावंतेसत्त्व
नाम्पतयेनमोनमःसहमानायनिव्याधिनऽआव्याधिनीनाम्प

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तंयेनमोनमोंनिषङ्गिणेंककुभायंस्तेनानाम्पतंयेनमोनमोंनि
चेरवेंपरिचरायारंण्ण्यानाम्पतंयेनमोनमोव्वञ्चंते ॥ २० ॥ नमो
व्वञ्चंते । परिवञ्चंतेस्तायूनाम्पतंयेनमोनमोंनिषङ्गिणंऽइषुधि
मतेतस्कंराणाम्पतंयेनमोनमंः सृकायिब्भ्योजिघांᳬसद्भ्यो
मुष्णताम्पतंयेनमोनमोंसिमद्भ्योनक्तुञ्चरद्भ्योव्विकृन्ता
नाम्पतंयेनमंः ॥ २१ ॥ [५-२] नमंऽउष्णीषि
णें । गिरिचरायंकुलुञ्चानाम्पतंयेनमोनमंऽइषुमद्भ्योंधन्वा ४०६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यिभ्यश्चवोनमोनमऽआतन्वानेभ्यः प्रतिदधानेभ्यश्चवो
नमोनमऽआयच्छद्भ्योस्यद्भ्यश्चवोनमोनमोविसृजद्
भ्यः ॥ २२ ॥ नमोविसृजद्भ्यो । विध्यद्भ्यश्चवो
नमोनमः स्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमः शयानेभ्य
ऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमो
नमः सभाभ्यः ॥ २३ ॥ नमः सभाभ्यः । सभापति ॥१६४॥
भ्यश्चवोनमोनमोऽश्वेभ्योऽश्वपतिभ्यश्चवोनमोनमऽआव्या

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृंहतीभ्यश्च वो नमो नमो गणेभ्यः ॥ २४ ॥ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमः सेनाभ्यः ॥ २५ ॥ नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यो ऽअरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो ऽअर्भकेभ्यश्च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भ्यश्चवोनमः ॥ २६ ॥ [५-३] नमस्तक्षभ्यो ।
रथकारेभ्यश्चवोनमोनमः कुलालेभ्यः कर्मारेभ्यश्चवोनमो
नमोनिषादेभ्यः पुञ्जिष्ठेभ्यश्चवोनमोनमः श्वनिभ्योमृगयु
भ्यश्चवोनमोनमः श्वभ्यः ॥ २७ ॥ नमः श्वभ्यः ।
श्वपतिभ्यश्चवोनमोनमोभवायचरुद्रायचनमः शर्वायचपशु
पतयेचनमोनीलग्रीवायचशितिकण्ठायचनमः कपर्दिने
॥ २८ ॥ नमः कपर्दिने । चव्युप्तकेशायचनमः सहस्रा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्षायंचशुतधंन्वनेचुनमोगिरिशुयायंचशिपिविष्टायंचुनमो
मीढुष्टमायुचेषुंमतेचुनमोह्रुस्वायं ॥ २९ ॥ नमोह्रुस्वायं ।
चवामुनायंचुनमोबृहुतेचुवर्षीयसेचुनमोवृद्धायंचसुवृधेचुन
मोगयायचप्प्रथुमायंचुनमंऽआशवे ॥ ३० ॥ नमंऽआ
शवे । चाजिरायंचुनमुःशीघ्यांयचुशीभ्यांयचुनमुऽऊ
र्म्म्यांयचावस्वन्यायचुनमोनादेयायंचुद्वीप्प्यांयच ॥ ३१ ॥
[५-४] नमोज्येष्ठायं । चकनिष्ठायंचुनमंः पूर्वजायंचापर ४०१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जायंचनमोमद्ध्यमायंचापगल्भायंचनमोजघन्न्यायचबु
द्ध्न्यायचनमःसोभ्यायं ॥ ३२ ॥ नमःसोभ्याय । चप्प्रति
सर्य्यायचनमोयाम्म्यायंचक्षेम्म्यायंचनमःश्लोक्क्यायंचा
वसान्न्यायचनमंऽउर्व्वर्य्यायचखल्ल्यायंचनमोवन्न्यायं ॥ ३३ ॥
नमोवन्न्यायं । चकक्ष्यायंचनमंःश्रवायंचप्प्रतिश्रवायंचन
मंऽआशुषेणायचाशुरंथायचनमःशूरायचावभेदिनेंचनमोबि
ल्मिने ॥ ३४ ॥ नमोबिल्मिने । चकवचिनेंचनमोव्वर्म्मि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

णेचव्वरूथिनेचनमः॑ श्रुतायंचश्रुतसेनायंचनमोदुन्दुभ्या
यचाहनन्यायचनमोधृष्णवे ॥ ३५॥ नमोधृष्णवे । चप्प्र
मृशायंचनमोनिषङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिने
चनमः॑ स्वायुधायंचसुधन्वंनेच ॥ ३६ ॥ [५-५] नमस्स्रुत्यां
य । चपत्थ्यायचनमःकाट्याययचनीप्प्यायचनमःकुल्यायच
सरस्यायचनमोनादेयायंचवैशन्तायंचनमःकूप्प्याय ॥३७॥ ४११
नमःकूप्प्याय । चावट्यायचनमोवीध्र्यायचातप्प्यायचन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मोमेग्घ्यांयचविद्युत्त्यायचुनमोवर्ष्यायचावर्ष्यायंचुनमो
वात्त्यांय ॥ ३८ ॥ नमोवात्त्यांय । चुरेष्म्म्यांयचुनमोवास्त्तु
घ्यायचवास्त्तुपायंचुनमुःसोमांयचरुद्रायंचुनमंस्त्ताम्म्रायं
चारुणायंचुनमंःशुङ्गवें ॥ ३९ ॥ नमंःशुङ्गवें । चपशुपतं
येचुनमंऽउग्ग्रायंचभीमायंचुनमोग्ग्रेवधायंचदूरेवधायंचुन
मोहुन्त्रेचहनींयसेचुनमोवृक्षेब्भ्योहरिंकेशेब्भ्योनमंस्त्तारायं
॥ ४० ॥ [४-६] नमंःशम्भवायं । चमयोभुवायंचुनमंःश

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ङ्कुरायंचमयस्कुरायंचुनमं॑ शिवायंचाशिवतंरायच ॥ ४१ ॥
[१-७] नमुंपार्य्यांय। चावार्य्यायचुनमं॑ प्प्रतरंणायचोत्तरं
णायचुनमुस्तीत्थ्यांयचुकूल्ल्यांयचुयमुं॑ शष्प्प्यांयचुफेन्न्यांय
चुयमं॑ सिकुत्त्याय ॥ ४२ ॥ नमं॑ सिकुत्त्याय। चप्प्रवाह्याय
चुनमं॑ किंशिलायंचक्षयुणायंचुनमं॑ कपुर्दिनेचपुलुस्तये
चुनमंऽइरिण्ण्यायचप्प्रपुत्थ्यायचुनमोव्व्रज्ज्यांय ॥ ४३ ॥ नमो
व्व्रज्ज्यांय। चुगोष्ठ्यांयचुनमुस्त्तल्प्प्यांयचुगेह्यांयचुनमोहृदु ४१३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उस्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च नमः शु
ष्क्याय ॥ ४४ ॥ नमः शुष्क्याय । च हरित्याय च नमः
पाᳬसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नमऽ
ऊर्व्याय च सूर्व्याय च नमः पर्णाय ॥ ४५ ॥ नमः पर्णाय ।
च पर्णशदाय च नमऽउद्गुरमाणाय चाभिघ्नते च नमऽआखिदते
च प्रखिदते च नमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो व
किरिकेभ्यो देवानाᳬहृदयेभ्यो नमो विचिन्वत्केभ्यो नमो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्विक्षिणत्केब्भ्योनमंऽआनिर्हुतेब्भ्यः ॥ ४६ ॥ [५-८]
द्रापेऽअन्धंसं ॥ द्रापेऽअन्धंसस्प्पतेदरिंद्र नीलंलोहित ॥
आसाम्प्रजानांमेषाम्पंशूनाम्माभेर्म्मारोङ्मोचंनकिञ्चनाम
मत् ॥ ४७ ॥ इमारुद्रायं । तवसेंकपर्द्दिनेंक्क्षयद्वीरा
यप्प्रभंरामहेमतीः ॥ यथाशमसंद्द्विपदेचतुष्प्पदेव्विश्श्वम्पुष्ट
ङ्गामेंऽअस्म्मिन्ननातुरम् ॥ ४८ ॥ यातें । रुद्रशिवा
[सं. २९ तनूःशिवाव्विश्श्वाहाभेषजी ॥ शिवारुतस्यंभेषजीतयांनोमृड ४१५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जीवसे ॥ ४९ ॥ परिनः ॥ परिनोरुद्रस्यहेतिर्वृणक्तुपरित्त्वेष
स्यदुर्म्मतिरघायोः ॥ अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तो
कायतनयायमृड ॥ ५० ॥ मीढुष्टमशिवतम । शिवोनःसुम
नाभव ॥ परमेवृक्षऽआयुधन्निधायकृत्तिंवसानऽआचरपिनाक
म्बिभ्रदागहि ॥ ५१ ॥ विकिरिद्रविलोहित ॥ विकिरिद्रवि
लोहितनमस्तेऽअस्तुभगवः॥ यास्तेसहस्रंहेतयोन्यमस्म
न्निवपन्तुताः ॥ ५२ ॥ सहस्राणिसहस्रशः ॥ सहस्राणिसह

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्रशोबाह्वोस्त्तवंहेतयंः ॥ तासामीशानोभगवःपराचीनामु
खांकृधि ॥ ५३ ॥ असंङ्ख्यातासहस्त्राणि ॥ असंङ्ख्यातासह
स्त्राणियेरुद्राऽअधिभूम्म्याम् ॥ तेषांॅंसहस्त्रयोजनेवधन्वानि
तन्मसि ॥ ५४ ॥ अस्मिन्न्मंहति । अस्म्मिन्न्मंहत्यर्ण्णवे
न्तरिंक्क्षेभवाऽअधिं ॥ तेषांॅंसहस्त्रयोजनेवधन्वानितन्मसि
॥ ५५ ॥ नीलंग्ग्रीवाःशितिकण्ठाः ॥ नीलंग्ग्रीवाःशितिकण्ठा
दिवंरुद्राऽउपंश्श्रिताः ॥ तेषांॅंसहस्त्रयोजनेवधन्वानित ४१७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्मसि ॥ ५६ ॥ नीलंग्ग्रीवाःशितिकण्ठाः । शर्व्वाऽअधः
क्षमाचराः ॥ तेषांᳬंसहस्रयोजनेवधन्वांनितन्मसि ॥ ५७ ॥
येव्वृक्षेषु । शष्पिञ्जरानीलंग्ग्रीवाव्विलोहिताः ॥ तेषांᳬंसहस्र
योजनेवधन्वांनितन्मसि ॥ ५८ ॥ येभूतानांम् ॥ येभूताना
मधिंपतयोव्विशिखासंःकपर्द्दिनंः ॥ तेषांᳬंसहस्रयोजनेवध
न्वांनितन्मसि॥५९॥ येपथाम्॥ येपथाम्पंथिरक्षंयऽऐलबृदाऽ
आंयुर्य्युधंः ॥ तेषांᳬंसहस्रयोजनेवधन्वांनितन्मसि ॥ ६० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

येतीर्त्थानि । प्प्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषाꣳसह
स्रयोजनेवधन्न्वानितन्न्मसि ॥ ६१ ॥ येन्नेषु । व्विविद्ध्यन्तिपा
त्रेषुपिबतोजनान् ॥ तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि
॥ ६२ ॥ यऽएतावन्तः ॥ यऽएतावन्तश्च्चभूयाꣳसश्च्चदिशो
रुद्द्राव्वितस्त्थिरे ॥ तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि ॥ ६३ ॥
नमोस्त्तु । रुद्द्रेब्भ्योयेदिवियेषांव्वर्षमिषवः ॥ तेब्भ्योदशप्प्रा
चीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः ॥ तेब्भ्योन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमे
॥१७१॥ षाञ्जम्भेदद्ध्मः ॥६४॥ नमोस्त्तु । रुद्रेभ्योयेन्तरिक्षेयेषां
वातऽइषवः॥ तेभ्योदशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशो
दीचीर्द्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्त्तुतेनोवन्तुतेनोमृडयन्तुते
यन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥६५॥ नमोस्त्तु ।
रुद्रेभ्योयेपृथिव्याँय्येषामन्नमिषवः ॥ तेभ्योदशप्प्राचीर्द्दश ॥१७१॥
दक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः॥तेभ्योनमोऽअस्त्तु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तेनोऽवन्तुतेनोऽमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेद
द्ध्मः॥६६॥[२०-९]इतिश्रीवाजसनेयसंहितायांषोडशोऽ
ध्यायः ॥ १६ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥
अश्मन्नूर्ज्जंदश, नमस्तेपञ्चा, ग्निस्तिग्मेननव, चक्षुषःपिताष्टा,
वाशुःशिशानःसप्तदशो, देनंकमध्वमाग्निनापञ्चदशकौ, शुक्र
ज्योतिश्चसप्ते, मꣳस्तनंत्रयोदश, नवैकोनशतं [मं. ९९
अ. १७ अनु. ९]॥ हरिःॐ॥ अश्मन्नूर्ज्जम् ॥ अश्मन्नू ४२१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऊर्ज्जम्पर्व्वतेशिश्रियाणामुद्भ्ह्य ऽओषधीब्भ्योव्वनस्प्पातिब्भ्योऽ
अधिसम्भृतम्पयः ॥ तान्नऽइषमूर्ज्जन्धत्तमरुतह्संरराणाऽ
अश्म्मँस्त्तेक्क्षुन्मयितऽऊग्ग्र्यन्द्विष्म्मस्त्तन्तेशुगृच्छतु ॥ १ ॥
इमामें । ऽअग्न्नऽइष्टकाधेनवः सन्त्वेकाचदशचदशंचशतञ्च
शतञ्चसहस्त्रञ्चसहस्रञ्चायुतञ्चायुतञ्चनियुतञ्चनियुतञ्चप्रयुत
ञ्चार्बुदञ्चन्यर्बुदञ्चसमुद्रश्चमध्यञ्चान्तश्चपरार्द्धश्चैतामेऽअग्न्नेऽ
इष्टकाधेनवःसन्त्वमुत्त्रामुष्म्मिँल्लोके ॥२॥ ऋतवस्त्थ । ऽऋता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृधेऽऋतुष्ठास्त्थेंऽऋतावृधे÷ ॥ घृतश्श्चुतौमधुश्श्चुतौव्विराजोनामं

कामदुघाऽअक्क्षीयमाणाः ॥३॥ समुद्रस्यंत्त्वा॥समुद्रस्यत्त्वावं

कयाग्ग्नेपरिंव्ययामसि ॥ पावकोऽअस्म्मब्भ्यं॑ शिवोभंव ॥४॥

हिमस्यंत्त्वा । जरायुणाग्ग्नेपरिंव्ययामसि॥ पावकोऽअस्म्म

ब्भ्यं॑ शिवोभंव ॥५॥ उपज्ज्मन् ॥ उपज्ज्मन्नुपंवेतसेवंतरनदी

ष्ष्वा ॥ अग्ग्नेपित्तमपामंसिमण्डूकिताभिरागंहिसेमन्नोयज्ञ

म्पांवकवंण्र्णं॑ शिवङ्कृंधि॥६॥ अपामिदम॥ अपामिदन्न्ययंन॑ ४२३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समुद्रस्यंनिवेशनम् ॥ अन्याँस्त्तेऽअस्म्मत्तंपन्तुहेतयंः पाव

कोऽअस्म्मब्भ्यंꣳशिवोभंव ॥ ७ ॥ अग्ग्नेपावक । रोचिषां

मन्द्रयांदेवजिह्वयां ॥ आदेवान्वंक्क्षियक्क्षिच ॥ ८ ॥ सनंः

पावकदीदिवोग्ग्नेदेवाँ २ ॥ इहावंह ॥ उपंयज्ञꣳहविश्चंनः

॥ ९ ॥ पावकयायस्श्चितयंन्त्याकृपाक्षामंन्नु

रुचऽउषसोनभानुनां ॥ तूर्व्वन्नयामन्नेतंशस्यनूरणऽआयोघृणे

नतंतृषाणोऽअजरंः ॥ १० ॥ [१०-१] नमंस्त्ते ॥ नमं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्तेहरंसेशोचिषेनमंस्त्तेऽअस्त्त्वर्च्चिषें ॥ अन्न्यॉंस्त्तेंऽअस्म्मत्त्तं
पन्तुहेतयंः पावकोऽअस्म्मब्भ्यंꣳशिवोभंव ॥ ११ ॥ नृषदे
वेट् ॥ नृषदेवेडंप्सुषदेवेड्ढंर्हिषदेवेड्ढुंनसदेवेट्स्वर्विदेवेट् ॥ १२ ॥
येदेवाः ॥ येदेवादेवानॉंय्यज्ञियांय्यज्ञियांनाꣳसंवत्त्सरीणमु
पंभागमासंते ॥ अहुतादोंहविषोंयज्ञेऽअस्म्मिन्त्स्वयम्पिबन्तु
मधुंनोघृतस्यं ॥ १३ ॥ येदेवाः ॥ येदेवादेवेष्ष्वधिंदेवत्त्व
मायन्न्येब्रह्मंणःपुरऽएतारोंऽअस्य ॥ येब्भ्योनऽऋतेपवंतेधाम ४२५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किञ्चननतेदिवोनपृथिव्याऽअधिस्नुषुं ॥ १४ ॥ प्राणदाऽअं
पानदाः ॥ प्राणदाऽअंपानदाव्यानदावर्चोदावरिवोदाः ॥
अन्याँस्तेऽअस्मत्तपन्तुहेतयः पावकोऽअस्मभ्यंशिवो
भव ॥ १५ ॥ [५-२] अग्निस्तिग्मेनं । शोचिषायासद्वि
श्वन्न्यत्रिणम् ॥ अग्निर्नोवनतेरयिम् ॥ १६ ॥ सऽइमा ।
विश्वाभुवनानिजुह्वदृषिर्होतान्यसीदत्पितानः ॥ सऽआशि

१ अग्निस्तिग्मेन । अत्र विसर्गस्य सत्वे कृते "वायुरग्निरग्नेरेकाक्षरे" (शु. य. प्रा. ३ अ. ७७ सू.) इत्यनेन अग्निशब्दात्परस्य सस्य षत्वं न । अग्नेः परस्य तिग्मशब्दस्य एकाक्षराभावात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षाद्द्रविंणमिच्छमांनःप्रथमच्छदवंराँ२॥ऽआविंवेश ॥ १७ ॥
किꣳस्वित् ॥ किꣳस्विदासीदधिष्ठानंमारम्भंणङ्कतमत्स्वि
त्कथासींत् ॥ यतोभूमिंञ्जनयंन्विश्वकंर्म्माविद्यामौर्णोन्म
हिनाविश्वचंक्षाः॥ १८॥ विश्वतंश्चक्षुरुत । विश्वतोंमुखो
विश्वतोंबाहुरुतविश्वतंस्पात् ॥ सम्बाहुब्भ्यान्धमंतिसम्पतं
त्रैर्द्यावाभूमींजनयंन्देवऽएकंः॥ १९॥ किꣳस्वित् ॥ किꣳ ४२७
सं. ३० स्विद्वनङ्कऽउसवृक्षऽआंसयतोद्यावांपृथिवीनिंष्टतक्षुः॥ मनीं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षिणो मनं सा पृच्छते दुतद्यदुद्यातिष्ठ भुवनानि धारयन् ॥ २० ॥
सा ते ॥ या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्म्मन्नु
तेमा ॥ शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृ
धानः ॥ २१ ॥ विश्वकर्म्मन्हविषा । वावृधानः स्वयं यजस्व
पृथिवीमुत द्याम् ॥ मुह्यन्त्वन्ये ऽअभितः सपत्ना ऽइहास्म्मा
कम्मघवा सूरिरस्त्तु ॥ २२ ॥ वाचस्प्पतिम् ॥ वाचस्प्पतिं वि
श्वकर्म्माणमूतये मनोजुवं वाजे ऽअद्या हुवेम ॥ सनो विश्वानि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हवनानिजोषह्विश्वशम्भूरवसेसाधुकर्म्मा ॥ २३ ॥ विश्वक
र्म्मन्हविषा ॥ विश्वकर्म्मन्हविषावर्द्धनेनत्रातारमिन्द्रमकृणो
रवद्ध्यम् ॥ तस्मैविशःसमनमन्तपूर्वीरयमुग्रोविहव्योय
थासत् ॥२४॥ [९-३] चक्षुषःपिता । मनसाहिधीरोघृ
तमेनेऽअजनन्नम्नमाने ॥ यदेदन्ताऽअदद्दहन्तपूर्वऽआदि
द्यावापृथिवीऽअप्रथेताम् ॥ २५ ॥ विश्वकर्म्माविमनाः ॥ वि
श्वकर्म्माविमनाऽआद्विहायाधाताविधातापरमोतसन्दृक् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि. ॥१७६॥ पू. अ. ॥ १७ ॥

तेषांमिष्टानिसमिषामंदन्तियत्रांसप्तऽऋषीन्परऽएकमाहुः
॥ २६ ॥ योनंः। पिताजंनितायोव्विंधाताधामांनिव्वेदभुवंना
निव्विश्वां ॥ योदेवानांन्नामधाऽएकंऽएवतꣳसंम्प्रश्नन्नम्भुवंना
यन्त्यन्न्या ॥ २७ ॥ तऽआयंजन्तद्रविंणꣳसमंस्म्माऽऋषंयꣳपू
र्व्वेंजरितारोनभूना ॥ असूर्त्तेंसूर्त्तेंरजंसिनिषत्तेयेभूतानिंसमकृ
ण्वन्निमानिं ॥ २८ ॥ परोदिवा। परऽएनापृंथिव्यापरोदेवेभि

१ यत्रासप्तऽऋषीन्। अत्र सप्तऋषीन् परे यत्रशब्दस्य ह्रस्वाकारस्य "नरस्सप्तऋषीन्०" (शु. य. प्रा. ३ अ. १२२ सू.) इत्यनेन दीर्घः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रसुरै[1]ऽर्य्यदस्ति ॥ कथंस्विद्गर्भम्प्रथमन्दध्रऽआपोयत्रदेवाः
समपश्यन्तपूर्वे ॥ २९ ॥ तमित् ॥ तमिद्गर्भम्प्रथमन्दध्र
ऽआपोयत्रदेवाःसमगच्छन्तविश्वे ॥ अजस्यनाभावध्येकम
र्पितंयस्मिन्विश्वानिभुवनानितस्थुः ॥ ३० ॥ नतम् ॥
नतंविदाथयऽइमाजजानान्यद्युष्माकमन्तरम्बभूव ॥ नी
हारेणप्रावृताजल्प्याचासुतृपऽउक्थशासश्चरन्ति ॥ ३१ ॥

१ अत्र परं तु रेफहकाराभ्याम् (शु. य. प्रा. ४ अ. १०१ सू.) इत्यनेन रकारात्परस्य सकारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विश्वकर्म्मन्हविषा ॥ विश्वकर्म्मा ह्यजनिष्ट देव ऽआदिद्गन्धर्वो ऽअभवद्द्वितीयः ॥ तृतीयः पिता जनितौषधीनामपाङ्गर्भं व्यदधात्पुरुत्रा ॥ ३२ ॥ [८-४] आशुः शिशानः ॥

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनोनिमिष ऽएकवीरः शतꣳ सेना ऽअजयत्साकमिन्द्रः ॥ ३३ ॥ सङ्क्रन्दनेनानिमिषेण । जिष्णुना युत्कारेण

१ "आशुःशिशानः" इत्यत्र "प्रत्ययसवर्णं मुदि शाकटायनः" (शु. य. प्रा. ३ अ. ९ सू.) इत्यनेन मुत्संज्ञकेषु शषसान्यतरवर्णपरेषु विसर्जनीयस्य परसवर्णे शकारे प्राप्ते "अविकारं शाकल्यः शषसेषु" (शु. य. प्रा. ३ अ. १० सू.) इत्यनेन परसवर्णो निषिध्यते। एतादृशेष्वन्यस्थलेष्वेवमेव निषेधो ज्ञेयः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुश्च्यवनेनंधृष्णुना ॥ तादिन्द्रेणजयतत्त्संहध्वंउयुधोनरऽ
इषुंहस्तेनवृष्णा ॥ ३४ ॥ सऽइषुंहस्तैः ॥ सऽइषुंह
स्तैःसनिषङ्गिभिर्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन ॥ सꣳसृष्ट
जित्सोमपाबाहुशर्ध्युग्ग्रधन्वाप्रतिहिताभिरस्ता ॥ ३५ ॥ बृह
स्पतेपरि । दीयारथेनरक्षोहामित्राँ २॥ऽअपबाधमानः ॥
प्रभञ्जन्त्सेनाःप्रमृणोयुधाजयन्नस्माकमेध्यविताथानाम्
॥ ३६ ॥ बलविज्ञायस्थविरः ॥ बलविज्ञायस्थाविरःप्रवीरः

४३३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुश्च्यवनेनंधृष्णुना ॥ तदिन्द्रैणजयततत्त्संहद्ध्वुंरुयुधोनरऽ
इषुंहस्त्तेनवृष्णा ॥ ३४ ॥ सऽइषुंहस्त्तैः ॥ सऽइषुंह
स्त्तैःसनिषङ्गिभिंर्व्वशीस७ंस्त्रष्टासयुधऽइन्द्रोगणेन ॥ सहसृष्ट
जित्त्सोंमपाबांहुशर्द्धुग्ग्रधंन्वाप्प्रतिंहिताभिरस्त्ता ॥ ३५॥ बृहं
स्प्पतेपरिं। दीयारथैनरक्षोहामित्राँ २॥ऽअपबाधंमानः ॥
प्रभञ्जन्त्सेनाः प्प्रमृणोयुधाजयंन्नस्म्माकंमेध्ध्यवितारथांनाम् ४३३
॥ ३६ ॥ बलविज्ञायस्त्थविरः ॥ बलविज्ञायस्त्थाविरः प्प्रवीरः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सहस्वान्वाजीसहमानऽउग्रः ॥ अभिवीरोऽ[2]अभिसंत्त्वासहो
जाजैत्रमिन्द्ररथमातिष्ठगोवित् ॥ ३७ ॥ गोत्रभिदङ्गोविदम् ॥
गोत्रभिदङ्गोविदंवज्रबाहुञ्जयन्तमज्ज्मप्रमृणन्तमोजसा ॥
इमꣳसंजाताऽअनुवीरयद्ध्वमिन्द्रꣳसखायोऽअनुसꣳरभद्ध्वम्
॥ ३८ ॥ अभिगोत्राणि ॥ अभिगोत्राणिसहसागाहमानोद

---

१ अभिवीरः । अत्र "अश्वरश्मि°" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे अभि इत्यस्य ह्रस्वेकारस्य दीर्घेकारे प्राप्ते "अभिविख्येषंवीर°" (शु. य. प्रा. ३ अ. १०० सू.) इत्यनेन वीरपरे अभेर्दीर्घनिषेधः । २ अभिसत्त्वा । अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन सस्य षत्वे प्राप्ते "अनुसन्तनोतुबृहस्पतिसुतस्य सुसमिद्धायसुसन्दृशमभिसत्त्वा" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे षत्वाभावः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योव्वीरश्शतमंन्युरिन्द्रंः ॥ दुश्च्यवनश्पृंतनाषाडेयुद्ध्योस्म्मा
कुं सेनांऽअवतुप्प्रयुत्त्सु ॥ ३९ ॥ इन्द्रंऽआसाम् ॥ इन्द्रंऽ
आसान्नेताबृहुस्प्पतिर्द्दक्षिणायुज्ञश्पुरऽएंतुसोमंः ॥ देवसेना
नांमभिभञ्जतीनाञ्जयंन्तीनाम्मुरुतौयन्त्वग्ग्रम् ॥ ४० ॥
इन्द्रंस्युवृष्णोंः ॥ इन्द्रंस्युवृष्णोव्वरुंणस्युराज्ञंऽआदित्त्यानां
म्मुरुताᳫंशर्द्धंऽउग्ग्रम् ॥ मुहामंनसाम्भुवनच्च्युवानाङ्घोषोंदे
वानाञ्जयंतामुदंस्त्थात् ॥ ४१ ॥ उद्धंर्षय । मघवन्नायुंधा

४३५

न्युत्सत्त्वंनाम्मामकानाम्मनांᳬसि ॥ उद्वृत्रहन्वाजिनांवाजि
नान्युद्रथांनाञ्जयंताँऽयन्तुघोषाᳬ ॥ ४२ ॥ अस्म्माकमि
न्द्रेः ॥ अस्म्माकमिन्द्रᳬसमृतेषुद्धजेष्ष्वस्म्माकँय्याऽइषव
स्त्ताजंयन्तु ॥ अस्म्माकंव्वीराऽउत्तंरेभवन्त्वस्म्माँ२॥ऽउंदेवाऽ
अवताहवेषु ॥ ४३ ॥ अमीषांञ्चित्तम् ॥ अमीषांञ्चित्तम्प्रंति
लोभयंन्तीगृहाणाङ्गांन्न्यप्प्वेपरेहि ॥ अभिप्प्रेहिनिर्द्दहहृत्त्सु ॥१७९॥
शोकैरन्धेनामित्त्रास्त्तमंसासचन्ताम् ॥ ४४ ॥ अवंसृष्टापरा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पतशरंव्येब्रह्मसंᳪशिते ॥ गच्छामित्रान्प्रपद्यस्वमामीषाङ्क

ञ्चनोच्छिषᳪ ॥ ४५ ॥ प्रेतं ॥ प्रेताजयंतानरऽइन्द्रोवᳪशर्म्म

यच्छतु ॥ उग्रावं÷सन्तुबाहवोनाधृष्ष्यायथासथ ॥ ४६ ॥

असौया। सेनांमरुतᳪपरेषामभ्यैतिंनऽओजंसास्पर्द्धमाना ॥

ताङ्गूहततमसापंव्रतेनयथामीऽअन्यो अन्यन्नजानन् ॥४७॥

यत्रबाणाः। सम्पतंन्तिकुमाराव्विंशिखाऽइंव॥ तन्नऽइन्द्रोबृह

१ प्रेताजयतानरः। अत्र जयतशब्दस्य ह्रस्वाकारस्य "धारयामयोजाव" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन नकारे परे दीर्घाकारः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्प्पतिरदितिः शर्म्मयच्छतुव्विश्[1]श्वाहाशर्म्मयच्छतु ॥४८॥ मर्म्मा
णिते ॥ मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानु
वस्ताम् ॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु
॥४९॥ [१७-५] उदेनम् ॥ उदेनमुत्तरान्नयाग्नेघृतेनाहुत ॥
रायस्प्पोषेणसᳬंसृजप्प्रजयाचबहुङ्कृधि ॥५०॥ शतम् ॥९००॥
इन्द्रेमम् ॥ इन्द्रेमम्प्रतरान्नयसजातानामसद्वशी ॥ समेनंव्व
र्च्चसासृजदेवानाम्भागदाऽअसत् ॥ ५१ ॥ यस्यंकुर्म्मः ॥

१ विश्वाहा। अत्र नरहामित्रेषु च (शु. य. प्रा. ३ अ. १०३ सू.) इत्यनेन हा परे विश्वशब्दस्य ह्रस्वाकारस्य दीर्घाकारः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्यंकुम्मोंगृहेहुविस्त्तमंग्ग्नेवर्द्धंयात्त्वम् ॥ तस्मैंदेवाऽअधिंब्र

वन्नयञ्चब्रह्मणस्प्पतिं÷ ॥ ५२ ॥ उदुंत्त्वा ॥ उदुंत्त्वाविश्श्वे

देवाऽअग्ग्नेभरंन्तुचित्तिंभिः ॥ सनोंभवशिवस्त्त्वꣳसुप्प्रतीको

विभावंसुः ॥ ५३ ॥ पञ्चदिशं÷ ॥ पञ्चदिशोदैवीर्य्यज्ञमंव

न्तुदेवीरपामंतिन्दुर्म्मंतिम्बाधंमानाः ॥ रायस्प्पोषेंयुज्ञपंतिमा

भजंन्तीरायस्प्पोषेऽअधिंयुज्ञोऽअंस्त्थात् ॥ ५४ ॥ समिंद्धेऽअ

ग्नौ॥समिंद्धेऽअग्ग्नावधिंमामहानऽउक्क्थपंत्त्रऽईड्यौंगृभीतः॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्तङ्घर्म्मम्परिगृह्यायजन्तोर्ज्जायद्यज्ञमयंजन्तदेवाः ॥ ५५ ॥
॥१८१॥ दैव्यायधर्त्रे । जोष्ट्रेदेवश्रीःश्रीमनाःशतपयाः ॥ परिगृह्यदे ॥ १७ ॥
वायज्ञमायन्देवादेवेभ्यो॰ऽअध्वर्य्यन्तो॰ऽअस्थुः ॥ ५६ ॥
वीतᳪहविः । शमितᳪशमितायजध्यैतुरीयोयज्ञोयत्रहव्यमे
ति ॥ ततोवाकाऽआशिषोनोजुषन्ताम् ॥ ५७ ॥ सूर्य्यर
श्मिर्हरिकेशः । पुरस्तात्सविताज्योतिरुदयाँ२॥ऽअजस्रम् ॥ ॥ १८१ ॥
तस्यपूषाप्प्रसवेयातिविद्वान्त्सम्पश्यन्विश्वाभुवनानिगोपाः ४४०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ ५८ ॥ व्विमानंऽएषः ॥ व्विमानंऽएषदिवोमद्ध्यंऽआस्तऽ
आपप्प्रिवान्न्रोदसीऽअन्तरिक्क्षम्॥सव्विश्श्वाचीरभिचष्टेघृताचीं
रन्तरापूर्व्वमपरञ्चकेतुम् ॥५९॥ उक्क्षासंमुद्रः ॥ उक्क्षासंमु
द्द्रोऽअरुणःसुपर्ण्णःपूर्व्वस्ययोनिम्पितुराविवेश ॥ मद्ध्येदिवोनि
हितःपृश्श्निरश्म्माव्विचक्रमेरजसस्प्पात्त्यन्तौ[1] ॥ ६० ॥ इन्द्रं
व्विश्श्वाः ॥ इन्द्रंव्विश्श्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः ॥ रथी

१ रजसस्प्पात्यन्तौ इति पदं "अध्वनो रजसो रिषः स्पृशस्पातौ" (शु. य. प्रा. ३ अ. २८ सू.) इत्यनेन रजसपरस्य विसर्जनीयस्य पाति पदे परे सकारे रूपम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तंमꣳरथीनांव्वाजांनाꣳसत्पंतिम्पतिंम् ॥ ६१ ॥ देवहूर्य्यज्ञः ॥
देवहूर्य्यज्ञऽआचंव्वक्षत्सुम्नहूर्य्यज्ञऽआचंव्वक्षत्॥ यक्षंदु
ग्निर्द्देवोदेवाँ२॥ऽआचंव्वक्षत् ॥ ६२॥ व्वाजंस्यमा । प्प्रसवऽ
उंद्ग्राभेणोदंग्ग्रभीत् ॥ अधांसपत्नानिन्द्रोंमेनिग्ग्राभेणाधंराँ
२॥ऽअकः ॥ ६३ ॥ उद्ग्राभञ्च । निग्ग्राभञ्चब्ब्रह्मंदेवाऽअंवी
वृधन् ॥अधांसपत्नांनिन्द्राग्नीमेंव्विषूचीनान्व्यस्यताम्॥ ६४॥
[१५-६] क्रमंद्ध्वमग्निनां ॥ क्रमंद्ध्वमग्निनानाकमुक्ख्यꣳ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हस्तेषुबिभ्रंतं ॥ दिवस्पृष्ठᳪंस्वर्गत्वामिश्राद्देवेभिराद्धम् ॥ ६५ ॥ प्राचीमनुं । प्प्रदिशम्प्रेहिविद्वानग्नेरग्नेपुरोऽअग्निर्भवेह ॥ व्विश्वाऽआशादीद्यानोव्विभाह्यूर्ज्जन्नोधेहिद्विपदेच तुष्पदे ॥ ६६ ॥ पृथिव्याऽअहम् ॥ पृथिव्याऽअहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् ॥ दिवोनाकस्यपृष्ठात्स्वर्ज्योतिरगामहम् ॥६७॥ स्वर्य्यन्तं÷ ॥ स्वर्य्यन्तोनापेक्षन्तऽआद्याᳪंरोहन्तिरोदसी ॥ यज्ञंय्येविश्वतोधारᳪंसुविद्वाᳪंसो

४४३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्विर्तेनिरे ॥ ६८ ॥ अग्नेप्प्र ॥ अग्नेप्प्रेहिंप्प्रथमोदेवयुताञ्चक्षु
र्देवानांमुतमर्त्त्यानाम् ॥ इयंक्षमाणाभृगुंभिᳬसजोषाᳬस्वर्य
न्तुयजंमानाᳬस्वस्ति ॥ ६९ ॥ नक्तोषासा ॥ नक्तोषासास
मंनसाविरूपेधापयेतेशिशुमेकᳬसमीची ॥ द्यावाक्षामारु
क्मोऽअन्तार्विभांतिदेवाऽअग्निन्धारयन्द्रविणोदाः ॥ ७० ॥
अग्नेसहस्राक्ष । शतमूर्द्धञ्छतन्तेप्प्राणाःसहस्रंव्यानाः ॥
त्वᳬसाहस्रस्यरायऽईशिषेतस्मैतेविधेमवाजायस्वाहा॥ ७१ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुपर्णोऽसि । गरुत्मान्पृष्ठेपृथिव्याःसीद ॥ भासान्तरिक्ष
मापृणज्ज्योतिषादिवमुत्तभानतेजसादिशऽउद्दृंᳫह ॥७२॥
आजुह्वानःसुप्रतीकः । पुरस्तादग्नेस्वंयोनिमासीदसाधु
या ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमान
श्चसीदत ॥ ७३ ॥ ताᳫंसवितुः ॥ ताᳫंसवितुर्वरेण्यस्यचि
त्रामाहंवृणेसुमतिंविश्वजन्याम् ॥ यामस्यकण्वोऽअदुहत्प्र
पीनाᳫंसहस्रधारांपयसामहीङ्गाम् ॥ ७४ ॥ विधेमते । ४४५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परमेजन्मंन्नग्ग्नेव्विधेमस्त्तोमैरवंरेसधस्त्थे ॥ यस्म्माद्योनेरुदा
रिंथायजेतम्प्रत्त्वेहवीꣳषिंजुहुरेसमिंद्धे ॥ ७५ ॥ प्रेद्धोऽ
अग्ग्ने ॥ प्रेद्धोऽअग्ग्नेदीदिहिपुरोनोजंस्स्रयासूम्म्यायविष्ठ ॥
त्वाꣳशश्वंन्तऽउपयन्तिव्वाजाः ॥ ७६ ॥ अग्ग्नेतम् ॥
अग्ग्नेतमद्याश्श्वन्नस्त्तोमैःक्क्रतुन्नभद्द्रꣳहृदिस्पृशंम् ॥ ऋद्ध्यामां
तऽओहैः ॥ ७७ ॥ चित्तिञ्जुहोमि ॥ चित्तिञ्जुहोमिमनंसा

१. रिथ यजेतम् । इति पदे । अत्र "अथोदारिथ." (शु. य. प्रा. ३ अ. ११३ सू.) इत्यनेन रियशब्दस्य यकारे परे दीर्घविधानात् रिथायजेतम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

घृतेनयथांदेवाऽइहागमंन्वीतिहोत्राऽऋतावृधं÷ ॥ पत्त्येविश्वं
स्यभूमंनोजुहोमिंविश्वकंर्म्मणेविश्वाहादांभ्यꣳहविः ॥७८॥
सप्ततें । ऽअग्नेसमिधं÷सप्तजिह्वाःसप्तऽऋषंयꣳसप्तधामं
प्प्रियाणिं ॥ सप्तहोत्राꣳसप्तधात्त्वांयजन्तिसप्तयोनीरापृंण
स्वघृतेनस्वाहां ॥ ७९ ॥ [१५-७] शुक्रज्ज्योतिश्च । चित्र
ज्ज्योतिश्चसत्त्यज्ज्योतिश्चज्ज्योतिष्म्मांश्च ॥ शुक्रश्चंऽऋतपा
श्चात्त्यंꣳहाꣳ ॥ ८० ॥ ईदृङ्‌ङ् ॥ ईदृङ्‌ङान्न्यादृङ्‌ङ्सदृङ्‌ङ् ४४७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥१८५॥ [1]प्रतिसदृङ्ङ्च ॥ मितश्च सम्मितश्च सभराः ॥८१॥ ऋतश्च सत्य
श्च ध्रुवश्च धरुणश्च ॥ धर्त्ता च विधर्त्ता च विधारयः ॥ ८२ ॥
ऋतजिच्च । सत्यजिच्च सेनजिच्च सुषेणश्च ॥ अन्तिमित्रश्च दूरेऽअ
मित्रश्च गणः ॥८३॥ ईदृक्षासऽएतादृक्षासः ॥ ईदृक्षासऽए
तादृक्षासऽऊषुणः सदृक्षासः [2]प्रतिसदृक्षासऽएतन ॥ मिता
सश्च सम्मितासो नोऽअद्य सभरसो मरुतो यज्ञेऽअस्मिन् ॥८४॥ ॥१८५॥

१ प्रतिसदृङ्ङ्च अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षकारे प्राप्ते "अनुसन्तनोतु" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन निषिद्ध्यते। २ प्रतिसदृक्षासः। अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५८ सू.) इत्यनेन मूर्धन्यषत्वापत्तौ "अनुसन्तनोतु" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन निषेधे न षत्वम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वतवाँश्च । प्रघासीचंसान्तपनश्चंगृहमेधीचं ॥ क्रीडीचंशा
कीचोंज्जेषी ॥ ८५ ॥ इन्द्रन्दैवीः ॥ इन्द्रन्दैवीर्व्विशोमरुतो
नुंवत्कर्माणोभवन्यथेन्द्रन्दैवीर्व्विशोमरुतोनुंवत्कर्माणोभवन् ॥
एवमिमँय्यजंमानन्दैवीश्चव्विशोमानुषीश्चानुवत्कर्माणोभव
न्तु ॥ ८६ ॥ [७-८] इमॐस्तनम् ॥ इमॐस्तनमूर्ज्जंस्व
न्तन्धयापाम्प्रपीनमग्नेसरिरस्यमद्ध्ये ॥ उत्संज्जुषस्वमधुमन्त
मर्व्वन्त्समुद्रियक्सदनमाविंशस्व ॥ ८७ ॥ घृतम्मिमिक्षे । ४४१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

घृतमंस्ययोनिर्घृतेश्रितोघृतंवंस्यधामं ॥ अनुष्वधमावंहमा
दयस्वस्वाहांकृतंवृषभवक्षिहव्यम् ॥ ८८ ॥ समुद्रादूर्म्मिः ॥
समुद्रादूर्म्मिर्म्मधुंमाँ२॥ऽउदांरदुपांᳬशुनासमंमृतत्वमांनट्॥
घृतस्यनामगुह्यंयदस्तिजिह्वादेवानांममृतंस्यनाभिः ॥८९॥
वयन्नामं ॥ वयन्नामप्रब्रंवामाघृतस्यास्मिन्यज्ञेधांरयामान
मोभिः ॥ उपंब्रह्माशृणवच्छस्यमांनञ्चतुःशृङ्गोवमीद्गौरऽ

१ धारयामानमोभिः। अत्र धारयाम नमोभिः इति पदे। अत्र "धारयाम योजाव" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन धारयाम इत्यादिपदेभ्यः परे नकारे सति पूर्वह्रस्वाकारस्य दीर्घो भवति। तेन धारयामानमोभिः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतत् ॥ ९० ॥ चत्त्वारिश्शृङ्गा ॥ चत्त्वारिश्शृङ्गा[1]त्त्रयोऽअस्य
पादा[2]द्द्वेशीर्षेसप्तहस्त्तासोऽअस्य ॥ त्रिधाबद्धोवृषभोरोरवीति
महोदेवोमर्त्त्याँ२॥ऽआविवेश ॥ ९१ ॥ त्रिधाहितम् ॥ त्रिधा
हितम्पणिभिर्ग्गुह्यमानङ्गविदेवासोघृतमन्न्वविन्दन् ॥ इन्द्रऽ
एकस्सूर्य्यऽएकञ्जजानवेनादेकꣳस्वधयानि[3]ष्ट्टतक्षुः ॥ ९२ ॥
एताऽअर्षन्ति ॥ एताऽअर्षन्तिहृद्यात्त्समुद्राच्छतव्व्रजारिपुणा

१ चत्वारि शृङ्गाणि इति पदे "निशब्दो बहुलम्" (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेन पदान्तीयशृङ्गाणिपदस्य निशब्दस्य लोपः। २ अस्य पादानि इत्यत्रापि "निशब्दो बहुलम्" इत्यनेन पादानिपदस्य निशब्दस्य लोपः। ३ निष्टतक्षुः अत्र "ततक्षौ" (शु. य. प्रा. ३ अ. ७१ सू.) इत्यनेन ततक्षूत्तरपदे निरुपसर्गस्य विसर्गस्य षकारे "ऊष्मान्तस्थाश्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ष्टुत्वेन जातस्य टकारस्य द्वित्वम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि. ॥१८७॥ नावचक्षे॥ घृतस्यधाराऽअभिचाकशीमिहिरण्ययोवेतसोम पू. अ.
ध्यऽआसाम् ॥ ९३ ॥ सम्म्यक्स्रवन्ति । सरितोनधेनाऽ ॥ १७ ॥
अन्तर्हृदामनसापूयमानाः ॥ एतेऽअर्षन्त्यूर्म्मयोघृतस्यमृगाऽ
इवक्षिपणोरीषमाणाः ॥९४॥ सिन्धोरिवप्प्राद्ध्वने । शूघना
सोव्वातप्प्रमियःपतयन्तियह्वाः ॥ घृतस्यधाराऽअरुषोनव्वाजी
काष्ठाभिन्दन्नूर्म्मिभिःपिन्वमानः ॥ ९५ ॥ अभिप्प्रवन्त ॥ ॥ १८७ ॥
अभिप्प्रवन्तसमनेवयोषाःकल्ल्याण्ण्यः स्मयमानासोऽअग्निं ४५२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म् ॥ घृतस्यधाराꣳसमिधोनसन्तताजुषाणो[1]हर्य्यतिजातवेदाः
॥ ९६ ॥ कन्न्याऽइवव्वहतुम् ॥ कन्न्याऽइवव्वहतुमेतवाऽउंऽअ
ञ्ज्यञ्जानाऽअभिचाकशीमि ॥ यत्रसोमःसूयतेयत्रयज्ञोघृत
स्यधाराऽअभितत्त्पवन्ते ॥ ९७ ॥ अब्भ्यर्षत । सुष्टुतिङ्ग
व्यंमाजिमस्म्मासुभद्द्राद्द्रविणानिधत्त ॥ इमँय्यज्ञन्नयतदेवता
नोघृतस्यधारामधुमत्त्पवन्ते ॥ ९८ ॥ धामन्ते ॥ धामन्ते ४५३

---

१ अत्र "परं तु रेफहकाराभ्याम्" (शु. य. प्रा.अ. सू.) इत्यनेन यकारस्य द्वित्वम् । यत्र रेफहकारात्परः स्पर्शवर्णस्तत्र तु "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेनैव द्वित्वं भवति । तथैव यत्र रेफहकाराभ्यां परः स्पर्शातिरिक्तवर्णस्तत्र तु "परं तु रेफहकाराभ्याम्" इत्यनेन द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्विश्वम्भुवंनमधिंश्श्रितमन्तःसंमुद्द्रेहृद्द्यन्तरायुंषि ॥ अपामनीं
केसंमिथेयऽआभृंतुस्त्तमंश्यामुमधुंमन्तन्तऽऊर्म्मिम् ॥९९॥
[१३-९]इतिश्रीवाजसनेयसंहितायांसप्तदशोऽध्यायः॥१७॥
श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ व्वाजः, सत्त्य, मूर्क्क
चतुष्का, अश्म्मा, ऽग्निस्त्रिका, वर्ङ्शुः पञ्चै, काचतस्रो,
व्वाजायद्वे, व्वाजस्यन्वष्टा, ऽऋताषाट्त्रयोदश, ग्निंसुनज्मि
सप्त, यदाकूता, द्वात्रिंहत्त्यायदशकौ, त्रयोदशसप्तसप्ततिः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[अ. १८ मं. ७७ अनु. १३] हरिः ॐ ॥ वाजश्च[1] । मेप्प्रसव
श्चंमेप्प्रयंतिश्चमेप्प्रसिंतिश्चमेधीतिश्चंमेक्रतुंश्चमेस्वरंश्चमेश्श्लो
कंश्चमेश्श्रवश्चंमेश्श्रुतिंश्चमेज्ज्योतिंश्चमेस्वश्चमेयज्ञेनंकल्प
न्ताम् ॥१॥ प्राणश्चं । मेपानश्चंमेव्यानश्चमेसुंश्चमेचित्तञ्चंमऽ
आधीतञ्चमेवाक्चंमेमनंश्चमेचक्क्षुंश्चमेश्श्रोत्रञ्चमेदक्क्षंश्चमे
बलञ्चमेयज्ञेनंकल्पन्ताम् ॥ २ ॥ ओजश्च । मेसहंश्चमऽ ४५५

१ अत्र वाजश्च इत्यत्र जकारोत्तरवर्तिनो विसर्जनीयस्य चकारे परे "चछयोः शम्" (शु. य. प्रा. ३ अ. ८ सू.) इत्यनेन शकारे कृते "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन शकारात्परस्य स्पर्शवर्णस्य चकारस्य द्वित्वम् । एवमेतादृशेष्वन्येषु स्थलेषु बोध्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आत्क्माचंमेतनूश्चंमेशर्म्मंचमेवर्म्मंचमेङ्गांनिचमेस्त्थींनिच
मेपरूᳬंषिचमेशरींराणिचमऽआयुंश्चमेजराचंमेयज्ञेनंकल्प्प
न्ताम् ॥ ३ ॥ ज्यैष्ठ्यंञ्च । मऽआधिंपत्त्यञ्चमेमन्त्युश्चंमेभा
मंश्चमेमंश्चमेम्भंश्चमेजेमाचंमेमाहिमाचंमेवरिमाचंमेप्प्रथि
माचंमेवर्षिमाचंमेद्राघिमाचंमेवृद्धञ्चंमेवृद्धिंश्चमेयज्ञेनंकल्प्प
न्ताम् ॥ ४ ॥ [४-१] सत्त्यञ्चं । मेश्श्रद्धाचंमेजगंच्चमेध ॥१८९॥
नंञ्चमेविश्श्वंञ्चमेमहंश्चमेक्रीडाचंमेमोदंश्चमेजातञ्चमेजानिष्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मांणञ्चमेसुक्तञ्चंमेसुकृतञ्चंमेयज्ञेनंकल्पन्ताम् ॥ ५ ॥ ऋतञ्चं ।
मेमृतंञ्चमेयक्ष्मञ्चमेनांमयच्चमेजीवातुश्चमेदीर्ग्घायुत्त्वञ्चंमेन
मित्रञ्चमेभंयञ्चमेसुखञ्चंमेशयंनञ्चमेसूषाश्चंमेसुदिनंञ्चमेयज्ञे
नंकल्पन्ताम् ॥ ६ ॥ यन्ताचं । मेधर्त्ताचंमेक्षेमंश्चमेधृतिं
श्चमेविश्वंञ्चमेमहंश्चमेसंविच्चंमेज्ञात्रंञ्चमेसूश्चंमेप्प्रसूश्चंमेसीरं
ञ्चमेलयंश्चमेयज्ञेनंकल्पन्ताम् ॥ ७ ॥ शञ्चं । मेमयंश्चमे
प्प्रियञ्चंमेनुकामश्चंमेकामंश्चमेसौमनसश्चंमेभगंश्चमेद्द्रविंण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मांणञ्चमेसुक्तञ्चमेसुकृतञ्चमेयज्ञेनंकल्पन्ताम् ॥ ५ ॥ ऋतञ्च ।
मेमृतञ्चमेयक्ष्मञ्चमेनामयच्चमेजीवातुश्चमेदीर्घायुत्वञ्चमेन
मित्रञ्चमेभयञ्चमेसुखञ्चमेशयनञ्चमेसूषाश्चमेसुदिनञ्चमेयज्ञे
नंकल्पन्ताम् ॥ ६ ॥ यन्ताचं । मेधर्त्ताचंमेक्षेमंश्चमेधृति
श्चमेविश्वञ्चमेमहश्चमेसंविच्चमेज्ञात्रञ्चमेसूश्चमेप्रसूश्चमेसीरं
ञ्चमेलयंश्चमेयज्ञेनंकल्पन्ताम् ॥ ७ ॥ शञ्च । मेमयंश्चमे
प्रियञ्चमेनुकामश्चमेकामंश्चमेसौमनसश्चमेभगंश्चमेद्रविण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥१९०॥

ञ्चमे भद्रञ्चमे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम्
॥ ८ ॥ [४-२] ऊर्क्च ॥ ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृ
तञ्च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं
ञ्च मऽऔद्भिद्यञ्च मे यज्ञेन कल्पन्ताम् ॥ ९ ॥ रयिश्च । मे रा
यश्च मे पुष्टञ्च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्णञ्च मे पूर्णतरञ्च
मे कुयवञ्च मेऽक्षितञ्च मेऽन्नञ्च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम्॥१०॥ ॥१९०॥
वित्तञ्च । मे वेद्यञ्च मे भूतञ्च मे भविष्यच्च मे सुगञ्च मे सुपत्थ्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

च्चमऽऋद्धञ्चंमुऽऋद्धिंश्चमेकृप्तञ्चंमेकृप्तिंश्चमेमतिश्चंमेसुमति
श्चंमेयुज्ञेनंकल्प्पन्ताम् ॥ ११ ॥ व्रीहयंश्च । मेयवांश्चमेमा
षांश्चमेतिलांश्चमेमुद्गाश्चंमेखल्वांश्चमेप्प्रियङ्गंवश्चमेणंवश्चमे
श्श्यामाकांश्चमेनी[1]वारांश्चमेगोधूमांश्चमेमसूरांश्चमेयुज्ञेनंक
ल्प्पन्ताम् ॥ १२ ॥ [४-३] अश्म्मांच । मेमृत्तिकाचमे
गिरयंश्चमेपर्वंताश्चमेसिकंताश्चमेव्वनस्प्पतंयश्चमेहिरंण्ण्यञ्चमे

१ नीवाराः । अत्र नि वारहारयोरनवग्रहे (शु. य. प्रा. ३ अ. १०६ सू.) इत्यनेन अवग्रहवर्जिते वारहारयोरन्यतरे परे पूर्वो नीत्युपसर्गो दीर्घो भवति । तेन नीवाराः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यंश्चमेश्श्यामञ्चमेलोहञ्चमेसीसंञ्चमेत्रपुंचमेयुज्ञेनंकल्पन्ता
म् ॥ १३ ॥ अग्निश्चं । मऽआपंश्चमेवीरुधंश्चमऽओषंधयश्च
मेकृष्टपच्च्याश्चंमेकृष्टपच्च्याश्चंमेग्ग्राम्म्याश्चंमेपशवंऽआरण्ण्या
श्चंमेविृत्तञ्चंमेवित्तिंश्चमेभूतञ्चंमेभूतिंश्चमेयुज्ञेनंकल्पन्ताम्
॥ १४ ॥ वसुंच । मेव्वसातिश्चंमेकर्म्मंच ॥ मेशक्तिंश्चमेत्र्थंश्च
मऽएमंश्चमऽइत्त्याचंमेगतिंश्चमेयुज्ञेनंकल्पन्ताम् ॥ १५ ॥ ॥१९१॥
[३-४] अग्निश्चं । मऽइन्द्रंश्चमेसोमंश्चमऽइन्द्रंश्चमेसविता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चमऽइन्द्रं श्च मेसरस्वतीचमऽइन्द्रं श्च मेपूषाचमऽइन्द्रं श्च मेबृह
स्पतिश्च मऽइन्द्रं श्च मेयज्ञेनंकल्पन्ताम् ॥१६॥ मित्रश्च । मऽ
इन्द्रं श्च मेवरुणश्च मऽइन्द्रं श्च मेधाताचमऽइन्द्रं श्च मेत्त्वष्टाचम
ऽइन्द्रं श्च मेमरुतंश्च मऽइन्द्रं श्च मेविश्वेचमेदेवाऽइन्द्रं श्च मेयज्ञेनं
कल्पन्ताम्॥१७॥ पृथिवीचं। मऽइन्द्रं श्च मेन्तरिंक्क्षञ्चमऽइन्द्रं
श्च मेद्यौश्च मऽइन्द्रं श्च मेसमाश्च मऽइन्द्रं श्च मेनक्क्षत्राणिचमऽ ४६१
इन्द्रं श्च मेदिशश्च मऽइन्द्रं श्च मेयज्ञेनंकल्पन्ताम्॥१८॥[३-५]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अ॒ह॒शु॒श्च॑। मे॒र॒श्मि॒श्च॑ मे॒दा॑भ्य॒श्च॑ मे॒धि॑पति॒श्च॑ म ऽउपा॒ꣳशु॒श्च॑ मे
न्तर्य्या॒म॒श्च॑ म ऽऐन्द्रवाय॒व॒श्च॑ मे मै॒त्रावरु॒ण॒श्च॑ म ऽआश्वि॒न॒श्च॑ मे
प्प्रतिप्प्र॒स्त्थान॑श्च मे शु॒क्र॒श्च॑ मे म॒न्थी च॑ मे य॒ज्ञेन॑ कल्प्पन्ताम्॥ १९॥
आ॒ग्र॒य॒ण॒श्च॑ । मे वै॒श्वदे॒व॒श्च॑ मे ध्रु॒व॒श्च॑ मे वै॒श्वान॒र॒श्च॑ म ऽऐन्द्रा॒ग्न
श्च॑ मे म॒हावै॑श्वदेव॒श्च॑ मे मरु॒त्व॒ती॒या॒श्च॑ मे॒ निष्के॑वल्य॒श्च॑ मे सावि॒त्र
श्च॑ मे सारस्व॒त॒श्च॑ मे पात्नीव॒त॒श्च॑ मे हारियोज॒न॒श्च॑ मे य॒ज्ञेन॑ कल्प्प
न्ताम् ॥ २० ॥ स्रु॒च॑श्च । मे चम॒सा॒श्च॑ मे वाय॒व्या॒नि च॑ मे द्रोण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कलशश्च मे ग्रावाणश्च मे धिषणे च मे पूतभृच्च मऽआधवनीयश्च मे वेदिश्च मे बर्हिश्च मेवभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥ २१ ॥ अग्निश्च । मे घर्म्मश्च मेर्कश्च मे सूर्य्यश्च मे प्राणश्च मे श्वमेधश्च मे पृथिवी च मेदितिश्च मे दितिश्च मे द्यौश्च मेङ्गुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम् ॥ २२ ॥ व्रतञ्च । मऽ ऋतवश्च मे तपश्च मे संवत्सरश्च मेहोरात्रेऽऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥२३॥ [५-६] एका च । मे तिस्रश्च मे ति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्रश्च॑मे॒ पञ्च॑च मे॒ पञ्च॑ च मे स॒प्त च॑ मे स॒प्त च॑ मे॒ नव॑ च मे॒ नव॑ च म॒ ऽए
का॑दश च म॒ ऽएका॑दश च मे॒ त्रयो॑दश च मे॒ त्रयो॑दश च मे॒ पञ्च॑दश च
मे॒ पञ्च॑दश च मे स॒प्तद॑श च मे स॒प्तद॑श च मे॒ नव॑दश च मे॒ नव॑दश च
म॒ ऽएक॑विꣳशतिश्च म॒ ऽएक॑विꣳशतिश्च मे॒ त्रयो॑विꣳशतिश्च मे॒ त्र
यो॑विꣳशतिश्च मे॒ पञ्च॑विꣳशतिश्च मे॒ पञ्च॑विꣳशतिश्च मे स॒प्तवि॑ꣳ
शतिश्च मे स॒प्तवि॑ꣳशतिश्च मे॒ नव॑विꣳशतिश्च मे॒ नव॑विꣳशतिश्च ॥ १९३ ॥
म॒ ऽएक॑त्रिꣳशच्च म॒ ऽएक॑त्रिꣳशच्च मे॒ त्रय॑स्त्रिꣳशच्च मे य॒ज्ञेनं क

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ल्पन्ताम् ॥२४॥ चतस्रश्च । मेऽष्टौचमेऽष्टौचमेद्वादशचमेद्वादश
चमेषोडशचमेषोडशचमेव्विꣳशतिश्चमेव्विꣳशतिश्चमेचतु
र्व्विꣳशतिश्चमेचतुर्व्विꣳशतिश्चमेऽष्टाविꣳशतिश्चमेऽष्टाविꣳशति
श्चमेद्वात्रिꣳशच्चमेद्वात्रिꣳशच्चमेषट्त्रिꣳशच्चमेषट्त्रिꣳशच्चमेच
त्वारिꣳशच्चमेचत्वारिꣳशच्चमेचतुश्चत्वारिꣳशच्चमेचतुश्चत्वा
रिꣳशच्चमेऽष्टाचत्वारिꣳशच्चमेयज्ञेनकल्पन्ताम् ॥ २५ ॥ ४६१

१ षोडशशब्दे षड् दश इति पदद्वयम् । अत्र षड्दशदन्तयोः संख्यावयोऽर्थयोश्च (शु. य. प्रा. ३ अ. ४७ सू.) इत्यनेन षड्शब्दघटितान्त्यवर्णस्य डकारस्य सोपधे ओकारे षो इति कृते ततः परस्य संख्यावाचिनो दशशब्दस्य दकारस्य मूर्द्धन्ये क्रमेण डकारे च कृते षोडश इति ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥१९४॥ त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे प
ञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे ॥ १८ ॥
यज्ञेन कल्पन्ताम् ॥ २६ ॥ पष्ठवाट् च ॥ पष्ठवाट् च मे पष्ठौही च मऽ
उक्षा च मे वशा च मऽऋषभश्च मे वेहच्च मेऽनड्वाँश्च मे धेनुश्च मे यज्ञे
न कल्पन्ताम् ॥२७॥ [४-७] वाजाय स्वाहा । प्रसवाय स्वाहा
पिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहा हर्पतये स्वाहाह्ने मुग्धा ॥१९४॥
य स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिनऽआन्त्यायना ४६६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्वाहान्त्यायभौवनायस्वाहाभुवनस्यपतयेस्वाहाधिपतये
स्वाहाम्प्रजापतयेस्वाहा ॥ इयन्तेराण्णिमत्रायंसन्तासियमनऽ
ऊर्ज्जेत्त्वावृष्ट्यैत्त्वाम्प्रजानान्त्वाधिपत्त्याय ॥ २८ ॥ आयुर्य्य
ज्ञेन । कल्प्पताम्प्राणोयज्ञेनंकल्प्पताञ्चक्षुर्य्यज्ञेनंकल्प्पताᳬ
श्रोत्रँय्यज्ञेनंकल्प्पतांव्वाग्ग्यज्ञेनंकल्प्पताम्मनोयज्ञेनंकल्प्पता
मात्मायज्ञेनंकल्प्पताम्ब्रह्मायज्ञेनंकल्प्पताञ्ज्योतिर्य्यज्ञेनंक
ल्प्पताᳬस्वर्य्यज्ञेनंकल्प्पताम्पृष्ठँय्यज्ञेनंकल्प्पताँय्यज्ञोयज्ञेनं ४६७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कल्प्पताम् ॥ स्तोमश्श्चयजुश्श्चऽऋक्चसामचबृहच्चरथन्तरञ्च ॥
॥१९५॥ स्वर्द्देवाऽअगन्मामृताऽअभूमप्प्रजापतेःप्प्रजाऽअभूमव्वेट्स्वा
हा ॥२९॥ [२-८] व्वाजस्यनु । प्प्रसवेमातरम्महीमदितिन्नामव्व
चसाकरामहे ॥ यस्यामिदव्विश्श्वम्भुवनमाविवेशतस्यान्नोदेवः
सविताधर्म्मसाविषत् ॥ ३० ॥ व्विश्वेऽअद्य । मरुतोव्विश्श्वऽऊ
तीव्विश्श्वेभवन्त्वग्नयःसमिद्धाः ॥ व्विश्वेनोदेवाऽअवसागमन्तु ॥१९५॥
व्विश्श्वमस्तुद्द्रविणव्वाजोऽअस्म्मे ॥ ३१ ॥ व्वाजोनः । सप्तप्प्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दिशश्चतंस्नोवापरावतं÷ ॥ व्वाजौनोव्विश्वैर्द्देवैर्द्धनंसाताविहावं
तु ॥ ३२ ॥ व्वाजौनꣳ ॥ व्वाजौनोऽअद्यप्प्रसुंवातिदानंव्वाजो
देवाँ२॥ऽऋतुभिं÷कल्पयाति ॥ व्वाजोहिमासर्व्वंवीरञ्जजान
व्विश्वाऽआशाव्वाजंपतिर्ज्जयेयम् ॥ ३३ ॥ व्वाजं÷पुरस्त्तात् ॥
व्वाजं÷पुरस्त्तांदुतमंद्ध्यतोनोव्वाजोदेवान्हविषांवर्द्धयाति॥ व्वा
जोहिमासर्व्वंवीरञ्चकारसर्व्वाऽआशाव्वाजंपतिर्ब्भवेयम् ॥ ३४ ॥ ४६१
सम्मां । सृजामिपयंसापृथिव्व्याꣳसम्मांसृजाम्म्युद्भिरोषंधी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥१९६॥ भिꣳ ॥ सो॒हंवा॒जꣳसनेयमग्ने ॥ ३५ ॥ पयः॑पृथि॒व्याम् ॥
पयः॑पृथि॒व्याम्पय॒ऽओष॑धीषु॒पयो॑दि॒व्य॒न्तरि॑क्षे॒पयो॑धाꣳ ॥
पय॑स्वतीꣳप्र॒दिशः॑सन्तु॒मह्य॑म् ॥३६॥ दे॒वस्य॑त्वा । स॒वि॒तुः
प्र॑स॒वे॒ऽश्विनो॑र्बा॒हुभ्या॑म्पू॒ष्णोहस्ता॑भ्याम् ॥ सर॑स्वत्त्यैवा॒
चो॒य॒न्तुर्य॒न्त्रेणा॒ग्नेःसा॒म्राज्ज्ये॑ना॒भिषि॑ञ्चामि ॥३७॥ [८-९]
ऋ॒ता॒षाडृ॒तधा॑मा ॥ ऋ॒ता॒षाडृ॒तधा॑मा॒ग्निर्ग॑न्ध॒र्वस्त॒स्यौष॑ध ॥१९६॥
यो॒प्स॒रसो॒मुदो॒नाम॑ ॥ सन॑ऽइ॒दम्ब्रह्म॑क्ष॒त्त्रम्पा॑तु॒तस्मै॒स्वाहा॒

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाट्ताभ्यꣳस्वाहा ॥ ३८ ॥ सꣳहितोविश्वसामा ॥ सꣳहितो
विश्वसामासूर्य्योगन्धर्व्वस्त्तस्यमरीचयोप्सरसंऽआयुवोनामं॥
सनंऽइदम्ब्रह्मक्षत्रम्पातुतस्म्मैस्वाहावाट्ताभ्यꣳस्वाहा ॥ ३९ ॥
सुषुम्म्णःसूर्य्यरश्मिम्मꣳ ॥ सुषुम्म्णःसूर्य्यरश्मिम्मश्चन्द्रमागन्ध
र्व्वस्त्तस्यनक्षत्राण्यप्सरसोभेकुरयोनामं॥ सनंऽइदम्ब्रह्मक्षत्र
म्पातुतस्म्मैस्वाहावाट्ताभ्यꣳस्वाहा ॥ ४० ॥ इषिरोविश्वव्यं ४७१
चाꣳ ॥ इषिरोविश्वव्यंचावातोगन्धर्व्वस्त्तस्यापोंऽअप्सरसऽऊ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्ज्ञोनामं ॥ सनंऽइदम्ब्रह्मक्षत्रम्पांतुतस्मैस्वाहाव्वाट्ताभ्यःस्वाहां ॥ ४१ ॥ भुज्युःसुंपर्ण्णः ॥ भुज्युःसुंपर्ण्णोयज्ज्ञोगंन्धर्व्वस्तस्यदक्षिणाऽअप्सरसंस्तावानामं ॥ सनंऽइदम्ब्रह्मक्षत्रम्पांतुतस्मैस्वाहाव्वाट्ताभ्यःस्वाहां ॥ ४२ ॥ प्रजापंतिर्व्विश्वकंर्म्मा ॥ प्रजापंतिर्व्विश्वकंर्म्मामनोगन्धर्व्वस्तस्यंऽऋक्सामान्यंप्सरसऽएष्टंयोनामं ॥ सनंऽइदम्ब्रह्मक्षत्रम्पांतुतस्मैस्वाहाव्वाट्ताभ्यःस्वाहां ॥ ४३ ॥ सनंः ॥ सनोभुवनस्यपतेप्प्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जापतेयस्यंतऽउपरिगृहायस्यंवेह ॥ अस्म्मैब्ब्रह्मणेस्म्मैक्षत्राय
महिशर्म्मयच्छस्वाहा ॥ ४४ ॥ समुद्द्रोसि ॥ समुद्द्रोसिन
भंस्वानार्द्दंदानुह्ंशम्भूर्म्मयोभूरभिमांव्वाहिस्वाहामारुतोसिम
रुतांङ्गणःशम्भूर्म्मयोभूरभिमांव्वाहिस्वाहावस्यूरसिदुवंस्वाञ्छ
म्भूर्म्मयोभूरभिमांव्वाहिस्वाहा ॥ ४५ ॥ यास्त्ते ॥ यास्त्तेऽ
अग्ग्नेसूर्य्येरुचोदिवंमातन्वन्तिरश्मिभिः ॥ ताभिन्नोऽअद्य ४७३
सर्व्वाभीरुचेजनायनस्कृधि ॥४६॥ यावः ॥ यावोदेवाह्ंसूर्य्ये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥१९८॥ रुचोगोष्ष्वश्वैँषुयारुचं॒ः ॥ इन्द्राग्ग्नीताभिँःसर्व्वाँभीरुचंन्नोधत्त
बृहस्प्पते ॥४७॥ रुचंन्नः ॥ रुचंन्नोधेहिब्ब्राह्मणेषुरुचᳫराजंसुन
स्कृधि ॥ रुचंव्विश्श्येंषुशूद्द्रेषुमयिँधेहिरुचारुचंम् ॥४८॥ तत्त्वा ।
यामिब्ब्रह्मणाव्वन्दंमानस्त्तदाशांस्त्तेयजंमानोहविर्ब्भिंः ॥ अहें
डमानोव्वरुणेहबोद्धयुरुशᳫसमानऽआयुःप्प्रमोषीः ॥ ४९ ॥
स्वर्ण्ण ॥ स्वंर्ण्णघर्म्मःस्वाहास्वर्ण्णार्क्कःस्वाहास्वर्ण्णशुक्क्रःस्वाहा ॥१९८॥

१ स्वः नः इति पदे । अत्र समानपदत्वाभावेन "ऋषरेभ्यो नकारो णकारं समानपदे" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन णत्वाप्राप्तौ निषण्णाय रथ० (शु. य. प्रा. ३ अ. ८७ सू.) इत्यनेन णत्वनिपातः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वुर्ण्णर्ज्ज्योति॒ᳪस्वाहा॒ स्वुर्ण्णं सूर्य्य॒ᳪस्वाहा॑ ॥५०॥ [१३-१०]
अ॒ग्ग्निँय्युंनज्मि ॥ अ॒ग्ग्निँय्युंनज्मि॒ शवं॑सा घृ॒तेनं॑ दि॒व्यᳪ सु
प॒र्ण्णँव्वयं॑सा बृ॒हन्तं॑म् ॥ तेनं॑ व्वयं ग॑मेम ब्र॒ध्नस्यं॑ व्वि॒ष्टप॒ᳪ स्वो॒ रुहा॑
णा॒ऽअधि॒ नाकं॑मुत्त॒मम् ॥५१॥ शतम् ॥१०००॥ इ॒मौ ते॑। प॒क्षा
व॒जरौ॑ पत॒त्रिणौ॒ याभ्यां॒ᳪ रक्षा॑ᳪस्यप॒हᳪस्यं॑ग्ने ॥ ताभ्यां॑
म्पतेम सु॒कृतां॑मु लो॒कँय्यत्र॒ऽऋषं॑यो ज॒ग्मुः प्र॑थम॒जाः पु॑रा॒णाः ४७५
सं. ३४ ॥५२॥ इन्दु॒र्दक्षः॑ । श्ये॒नऽऋ॒तावा॒ हिरं॑ण्यपक्षः शकु॒नो भु॒

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रण्युः ॥ महान्त्सधस्त्थेंध्रुवऽआनिषत्तोनमस्त्तेऽअस्त्तुमा
॥१९९॥ माहिꣳसीः ॥ ५३ ॥ दिवोमूर्द्धा । सिंपृथिव्यानाभिरूर्ग्गपा ॥ १७ ॥
मोषधीनाम् ॥ विश्वायुःशर्म्मसप्प्रथानमस्प्पथे ॥ ५४ ॥
विश्वस्यमूर्द्धन् ॥ विश्वस्यमूर्द्धन्नधितिष्ठसिश्रितःसमुद्रेतेहृदय
मप्स्वायुरपोदत्तोदधिम्भिन्त ॥ दिवस्प्पर्ज्जन्यादन्तरिक्षात्पृ
थिव्यास्त्ततोनोवृष्ट्याव ॥ ५५ ॥ इष्टोयज्ञः ॥ इष्टोयज्ञोभृ

१ नमस्प्पथे अत्र "सदो द्यौर्नमस्कृतम्पिता पथेषु" (शु. य. प्रा. ३ अ. ३४ सू.) इत्यनेन कृतं पिता पथ इत्येतेषु परेषु यथासंख्यं सदः द्यौः नमः एतेषां विसर्गस्य सकारो विधीयते । तेनात्र पथे परे नमःपदघटितविसर्जनीयस्य सकारे "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुभिराशीर्द्दीर्ब्वसुभिः ॥ तस्यंनऽइष्टस्यंप्प्रीतस्युद्द्रविंणेहागंमेः

॥ ५६ ॥ इष्टोऽअग्निः ॥ इष्टोऽअग्निराहुंतःपिपर्त्तुनऽइष्टः

हविः ॥ स्वगेदन्देवेब्भ्योनमंः ॥ ५७ ॥ [७-११] यदा

कूंतात्॥ यदाकूंताच्चसमसुंस्रोद्धृदोवामनंसोवासम्भृंतञ्चक्षुंषो

वा ॥ तदंनुप्प्रेतंसुकृतांमुलोकँय्यत्रऽऋषंयोजग्गमुःप्प्रंथमजाः

पुंराणाः ॥ ५८ ॥ एतः संधस्त्थ ॥ एतःसंधस्त्थपरिंतेदद्दा

मियमावहांच्छेवधिञ्जातवेंदाः ॥ अन्वागन्तायुज्ञपंतिर्वोऽअ ४७७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रृतꣳस्म्मंजानीतपरमेव्व्योमन् ॥ ५९ ॥ एतज्ज्ञानाथ । परमे
व्व्योमन्देवाः सधस्त्थाव्विदरूपमस्य ॥ यदागच्छात्त्पथिभि
र्द्देवयानैरिष्टापूर्त्तेकृणवाथाविरस्म्मै ॥ ६० ॥ उद्बुद्ध्यस्व ॥
उद्बुद्ध्यस्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्टापूर्त्तेसꣳसृजेथामयञ्च ॥ अ
स्म्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्विश्वेदेवायजमानश्चसीदत
॥ ६१ ॥ येनव्वहसि । सहस्रँय्येनाग्ग्नेसर्व्ववेदसम् ॥ तेनेमँ
य्यज्ञन्नोनयस्वर्द्देवेषुगन्तवे ॥ ६२ ॥ प्रस्त्तरेणपरिधिना ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्रुचाव्वेद्यांचबर्हिषां ॥ ऋचेमँऽयज्ञन्नोनयस्वर्द्देवेषुगन्तवे
॥ ६३ ॥ यद्दत्तम् ॥ यद्दत्तँऽयत्त्परादानँऽयत्त्पूर्त्तँऽयाश्चद
क्षिणाः ॥ तदग्निर्व्वैश्वकर्म्मणःस्वर्द्देवेषुनोदधत् ॥ ६४ ॥
यत्रधाराः ॥ यत्रधाराऽअनपेतामधोर्घृतस्यचयाः ॥ तद
ग्निर्व्वैश्वकर्म्मणःस्वर्द्देवेषुनोदधत् ॥ ६५ ॥ अग्निरस्मि ॥
अग्निरस्मिजन्मनाजातवेदाघृतम्मेचक्षुरमृतम्मऽआसन् ॥ ४७१
अर्कस्त्रिधातूरजसोव्विमानोजस्रोघर्म्मोहविरस्मिनाम ॥ ६६ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋचोनामं ॥ ऋचोनामांस्मि यजूंꣳषिनामांस्मि सामांनि
नामांस्मि ॥ येऽअग्नयंःपाञ्चंजन्याऽअस्याम्पृंथिव्यामाधिं ॥
तेषांमसित्त्वमुंत्तमःप्रनोजीवातंवेसुव ॥ ६७ ॥ [१०-१२]
वात्रंहत्त्यायशवंसे पृतनाषाह्यांयच[1] ॥ इन्द्रत्त्वावंर्त्तया
मसि ॥ ६८ ॥ सुहदांनुम्पुरुहूत । क्षियन्तंमहुरस्त्तामिन्द्रस
म्पिणक्कुणांरुम् ॥ अभिवृत्रं[2]वर्द्धमानम्पियांरुमपादंमिन्द्रतव ॥२०१॥

१ पृतनाषाह्याय च अत्र "सहेः पृतनायाः" (शु. य. प्रा. ३ अ. ७५ सू.) इत्यनेन पृतनाशब्दात्परस्य सस्य षत्वं निपात्यते। २ अभिवृत्रम् । अत्र "अक्षरश्मि" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन प्राप्तो अभि इत्यस्य ह्रस्वेकारस्य दीर्घाकारो "अभिविल्ययेषवीरविश्ववत्सवृत्रवाजयन्तेषु" (शु. य. प्रा. ३ अ. १०० सू.) इत्यनेन अभेः परेषु एतेषु पदेषु निषिद्ध्यते तेनात्र वकारे परेऽपि दीर्घो न भवति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सांजघन्थ ॥ ६९ ॥ विनं÷ ॥ विनंऽइन्द्रमृधोंजहिनीचायं
च्छपृतन्यतः ॥ योऽअस्म्माँ२॥ऽअंभिदासत्त्यधंरङ्गमयात
मं÷ ॥ ७० ॥ मृगोन । भीमःकुंचरोगिंरिष्ठाःपंरावतऽआ
जंगन्थापरंस्याः ॥ सृकᳩसंशायंपविंमिंन्द्रतिग्गमंविशत्रूंन्ता
ढिविमृधोंनुदस्व ॥ ७१ ॥ वैश्वानरोनं÷ ॥ वैश्वानरोनंऽ
ऊतयऽआप्प्रयांतुपरावतं÷ ॥ अग्ग्निर्न्नं÷सुष्टुतीरुपं ॥ ७२ ॥ ४८१
पृष्टोदिवि । पृष्टोऽअग्ग्निःपृथिव्यांम्पृष्टोविश्वाऽओषंधीराविं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सांजघन्थ ॥ ६९ ॥ त्विनं÷ ॥ त्विनंऽइन्द्रमृधोंजहिनीचायं

च्छपृतन्न्युतः ॥ योऽअस्म्माँ२॥ऽअंभिदासत्त्यधंरङ्गमयात

मं÷ ॥ ७० ॥ मृगोन । भीमःकुंचरोगिंरिष्ठाःपंरावतऽआ

जंगन्थापरंस्याः ॥ सृकᳬसह्यशायंपविमिंन्द्रतिग्गमंविशत्रूंन्ता

ढिविमृधोंनुदस्व ॥ ७१ ॥ वैश्श्वानरोनं÷ ॥ वैश्श्वानरोनंऽ

ऊतयऽआप्प्रयांतुपरावतं÷ ॥ अग्निर्न्नं÷सुष्टुतीरुपं ॥ ७२ ॥ ४८१

पृष्ठोदिवि । पृष्टोऽअग्निःपृंथिव्यामपृष्टोविश्वाऽओषंधीराविं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेश ॥ व्वैश्वानरश्सहंसापृष्टोऽअग्निश्सनोदिवासरि[1]षंस्पातु न
क्कम् ॥ ७३ ॥ अश्श्यामतम् ॥ अश्श्यामतङ्कामंमग्नेतवो
तीऽअश्श्यामंरयिꣳरंयिवꣳसुवीरम् ॥ अश्श्यामव्वाजंमभिवा
जयंन्तोश्श्यामंद्युम्नमंजराजरंन्ते ॥ ७४ ॥ व्वयन्तै ॥ व्वय
न्तैऽअध्वरंरिमाहिकामंमुत्तानहंस्तानमंसोपसद्यं ॥ यजिष्ठेन
मनंसायक्षिदेवानस्रेधतामन्मंनाव्विप्रोऽअग्ने ॥ ७५ ॥ धा

१ रिषष्पातु इति पदम् । अत्र "अध्वनो रजसो रिषः स्पृशस्पातौ" (शु. य. प्रा. ३ अ. २८ सू.) इत्यनेन रिषः पदस्य विसर्जनीयस्य पातु पदे परे सत्वे षत्वेच "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पातुघटितपकारस्य द्वित्वे रूपम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुच्छदग्निः ॥ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः ॥ सचेतसो विश्वे देवा यज्ञम्प्रावन्तु नः शुभे ॥ ७६ ॥ त्वँय्यविष्ठ । दाशुषो नॄँः पाहि शृणुधी गिरः ॥ रक्षा तोकमुत त्मना ॥ ७७ ॥ [१०-१३] इतिश्रीवाजसनेयसंहितायामष्टादशोऽध्यायः १८ ॥

श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ स्वाद्वीन्त्वैकादश, देवा यज्ञं विंशतिः, सुरावन्तं सप्तदशो, दीरतान्त्रयोदश, च्याजानुर्दश, सोमो राजाष्टौ, सीसेन तन्त्रं षोडश, सप्त पञ्च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नवतिः ॥ [अ. १९ मं. ९५ अनु. ७] हरिःॐ ॥ स्वाद्वी
न्त्वां । स्वादुनांतीव्रान्तीव्रेणामृताममृतेंन ॥ मधुंमतीम्मधुं
मतासृजामिसꣳसोमेंन ॥ सोमोंस्यश्विभ्यांम्पच्यस्वसरंस्व
त्यैपच्यस्वेन्द्रांयसुत्राम्म्णेंपच्यस्व ॥ १ ॥ परीतः[1] ॥ परीतो
षिंञ्चतासुतꣳसोमोयऽउंत्तमꣳहविः ॥ दधन्वायोनर्य्योंऽअ
प्स्वन्तरासुषावसोममद्रिंभिः ॥ २ ॥ वायोःपूतः । पवित्रें

१ परीतः सिञ्चता इति पदे । अत्र "उकारमितः सिञ्चता सोपधः" (शु. य. प्रा. ३ अ. ४६ सू.) इत्यनेन इतःसंबन्धिविसर्गस्य सिञ्चतौ परे सोपध उकारो विधीयते परश्च मूर्धन्यो भवति इति । सोपधे ओकारे सकारस्य मूर्धन्यत्वे च परीतोषिञ्चता इति सिद्धम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

णप्प्रत्यङ्क्सोमोऽअतिंद्रुतः ॥ इन्द्रस्ययुज्यःसखा ॥ वायोः पूतःपवित्रेणप्प्राङ्क्सोमोऽअतिद्रुतः ॥ इन्द्रस्ययुज्यःसखा ॥ ३ ॥ पुनातिते । परिस्रुतःसोमःसूर्य्यस्यदुहिता ॥ वारेण शश्वंतातना ॥ ४ ॥ ब्रह्मक्षत्रम् ॥ ब्रह्मक्षत्रम्पंवतेतेजऽइन्द्रियःसुरयासोमःसुतऽआसुतोमदाय ॥ शुक्रेणदेवदेवताःपिपृग्धिरसेनान्नँयजमानायधेहि ॥ ५ ॥ कुविदङ्ग । यवम ४८५

१ अत्र "परं तु रेफहकाराभ्याम्" (शु. य. प्रा. ३ अ. १०१ सू.) इत्यनेन हकारात्परस्य मकारस्य द्वित्वे प्राप्तेऽपि "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन द्वित्वविधानात्तेनैवात्र स्पर्शवर्णपरे मकारे तस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्तोयवंश्चिद्यथादान्त्यंनुपूर्वंविंयूयं ॥ इहेहैषाङ्कृणुहिभोजंना
निर्येबर्हिषोनमंऽउक्तिंय्यजंन्ति ॥ उपयामगृंहीतोस्याश्वि
भ्याान्त्वासरंस्वत्त्यैत्त्वेन्द्रांयत्त्वासुत्राम्म्णंऽएषतेयोनिस्त्तेज
सेत्त्वावीर्य्यांयत्त्वाबलांयत्त्वा ॥ ६ ॥ नानाहि । वांन्देवहिं
तꣳसदंस्कृतम्मासꣳसृंक्षाथाम्परमेव्योमन् ॥ सुरात्त्वमसिंशु
ष्मिणीसोमंऽएषमामांहिꣳसीःस्वाँय्योनिंमाविशन्तीं ॥ ७ ॥
उपयामगृंहीतोसि ॥ उपयामगृंहीतोस्याश्विनन्तेजं÷सारस्व

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तंव्वीर्य्यमैन्द्रम्बलम् ॥ एषतेयोनिर्म्मोदायत्त्वानन्दायत्त्वाम
हसेत्त्वा ॥ ८ ॥ तेजोसि ॥ तेजोसितेजोमयिधेहिव्वीर्य्यम
सिव्वीर्य्यम्मयिधेहिबलमसिबलम्मयिधेह्योजोस्योजोमयिधे
हिमन्युरसिमन्युम्मयिधेहिसहोसिसहोमयिधेहि ॥ ९ ॥
याव्याघ्रम् ॥ याव्याघ्रंव्विषूचिकोभौवृकंञ्चरक्षति ॥ श्येन
म्पतत्रिणꣳसिꣳहꣳसेमम्पात्त्वꣳहसः ॥ १० ॥ यदापि
पेष । मातरम्पुत्त्रःप्रमुदितोधयन् ॥ एतत्तदग्ग्नेऽअनृणोभवा ४८७

सं ३५

१ अत्र "परं तु रेफहकाराभ्याम्" (शु. य. प्रा. अ. सू.) इत्यनेन सकारस्य द्वित्वम् । एवं व्वीर्य्यमसि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म्म्यहंतौपितरौमयां ॥ सम्पृचंस्त्थसम्मांभद्द्रेणंपृङ्क्तविपृचंस्त्थ
व्विमांपाप्प्मनांपृङ्क्त ॥ ११ ॥ [११-१] देवायज्ञम् ॥ देवाय
ज्ञमंतन्न्वतभेषजम्भिषजाश्श्विनां ॥ व्वाचासरंस्वतीभिषागिन्द्रां
येन्द्रियाणिदधंतः ॥ १२॥ दीक्क्षायैंरूपम्॥ दीक्क्षायैंरूपꣳश
ष्पांणिप्प्रायणीयंस्यतोक्क्मांनि ॥ क्रयस्यंरूपꣳसोमंस्यलाजाः
सोंमाꣳशवोमधुं ॥ १३ ॥ आतित्थ्यरूपम्मासंरम् ॥ आति ॥ २०५ ॥
त्थ्यरूपम्मासंरम्महावीरस्यंनग्ग्नहुः ॥ रूपमुंपसदांमेतत्ति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्नोरात्रीᳯसुरासुंता ॥ १४ ॥ सोमंस्यरूपम् ॥ सोमंस्यरूप
क्रीतस्यंपरिस्नुत्त्परिषिच्च्यते ॥ अश्विब्भ्यांन्दुग्ग्धम्भेषुजमि
न्द्रांयैन्द्रᳯसरंस्वत्त्या ॥ १५ ॥ आसन्दीरूपम् ॥ आसन्दी
रूपᳯराजासुन्द्यैव्वेद्यैकुम्भीसुराधानी ॥ अन्तंरऽउत्तरवेद्यारू
पङ्कारोतरोभिषक् ॥ १६ ॥ व्वेद्याव्वेदिः ॥ व्वेद्याव्वेदिᳯसमा
प्प्यतेबर्हिषांबर्हिरिन्द्रियम् ॥ यूपेनयूपंऽआप्प्यतेप्प्रणीतोऽ ४८९
अग्ग्निरग्ग्निनां ॥ १७ ॥ हविर्द्धानँय्यत् ॥ हविर्द्धानँय्यद्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्विनाग्नीँ॒रुँस्यत्त्सरस्वती ॥ इन्द्रायैन्द्रꣳसदस्कृतम्पत्क्नीशा
लुङ्गार्हपत्त्यꣳ ॥ १८ ॥ प्रैषेभिःप्प्रैषान् ॥ प्रैषेभिःप्प्रैषा
नाप्प्नोत्त्याप्प्रीभिराप्प्रीर्य्यज्ञस्य ॥ प्रयाजेभिरनुयाजान्वषट्
कारेभिराहुतीꣳ ॥ १९ ॥ पशुभिःपशून् ॥ पशुभिःपशूना
प्प्नोतिपुरोडा[1]शैर्हवीꣳष्या ॥ छन्दोभिꣳसामिधेनीर्य्या
ज्याभिर्व्वषट्कारान् ॥ २० ॥ धानाःकरम्भः । सक्त्तुवꣳपरी

---

१ पुरः दाशैः इति पदम् । अत्र "पुरोदाशे" (शु. य. प्रा. ३ अ. ४४ सू.) इत्यनेन पुरशब्दघटितविसर्गस्य उकारे दाशशब्दघटितस्य दकारस्य मूर्धन्ये डकारे "उवर्ण ओकारम्" (शु. य. प्रा. ४ अ. ५४ सू.) इत्यनेन कंठ्यादकारादुत्तरे उवर्णे उभयो रकारोकारयोरोकारे पुरोडाशैः इति पदम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वापःपयोदधिं ॥ सोमंस्यरूपꣳहविषऽआमिक्षावाजिनम्म
धुं ॥ २१ ॥ धानानांꣳरूपम् ॥ धानानांꣳरूपङ्कुवलम्परी
वापस्यंगोधूमांꣳ ॥ सक्तूनाꣳरूपम्बदरमुपवाकांꣳकरम्भस्यं
॥ २२ ॥ पयसोरूपम् ॥ पयसोरूपँय्यद्यवांदध्नोरूपङ्कर्कन्धूं
नि ॥ सोमंस्यरूपंवाजिनꣳसौम्यस्यंरूपमामिक्षा ॥ २३ ॥
आश्रावय ॥ आश्रावयेतिंस्तोत्रियांꣳप्रत्याश्रावोऽअनुं
रूपꣳ ॥ यजेतिंधाय्यारूपम्प्रगाथायेयजामहाः ॥ २४ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्द्धऽऋचैरुक्थानाम् ॥ अर्द्धऽऋचैरुक्थानांꣳ रूपम्पदैरा
प्नोतिनिविदः ॥ प्रणवैः शस्त्राणांꣳ रूपम्पयंसासोमंऽआ
प्यते ॥ २५ ॥ अश्विभ्याम्प्रातःꣳसवनम् ॥ अश्विभ्याम्प्रा
तःꣳसवनमिन्द्रेणैन्द्रम्माध्यन्दिनम् ॥ वैश्वदेवꣳसरस्वत्यातृ
तीयम्माप्तꣳसवनम् ॥ २६ ॥ वायव्यैर्वायव्यानि ॥ वायव्यैर्वा
युव्यान्याप्नोतिसतेनद्रोणकलशम् ॥ कुम्भीभ्याम्मम्भृणौ
सुतेस्त्थालीभिस्त्थालीराप्नोति ॥ २७ ॥ यजुर्भिराप्यन्ते ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सजुर्भिराप्प्यन्तेग्ग्रहाग्ग्रहैस्त्तोमाँश्श्चविष्टुतीः ॥ छन्दोभिरु

क्क्थाशुस्त्राणिसाम्म्नांवभृथऽआप्प्यते ॥ २८ ॥ इडाभिर्भ्भ

क्क्षान् ॥ इडाभिर्भ्भक्क्षानाप्प्नोतिसूक्क्तवाकेनाशिषः ॥ शँस्यु

नांपत्क्नीसँय्याजान्त्संमिष्ट्टयजुषांसँ᳭स्त्थाम् ॥ २९ ॥ व्व्रतेन

दीक्क्षाम् ॥ व्व्रतेनंदीक्क्षामाप्प्नोतिदीक्क्षयाप्प्नोतिदक्क्षिणाम् ॥

दक्क्षिणाश्श्रद्धामाप्प्नोतिश्श्रद्धयांसत्त्यमाप्प्यते ॥ ३० ॥ एताव ४१२

१ पत्क्नी संय्याजान् । अत्र "आविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन प्राप्तस्य षस्य "अनुसन्तनोतु°" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन निषेधे न षत्वम् । ततः "अन्तस्थामन्तस्थास्वनुनासिकां परसस्थानाम् । (शु. य. प्रा. ४ अ. १० सू.) इत्यनेन समः मकारस्य अन्तस्थे याजान्पदे अन्तस्थामनुनासिकामापद्यते । इति पस्य यकारे अनुनासिके रूपम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्रूपम् ॥ एतावंद्द्रूपँय्यज्ञस्ययद्देवैर्ब्रह्मणाकृतम् ॥ तदेतत्सर्व्व
माप्नोतियज्ञेसौत्रामणीसुते ॥ ३१ ॥ [२०-२] सुरांवन्त
म्बर्हिषदंम् ॥ सुरांवन्तम्बर्हिषदंᳬसुवीरँय्यज्ञᳬहिंन्वन्तिम
हिषानमोभिंः ॥ दधांनाᳬसोमंन्दिविदेवतांसुमदेमेन्द्रँय्यजं
मानाᳬस्वर्क्काः ॥ ३२ ॥ यस्ते ॥ यस्तेरसᳬसम्भृतऽओषंधी
षुसोमंस्यशुष्म्मᳬसुरंयासुतस्यं ॥ तेनंजिन्वयजंमानम्मदेनस ॥२०८॥
रंस्वतीमाश्श्विनाविन्द्रंमग्निम् ॥ ३३ ॥ यमश्श्विनां ॥ यम ४९४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्चिनान्नमुंचेरासुरादधिसरंस्वत्यसुंनोदिन्द्रियायं ॥ इमन्तᳬ
शुक्कम्मधुंमन्तामिन्दुहुसोमहुराजांनमिहभंक्षयामि ॥ ३४॥
यदत्रं । रिप्तᳬरसिनंःसुतस्ययदिन्द्रोऽअपिंबच्छचींभिः ॥
अहन्तदंस्यमनंसाशिवेनसोमहुराजांनमिहभंक्षयामि ॥३५॥
पितृभ्यंःस्वधायिभ्यंः । स्वधानमंःपितामहेभ्यंःस्वधा
यिभ्यंःस्वधानमःप्रपिंतामहेभ्यःस्वधायिभ्यंःस्वधान
मंः ॥ अक्षंन्पितरोमींमदन्तपितरोतींतृपन्तपितरःपितंरः ४९९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुन्धंद्ध्वम् ॥ ३६ ॥ पुनन्तुंमा । पितरं÷सोम्म्यासं÷पुनन्तु
मापितामुहाऽ॒पुनन्तुप्प्रपिंतामहाऽ॑ ॥ पुवित्त्रेंणशुतायुंषा ॥
पुनन्तुंमापितामुहाऽ॒पुनन्तुप्प्रपिंतामहाऽ॑ ॥ पुवित्त्रेंणशुतायु
षाव्विश्श्वमायुर्व्यंश्नवै ॥ ३७ ॥ अग्नुऽआयूंꣳषि । पवसुऽ
आसुवोर्ज्जमिषंञ्चनऽ॑ ॥ आरेबांधस्वदुच्छुनांम् ॥ ३८ ॥
पुनन्तुंमा । देवजुनाऽ॒पुनन्तुमनंसाधियं÷ ॥ पुनन्तुव्विश्श्वां
भूतानिजातंवेदऽ॑पुनीहिमां ॥ ३९ ॥ पुवित्त्रेंणपुनीहि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

माशुक्क्रेणंदेवदीद्यंत् ॥ अग्नेक्कत्त्वाक्कतुं१॥ऽरनु ॥ ४० ॥
यत्ते । पवित्रंमर्चिष्यग्नेव्वितंतमन्तरा ॥ ब्रह्मतेनंपुनातुमा
॥ ४१ ॥ पवंमानःसः ॥ पवंमानःसोऽअद्यनं÷पवित्रेंण
व्विचंर्षणिः ॥ यःपोतासपुंनातुमा ॥ ४२ ॥ उभाब्भ्यांन्देव ।
सवितःपवित्रेंणसवेनंच ॥ माम्पुंनीहिव्विश्श्वतं÷ ॥ ४३ ॥
व्वैश्श्वदेवीपुंनती । देव्यागाद्यस्यांमिमाबह्वयस्तन्वोवीतपृष्ठाः॥ ४१७
तयामदंन्तःसधमादेंषुव्वयꣳस्यांमपतंयोरयीणाम् ॥ ४४ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

येसंमानाः । समंनसःपितरोयमराज्ज्ये ॥ तेषाँल्लोकःस्वधा
नमोयज्ञोदेवेषुंकल्प्पताम् ॥ ४५ ॥ येसंमानाः । समंनसो
जीवाजीवेषुंमामकाः ॥ तेषाठंश्रीर्म्मयिंकल्प्पतामस्म्मिँल्लो
केशतᳬसमाः ॥ ४६ ॥ द्वेसृती ॥ द्वेसृतीऽअंशृणवम्पितॄ
णामहन्देवानांमुतमर्त्त्यानाम् ॥ ताभ्यांमिदंविश्वमेजत्त्समे
तियदंन्तरापितरंम्मातरंञ्च ॥ ४७ ॥ इदᳬहविः ॥ इदᳬह
विःप्प्रजननंनम्मेऽअस्त्तुदशंवीरᳬसर्व्वगणठंस्वस्त्तये ॥ आत्मस

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सनिं[1]प्प्रजासनिं[2]पशुसनिंल्लोकसन्न्यंभयसनिं ॥ अग्निःप्प्रजाम्बं
हुलाम्मेंकरोत्त्वन्नम्पयोरेतोऽअस्म्मासुंधत्त ॥४८॥ [१७-३]
उदीरताम् ॥ उदीरतामवंरऽउत्त्परांसऽउन्म्मंद्ध्यमाःपितरंःसो
म्म्यासंः ॥ असुंय्यऽईयुरंवृकाऽऋतज्ञास्त्तेनोंवन्तुपितरोह
वेंषु ॥ ४९ ॥ अङ्गिरसोनंः । पितरोनवंग्ग्वाऽअथंर्व्वाणोभृग
वंःसोम्म्यासंः ॥ तेषांव्वयꣳसुंमतौयज्ञियांनामपिंभद्द्रेसौंमन

१-२ प्रजासनि पशुसनि "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षकारप्राप्तौ "अनुसन्तनोतु°" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन निषिद्ध्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सेस्याम ॥ ५० ॥ येनः ॥ येनःपूर्व्वेपितरःसोम्म्यासोनूहि
रेसोमपीथंवसिष्ठाः ॥ तेभिर्यमःसंरराणोहवी ँ ष्युशन्नु
शद्भिःप्रतिकाममत्तु ॥ ५१ ॥ त्व ँ सोम ॥ त्व ँ सोमप्र
चिकितोमनीषात्व ँ रजिष्ठमनुनेषिपन्थाम् ॥ तवप्रणीती
पितरोनऽइन्द्रोदेवेषुरत्नमभजन्तधीराः ॥ ५२ ॥ त्वयाहि ॥
त्वयाहिनःपितरःसोमपूर्व्वेकर्म्माणिचक्रुःपवमानधीराः ॥ ॥ २११ ॥
वन्वन्नवातःपरिधीँ १ ॥रपोर्णुवीरेभिरश्वैर्म्मघवाभवानः ५००

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ ५३ ॥ त्वꣳसोम । पितृभिः संविदानोनुद्यावापृथिवीऽ
आततन्थ ॥ तस्मैतऽइन्दोहविषांविधेमवयꣳस्यामपतयो
रयीणाम् ॥ ५४ ॥ बर्हिषदꣳपितरꣳ ॥ बर्हिषदꣳपितरऽऊत्त्यु
र्वागिमावोहव्याचकृमाजुषध्वम् ॥ तऽआगतावसाशन्तमेना
थानꣳशꣳय्योररपोदधात ॥ ५५ ॥ आहम् ॥ आहम्पितॄन्त्सु
विदत्राँ२॥ऽअवित्तिसनपातञ्चविक्क्रमणञ्चविष्णोꣳ ॥ बर्हिष ६०१
दोयेस्वधयासुतस्यभजन्तपित्त्वस्तऽइहागमिष्ठाꣳ ॥ ५६ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपंहूताःपितरं÷ । सोम्म्यासौबर्हिष्ष्येषुनिधिषुप्प्रियेषुं ॥
तऽआगंमन्तुतऽइहश्श्रुंवन्त्वधिंब्रुवन्तुतेवन्त्वस्म्मान् ॥ ५७ ॥
आयंन्तु । नःपितरं÷सोम्म्यासोग्ग्निष्ष्वात्ताःपथिभिर्द्देवया
नैः ॥ अस्मिम्मन्यज्ञेस्वधयामदन्तोधिंब्रुवन्तुतेवन्त्वस्म्मान्
॥ ५८ ॥ अग्ग्निष्ष्वात्ताःपितरः ॥ अग्ग्निष्ष्वात्ताःपितरऽ
एहगंच्छतसदंः÷सदःसदतसुप्प्रणीतयः ॥ अत्ताहवीꣳषि
प्प्रयंतानिबर्हिष्ष्यथांरयिꣳसर्व्वंवीरन्दधातन ॥ ५९ ॥ येऽ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अग्निष्वात्ताः ॥ येऽअग्निष्वात्ता येऽअनग्निष्वात्ता मध्ये दिवः स्वधया मादयन्ते ॥ तेभ्यः स्वराडसुनीतिमेतां यथावशं तन्वं कल्पयाति ॥ ६० ॥ अग्निष्वात्तानृतुमतः ॥ अग्निष्वात्तानृतुमतो हवामहे नाराशंसे सोमपीथं यऽआशुः ॥ ते नो विप्रासः सुहवा भवन्तु वयं स्याम पतयो रयीणाम् ॥ ६१ ॥ [१३-४] आच्याजानु । दक्षिणतो निषद्येमं यज्ञमभिगृणीत विश्वे ॥ मा हिंसिष्ट पितरः केन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चिन्नोसद्धूऽआगं÷पुरुपताकरांम ॥ ६२ ॥ आसीनासोऽअरु
णीनांम् ॥ आसीनासोऽअरुणीनांमुपस्त्थेरयिन्धंत्तदाशुषेम
र्त्यांय ॥ पुत्रेब्भ्यं÷पितरस्तस्यवस्व÷प्प्रयंच्छततऽइहोर्ज्जंन्द
धात ॥ ६३ ॥ यमंग्ग्ने । कव्यवाहनत्त्वञ्चिन्मन्न्यंसेरयिम् ॥
तन्नोंगीर्ब्भिश्श्रवाय्यंन्देवत्राप॑नयासुजंम् ॥ ६४ ॥ योऽअ
ग्निः । कंव्यवाहंनःपितॄन्यक्षंदृतावृधं÷ ॥ प्रेदुंहव्यानिंव्वोच
तिदेवेब्भ्यंश्चपितृब्भ्यऽआ ॥ ६५ ॥ त्वमंग्ग्ने ॥ त्वमंग्ग्नऽई

१ पनय सुजम् इति पदम् । अत्र "अथोदारिथपनय°" (शु. य. प्रा. ३ अ. ११३ सू.) इत्यनेन सूत्रोक्तपदानां यकारे परे दीर्घो विधीयते । तेन पनयासुजम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ड्डितः कंव्यवाहनावाड्व्यानिसुरभीणिकृत्त्वी ॥ प्रादांत्पितृ
भ्यः स्वधयातेऽअक्षन्नद्धित्त्वन्देवप्प्रयंताहवींऽषि ॥ ६६ ॥
येचं ॥ येचेहपितरोयेचनेहयाँश्चंविद्मयाँ२॥ऽउंचनप्प्रविद्
द्म ॥ त्वंवेत्थयतितेजातवेदः स्वधाभिर्य्यज्ञः सुकृतञ्जुषस्व
॥६७॥ इदम्पितृभ्यः ॥ इदम्पितृभ्योनमोऽअस्त्वद्ययेपूर्व्वा
सोयऽउपरासऽईयुः ॥ येपार्त्थिवेरजस्यानिषंत्तायेवानूनः सुवृ
जनांसुद्धिक्षु ॥६८॥ अधायथा । नः पितरः परासः प्प्रत्कासोऽ ९०९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ड्डितः कंव्यवाहुनावांइव्यानिसुरभीणिकृत्त्वी ॥ प्रादाःपितृ
भ्भ्यं स्वधयातेऽअंक्षन्नद्धित्त्वन्देवप्प्रयंताहवींᳫंषि ॥ ६६ ॥
येचं ॥ येचेहपितरोयेचनेहयाँश्चंविद्मयाँ२॥ऽउंचनप्प्रंवि
द्म ॥ त्वंवेत्थयतितेजांतवेदःस्वधाभिर्य्यज्ञᳫंसुकृतञ्जुषस्व
॥६७॥ इदम्पितृभ्भ्यं ॥ इदम्पितृभ्भ्योनमोऽअस्त्त्वद्ययेपूर्व्वा
सोयऽउपंरासऽईयुः ॥ येपार्थिवेरजस्यानिषंत्तायेवानूनᳫंसुवृ
जनांसुविक्षु ॥६८॥ अधायथां । नःपितरःपरांसःप्प्रत्नासोऽ

१०९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अग्नऽऋतमांशुषाणाः ॥ शुचीदंयन्दीधितिमुक्थशासःक्षामा
भिन्दन्तोऽअरुणीरपंव्रन् ॥ ६९॥ उशन्तंस्त्त्वा ॥ उशन्तंस्त्त्वा
निधीमहयुशन्तःसमिंधीमहि ॥ उशन्नुंशतऽआवंहपितॄंन्हविं
षेऽअत्तंवे ॥ ७० ॥ अपाम्फेनेंन ॥ अपाम्फेनेंननमुंचेःशिरंऽ
इन्द्रोदंवर्त्तयः ॥ विश्वायदजंयस्पृधंः ॥ ७१ ॥ [१०-५]
सोमोराजा ॥ सोमोराजामृतः सुतऽऋजीषेणांजहान्मृत्त्युम् ॥

१ पितृन्हविषे । अत्र पितॄन् पदस्य नस्य "ऋषरेभ्यः" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन समानपदे विधीयमानं णत्वं प्राप्तम् । परञ्च "प्रकृत्या पदान्तीयः" (शु. य. प्रा. ३ अ. ९० सू.) इत्यनेन पदान्तीयस्य नकारस्य णत्वं नोपपद्यते । इति निषेधान्न णत्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋतेनं॑स॒त्त्यमि॑न्द्रि॒यंवि॒पानं॑ᳪ शु॒क्क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒द
म्पयो॒मृत॒म्मधु॑ ॥ ७२ ॥ अ॒द्भ्यः क्क्षी॒रम् ॥ अ॒द्भ्यः क्क्षी॒रंव्व्यं
पि॒ब॒त्कु॒ङ्गाङ्गि॑र॒सो॑धि॒या ॥ ऋतेनं॑स॒त्त्यमि॑न्द्रि॒यंवि॒पानं॑ᳪ
शु॒क्क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥ ७३ ॥ सो
मं॑म॒द्भ्यः ॥ सोमं॑म॒द्भ्योव्व्यं॑पिब॒च्छन्द॑सा हᳪ॒सः शु॑चि॒षत् ॥
ऋतेनं॑स॒त्त्यमि॑न्द्रि॒यंवि॒पानं॑ᳪ शु॒क्क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒ ६०७
दम्पयो॒मृत॒म्मधु॑ ॥ ७४ ॥ शतम् ॥ ११०० ॥ अन्ना॑त्परि॒स्रु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तं ॥ अन्नात्परिस्त्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्र
जापतिः ॥ ऋतेन सत्यमिन्द्रियं विपान ँ शुक्रमन्धस इन्द्र
स्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७५ ॥ रेतो मूत्रम् ॥ रेतो मूत्रं
विजहाति योनिम्प्रविशदिन्द्रियम् ॥ गर्भो जरायुणावृत उ
ल्बञ्जहाति जन्मना ॥ ऋतेन सत्यमिन्द्रियं विपान ँ शुक्रम
न्धस इन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७६ ॥ दृष्ट्वा रूपे
व्याकरोत्सत्यानृते प्रजापतिः ॥ अश्रद्धामनृते दधाच्छ्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ह्वाᳬसत्त्ये प्प्रजापतिः॥ ऋतेनंसत्त्यमिंन्द्रियंव्विपानᳬ शुक्रम
न्धंसऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं ॥ ७७ ॥ व्वेदेंनरू
पे । व्व्यांपिबत्त्सुतासुतौप्प्रजापतिः ॥ ऋतेनंसत्त्यमिंन्द्रियंव्वि
पानᳬ शुक्रमन्धंसऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं॥७८॥
दृष्ट्वापरिस्स्रुतंः ॥ दृष्ट्वापरिस्स्रुतोरसᳬ शुक्रेणंशुक्रंव्व्यांपिब
त्पयᳬसोमम्प्रजापतिः॥ ऋतेनंसत्त्यमिंन्द्रियंव्विपानᳬशुक्रम
न्धंसऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं ॥ ७९ ॥ [८-६]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सीसेनतन्त्रम् ॥ सीसेनतन्त्रम्मनंसामनीषिणऽऊर्णासूत्रेणंक
वयोव्वयन्ति ॥ अश्विनायज्ञꣳसविता सरस्वतीन्द्रस्यरूपंव्वरुणो
भिषज्ज्यन् ॥ ८० ॥ तदस्य । रूपममृतꣳशचीभिस्तिस्रोद
धुर्देवताꣳसꣳरराणाः ॥ लोमानिशष्पैर्ब्बहुधानतोक्मभि
स्त्त्वगस्यमाꣳसमभवन्नलाजाः ॥ ८१ ॥ तदश्विना । भिष
जारुद्रवर्त्तनीसरस्वतीव्वयतिपेशोऽअन्तरम् ॥ अस्त्थिमज्जान्

१ सीसेन तन्त्रम् । अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षत्वापत्तौ "अनुसन्तनोतु°" । (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन निषिध्यते । अतो न षकार इत्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म्मासैरैहंकारोतरेणदधंतोगवान्त्वचि ॥ ८२ ॥ सरस्वतीम
नसा । पेशलंव्वसुनासत्त्याभ्यांव्वयतिदर्शतंव्वपुः ॥ रसम्प
रिस्रुतानरोहितन्नग्नहुर्द्धीरस्तसरन्नवेमं ॥ ८३ ॥ पयसाशुक्क
म् ॥ पयसाशुक्कममृतंञ्जनित्रह्सुरयामूत्त्राज्जनयन्तरेतः ॥
अपामतिन्दुर्म्मतिम्बाधमानाऽऊवद्ध्यंव्वातंᳬसब्बुन्तदारात्
॥ ८४ ॥ इन्द्रःसुत्रामा ॥ इन्द्रःसुत्रामाहृदयेनसत्त्यम्पुरो ५११
सं. ३७ डाशेनसविताजजान ॥ यकृत्क्कोमानंव्वरुणोभिषज्ज्यन्मतस्न्ने

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्वायव्यैर्नमिनातिपित्तम् ॥ ८५ ॥ आन्त्राणिस्थालीः ॥ आन्त्रा

॥२१७॥ णिस्थालीर्म्मधुपिन्वमानागुदाःपात्राणिसुदुघानधेनुः ॥ श्ये

नस्यपत्रन्नप्लीहाशचीभिरासन्दीनाभिरुदरन्नमाता ॥८६॥ कु

म्भोव्वनिष्ठुः ॥ कुम्भोव्वनिष्ठुर्ज्जनिताशचीभिर्य्यस्मिन्नग्ग्रेयो

न्याङ्गर्भोऽअन्तः ॥ प्लाशिर्व्यक्तःशतधारऽउत्सोदुहेनकु

म्भीस्वधाम्पितृभ्यः ॥८७॥ मुखꣳसत् ॥ मुखꣳसदस्यशिरऽ ॥ २१७ ॥

इत्सतेनजिह्वापवित्रमश्विनासन्त्सरस्वती ॥ चप्पन्नपायुर्भि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षगंस्यव्वालौंव्वुस्त्तिर्न्नंशेपोहरंसातरुस्त्री ॥ ८८ ॥ अश्विभ्यां
ञ्चक्षुंः ॥ अश्विभ्याञ्चक्षुरमृतङ्ग्रहाभ्याञ्छागेनतेजोहविषाशृतेनं ॥ पक्ष्मांणिगोधूमैंःकुवलैरुतानिपेशोनशुक्कमसितंव्वसाते ॥ ८९ ॥ अविर्न्न । मेषोनासिव्वीर्य्यायप्प्राणस्यपन्थाऽअमृतोग्ग्रहाभ्याम् ॥ सरस्वत्त्युपवाकैंर्व्यानन्नस्यांनिबर्हिर्वदरैर्ज्जजान ॥ ९० ॥ इन्द्रंस्यरूपम् ॥ इन्द्रंस्यरूपमृषभोवलांयकर्णाभ्याꣳश्रोत्रंममृतङ्ग्रहाभ्याम् ॥ यवानबर्हिर्भ्रु

६१३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विकेसंराणिकुर्क्कन्धुंजज्ञेमधुंसारघम्मुखात् ॥ ९१ ॥ आत्क्मन्नुपस्त्थैं ॥ आत्क्मन्नुपस्त्थेनवृकंस्यलोमम्मुखेश्म्मश्श्रूंणिन्न्याघ्रलोम ॥ केशानशीर्षन्न्यशंसेश्रियैशिखांसिह्हस्यलोमत्त्विषिरिन्द्रियाणिं ॥ ९२ ॥ अङ्गान्न्यात्क्मन् ॥ अङ्गान्न्यात्क्मन्निभषजातदश्श्विनात्क्मानमङ्गैःसमंधात्त्सरंस्वती ॥ इन्द्रंस्यरूपꣳशतमानमायुंश्श्चन्द्रेणज्ज्योतिरमृतन्दधाना । ॥ ९३ ॥ सरंस्वतीयोन्न्याम् ॥ सरंस्वतीयोन्न्याङ्गर्भमन्तराश्श्विब्भ्यांम्प

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्क्रीसुकृतम्बिभर्त्ति ॥ अपा[1]ꣳरसेनवरुणोनसाम्नेन्द्रꣳश्रियै जनयन्नप्सुराजा ॥ ९४ ॥ तेजः पशूनाम् ॥ तेजः पशू नाꣳहविरिन्द्रियावत्परिस्रुतापयसासारघम्मधु ॥ अश्वि भ्यान्दुग्धम्भिषजासरस्वत्यासुतासुताभ्याममृतꣳसोमऽइ न्दुः ॥ ९५ ॥ [१६-७] इतिश्रीवाजसनेयसंहितायामेकोन विंशतितमोऽध्यायः ॥ १९ ॥ श्रीवेदपुरुषायनमः ॥ अनु

---

१ अपाꣳरसेन। अत्र "ऋषरेभ्यो नकारो णकारं समानपदे" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन विधीयमानं "स्वरयवहकपैश्च" (शु. य. प्रा. ३ अ. ८६ सू.) इत्यनेन एतैर्व्यवधानेऽप्यत्र णत्वं सकारस्य तद्व्यतिरिक्तवर्णस्य व्यवधानेनाप्राप्तमपि "शिलिसिस्मध्य०" (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन णत्वमेतेषु व्यवहितेषु निषिद्ध्यते तच्छिष्यबुद्धिव्युत्पत्त्यर्थम्। स्वरयवहकपातिरिक्तवर्णव्यवधाने ऋषरेभ्यो णत्वप्राप्त्यभावात्।

६१६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाकसूत्रम् ॥ क्षत्रस्ययोनिस्त्रयोदश, यद्देवादशा, म्यादधा
म्यष्टौ, योभूतानाञ्चतस्रः, समिद्धऽइन्द्रऽएकादश, ऽआया
त्वष्टौ, समिद्धोऽअग्निर्द्वादशा, श्विनाहविस्त्रयोदशा, श्विना
तेजसैकादश, नव नवतिः ॥ [अ. २० मं. ९० अ. ९]
हरिः ॐ ॥ क्षत्रस्ययोनिः ॥ क्षत्रस्ययोनिरसिक्षत्रस्यनाभि
रसि ॥ मात्त्वाहिᳬसीन्मामाहिᳬसीः ॥ १ ॥ निषसाद । ॥२१९॥
धृतव्व्रतोव्वरुणःपस्त्त्यास्वा ॥ साम्म्राज्ज्यायसुक्रतुः ॥ मृत्त्योः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पाहिव्विद्योत्त्पाहि ॥ २ ॥ देवस्यंत्त्वा । सवितुः प्प्रंसवेश्विनो

र्ब्बाहुब्भ्याम्पूष्णणोहस्त्ताब्भ्याम् ॥ अश्विनोब्भैषंज्ज्येनतेजंसे

ब्ब्रह्मवर्च्चसायाभिषिञ्चामिसरस्वत्त्यैभैषज्ज्येनव्वीर्र्यायान्नाद्या

याभिषिञ्चामीन्द्रस्येन्द्रियेणबलायाश्रियैयशसेभिषिञ्चामि

॥ ३ ॥ कोसि । कतमोसिकस्म्मैत्त्वाकायत्त्वा ॥ सुश्श्लोक

सुमङ्गलसत्त्यंराजन् ॥ ४ ॥ शिरोमे ॥ शिरोमेश्श्रीर्र्यशोमु

खन्त्विषिःकेशाश्श्चश्श्मश्श्रूणि ॥ राजामेप्प्राणोऽअमृतंꣳसम्म्रा ६१७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ट्चक्षुर्व्विराट्श्रोत्रम् ॥ ५ ॥ जिह्वामे । भद्रंवाङ्महोमनोम
न्युःस्वराड्भामं÷ ॥ मोदाꣳप्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मे
सहं÷ ॥ ६ ॥ बाहूमे ॥ बाहूमेबलमिन्द्रियꣳहस्तौमेकर्म्म
वीर्य्यम् ॥ आत्माक्षत्रमुरोमम ॥ ७ ॥ पृष्ठीर्म्मे । राष्ट्रमु
दरमꣳसौग्रीवाश्चश्रोणी । ऊरूऽअरत्नीजानुनीविशोमेङ्गा
निसर्व्वतं÷ ॥ ८ ॥ नाभिर्म्मे । चित्तंविज्ञानम्पायुर्म्मेपचिति
र्भसत् ॥ आनन्दनन्दावाण्डौमेभगꣳसौभाग्यम्पसं÷ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जङ्घाब्भ्याम्पद्भ्यान्धर्म्मोस्म्मिविशिराजाप्प्रतिष्ठितः ॥ ९ ॥
प्रतिक्षत्रे । प्प्रतितिष्ठामिराष्ट्रेप्प्रत्त्यश्वेषुप्प्रतितिष्ठामिगोषु
प्रत्त्यङ्गेषुप्प्रतितिष्ठाम्म्यात्मन्न्प्रतिप्प्राणेषुप्प्रतितिष्ठामिपुष्टे
प्प्रतिद्यावापृथिव्योःप्प्रतितिष्ठामियज्ञे ॥ १० ॥ त्रयादेवाः ॥
त्रयादेवाऽएकादशत्त्रयस्त्रिꣳशाःसुराधसः ॥ बृहस्प्पतिपुरोहि
तादेवस्यसवितुःसवे ॥ देवादेवैरवन्तुमा ॥ ११ ॥ प्रथमाद्वि
तीयैः ॥ प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाःसत्त्येनस
५११

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि. ॥२२१॥ | पू. अ. ॥ २० ॥

त्त्वयँयज्ञेनंयज्ञोयजुर्भिर्यजूᳪंषिसामांभिः सामांन्यृग्भिर्ऋ
चंः [1]पुरोनुवाक्याभिः पुरोनुवाक्यायाज्याभिर्याज्यावषट्का
रैर्वषट्काराऽआहुंतिभिराहुंतयोमेकामान्त्समर्द्धयन्तुभूःस्वा
हां ॥ १२ ॥ लोमांनिप्प्रयंतिः ॥ लोमांनिप्प्रयंतिर्म्मममृत्त्वङ्मऽ
आनंतिरागंतिः ॥ माᳪंसम्मऽउपंनतिर्व्वस्वस्थिमज्जामऽआ
नंतिः ॥ १३ ॥ [१३-१] यद्देवाः ॥ यद्देवादेवहेडंनन्देवा ॥२२१॥

६२०

१ पुरोनुवाक्याभिः । अत्र समानपदे "ऋषरेभ्यो णकारं समानपदे" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन णत्वप्राप्तौ "इन्द्राग्नी चित्रमान्ते°" (शु. य. प्रा. ३ अ. ९३ सू.) इत्यनेन निषेधान्न णत्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सश्चकृमाव्वयम् अग्निर्म्मातस्म्मादेनंसोव्विश्वान्मुञ्चत्त्वꣳहं

सः ॥१४॥ यदिदिवा ॥ यदिदिवायदिनक्तमेनांᳬसिचकृ

माव्वयम् ॥ व्वायुर्म्मातस्म्मादेनंसोव्विश्वान्मुञ्चत्त्वꣳहंसः

॥ १५ ॥ यदिजाग्ग्रत् ॥ यदिजाग्ग्रद्यदिस्वप्नऽएनांᳬ

सिचकृमाव्वयम् ॥ सूर्य्यौमातस्म्मादेनंसोव्विश्वान्मुञ्चत्त्वꣳ

हंसः ॥ १६ ॥ यद्ग्रामे ॥ यद्ग्रामेयदरण्ण्येयत्त्सभायाँ ६२१

र्यदिन्द्रिये ॥ यच्छूद्रेयदर्य्येयदेनश्चकृमाव्वयँर्यदेकस्या

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धिधर्म्मणितस्यांवयजनमासि ॥ १७ ॥ सदापं÷ ॥ सदा
पौऽअग्न्याऽइतिव्वरुणेतिशपांमहेततोव्वरुणनोमुञ्च ॥ अवं
भृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः ॥ अवदेवैर्द्देवकृतमेनोयु
क्ष्यवमर्त्त्यैर्म्मर्त्त्यकृतम्पुरुराव्णोदेवरिषस्पांहि ॥ १८ ॥ समु
द्रेतें ॥ समुद्रेतेहृदयमप्स्वन्तःसन्त्वांविशन्त्वोषधीरुतापं÷ ॥
सुमित्रियानऽआपऽओषधयः सन्तुदुर्म्मित्रियास्तस्मैस
न्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥ १९ ॥ द्रुपदादिवमुमु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चानः । स्विन्नःस्नातोमलादिव ॥ पूतम्पवित्त्रेणेवाज्ज्यमापः
शुन्धन्तुमैनंसः ॥ २० ॥ उद्वयम् ॥ उद्वयन्तमसस्परिस्वः
पश्श्यन्तऽउत्तरम् ॥ देवन्देवत्त्रासूर्य्यमगन्मज्ज्योतिरुत्तमम्
॥ २१ ॥ अपोऽअद्य ॥ अपोऽअद्यान्वचारिषꣳरसेनसमसृ
क्ष्महि ॥ पयस्वानग्नऽआगमन्तम्मासꣳसृजवर्च्चसाप्प्रजया
चधनेनच ॥ २२ ॥ एधोसि ॥ एधोस्येधिषीमहिसमिदसि ९२३
सं. ३८ तेजोसितेजोमयिधेहि ॥ समाववर्त्तिपृथिवीसमुषाःसमुसू

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

र्व्वै÷ ॥ समुव्विश्श्वमिदञ्जगत् ॥ व्वैश्श्वानरञ्ज्योतिर्ब्भूयासंव्वि
भूङ्कामान्व्यश्नवैभूःस्वाहा ॥ २३ ॥ [१०-२] ॥ अब्भ्या
दधामि । समिधमग्ग्नेव्व्रतपतेत्त्वयि ॥ व्व्रतञ्चश्श्रद्धाञ्चोपैम्मी
न्धेत्त्वादीक्षितोऽअहम् ॥ २४ ॥ यत्रब्रह्म । चक्षत्रञ्चसम्म्य
ञ्चौचरतःसह ॥ तँल्लोकम्पुण्ण्यम्प्रज्ञेषँय्यत्रदेवाःसहाग्निना
॥ २५ ॥ यत्रेन्द्र÷ ॥ यत्रेन्द्रश्श्चव्वायुश्श्चसम्म्यञ्चौचरतःसह ॥
तँल्लोकम्पुण्ण्यम्प्रज्ञेषँय्यत्रसेदिर्न्नव्विद्यते ॥ २६ ॥ अःशुना

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ते ॥ अहुशुनांतेऽअहुशुःपृंक्ष्यताम्परुंषापरुं÷ ॥ गुन्धस्तेसो
मंमवतुमदांयुरसोऽअच्युतं ॥ २७ ॥ सिञ्चान्तिपारिं । षिञ्च
न्त्युर्त्सिञ्चन्तिपुनन्तिच ॥ सुरायैबुभ्रवैमदैकिन्त्वोवंदातिकि
न्त्वः ॥ २८ ॥ धानावन्तङ्करम्भिणंम् ॥ धानावन्तङ्करम्भि
णंमपूपवंन्तमुक्थिनंम् ॥ इन्द्रंप्प्रातर्ज्जुषस्वनं ॥ २९ ॥ बृह
दिन्द्रांय । गायतमरुंतोवृत्रहन्तंमम् ॥ येनुज्ज्योतिरजंनयन्नृ
तावृधौदेवन्देवायजागृंवि ॥ ३० ॥ अध्वंर्य्योऽअद्रिंभिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

य. हि. सुतꣳसोमम्पवित्त्रऽआनय ॥ पुनाहीन्द्रायपातवे ॥ ३१ ॥ पू. अ.
[८-३] योभूतानाम् ॥ योभूतानामधिपतिर्य्यस्मिँल्लोकाऽ ॥ २० ॥
२४॥ अधिश्श्रिताः ॥ सऽईशेमहतोमहाँस्तेनगृह्णामित्त्वामहम्म
यिगृह्णामित्त्वामहम् ॥ ३२ ॥ उपयामगृहीतोसि ॥ उपयाम
गृहीतोस्यश्श्विब्भ्यान्त्वासरस्वत्यैत्त्वेन्द्रायत्त्वासुत्राम्म्णऽएष
तेयोनिरश्श्विब्भ्यान्त्वासरस्वत्यैत्त्वेन्द्रायत्त्वासुत्राम्म्णे ॥ ३३ ॥ ॥२२४॥
१२६
प्राणपामे ॥ प्राणपामेऽअपानपाश्चक्षुष्पाःश्श्रोत्रपाश्चमे ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्वाचोमैंव्विश्श्वभेषजोमनंसोसिव्विलायंकः ॥ ३४ ॥ अश्श्विनं
कृतस्यते ॥ अश्श्विनंकृतस्यतेसरंस्वतिकृतस्येन्द्रेणसुत्रामणाकृ
तस्यं ॥ उपंहूतऽउपंहूतस्यभक्क्षयामि ॥ ३५ ॥ [४-४]
समिंद्धुऽइन्द्रं÷ ॥ समिंद्धुऽइन्द्रंऽउषसामनींकेपुरोरुचांपूर्व्वकृ
द्वांवृधानः ॥ त्रिभिर्द्देवैस्त्रिंहृशताव्वज्ज्रंबाहुर्ज्जघानंव्वृत्त्रंव्विदु
रौव्ववार ॥३६॥ नराशर्ठ॰सर्ठ॰प्प्रतिं ॥ नराशर्ठ॰सर्ठ॰प्प्रतिशूरोमि ५२७

१ इन्द्रऽउषसा। अत्र "उषमहोभिः" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेनास्मिन्परिगणितेभ्यः परेभ्य एव उषशब्दाकारस्य दीर्घविधानान्नात्र दीर्घः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मान्नस्त्तनूनपात्त्वप्रतिंयज्ञस्यधामं ॥ गोभिर्व्वपावान्मधुनासम्
ञ्जन्हिरंण्ण्यैश्चन्द्रीयंजतिप्प्रचैताः ॥ ३७ ॥ ईडितोदेवैः ॥
ईडितोदेवैर्हरिंवाँ२॥ऽअभिष्ट्टिराजुह्वांनोहविषाशर्द्धमानः ॥
पुरन्दरोगोत्त्रभिद्वज्ज्रबाहुरायांतुयज्ञमुपंनोजुषाणः ॥ ३८ ॥
जुषाणोबर्हिः ॥ जुषाणोबर्हिर्हरिवान्नऽइन्द्रंः प्प्राचीनंꣳसीद
त्प्प्रदिशांपृथिव्याः ॥ उरुप्प्रथाःप्प्रथमानꣳस्योनमादित्त्यैर
क्त्तंव्वसुंभिःसजोषांः ॥ ३९॥ इन्द्रन्दुरंः । कवष्प्योधावंमा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नाव्वृषाणँ᳖ऽस्यन्तुजनंयँ᳖सुपत्नीः ॥ द्वारोदेवीरभितोविश्श्रय

न्ताᳪसुवीराव्वीरम्प्रथमानामहोभिः ॥ ४० ॥ [1]उषासानक्ता ।

बृहतीबृहन्तम्पयस्वतीसुदुघेशूरमिन्द्रम् ॥ तन्तुन्ततम्पेशसा

संवयन्तीदेवानान्देवँ᳖यजतᳪसुरुक्मे ॥ ४१ ॥ दैव्यामिमा

ना ॥ दैव्यामिमानामनुषᳪपुरुत्राहोताराविन्द्रम्प्रथमासुवा

चा ॥ मूर्द्धन्यज्ञस्यमधुनादधाना[2]प्राचीनञ्ज्योतिर्हविषावृधा ५२९

१ प्रथमानामहोभिः उषासा । अत्र "उषमहोभिः" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेन उष इत्ययं ह्रस्वो दीर्घमापद्यते महोभिः नक्त ह्रस्व इकार- एकारौकारनकारेभ्यः परश्चेत् । तेन महोभिः परस्य उषशब्दाकारस्य दीर्घाकारः । अत्र महोभिःशब्दात्पर उषशब्दो वर्तते । २ प्राचीनञ्ज्योतिः । अत्र "स्वर- यवहकपैश्च" इत्यनेनैतैरेवव्यवधाने समानपदे "ऋषरेभ्यो नकारो णकारं समानपदे" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन विधीयमानस्य णत्वस्यात्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नाव्वृषाणँऽस्यन्तुजनंयꣳसुपत्नीꣳ ॥ द्वारोदेवीरभितोविश्श्रंय
न्ताꣳसुवीरांव्वीरम्प्रथमानामहोभिꣳ ॥ ४० ॥ उषासानक्ता ।
बृहतीबृहन्तम्पयस्वतीसुदुघेशूरमिन्द्रम् ॥ तन्तुन्ततम्पेशसा
संवयन्तीदेवानान्देवँऽयजतꣳसुरुक्मे ॥ ४१ ॥ दैव्यामिमा
ना ॥ दैव्यामिमानामनुषꣳपुरुत्राहोताराविन्द्रम्प्रथमासुवा
चा ॥ मूर्द्धन्यज्ञस्यमधुनादधानाप्प्राचीनञ्ज्योतिर्हविषावृधा ६२९

१ प्रथमानामहोभिः उषासा । अत्र "उषमहोभिः" (शु. य. प्रा. ३ अ. १११९ सू.) इत्यनेन उष इत्ययं ह्रस्वो दीर्घमापद्यते महोभिः नक्त इत्यु इकार- एकारौकारनकारेभ्यः परश्चेत् । तेन महोभिः परस्य उषशब्दाकारस्य दीर्घाकारः । अत्र महोभिःशब्दात्पर उषशब्दो वर्तते । २ प्राचीनञ्ज्योतिः । अत्र "स्वर- यवहकपैश्च" इत्यनेनैतैरेवव्यवधाने समानपदे "ऋषरेभ्यो नकारो णकारं समानपदे" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन विधीयमानस्य णत्वस्यात्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तꣳ ॥ ४२ ॥ तिस्रोदेवीः ॥ तिस्रोदेवीर्हविषावर्द्धमानाऽइ
न्द्रञ्जुषाणाजनयोनपत्नीꣳ ॥ अच्छिन्नन्तन्तुम्पयसासरस्व
तीडादेवीभारतीविश्वतूर्त्तिꣳ ॥ ४३ ॥ त्वष्टादधत् ॥ त्वष्टाद
धच्छुष्ममिन्द्रायवृष्णेपाकोचिष्टुर्य्यशसेपुरूणि ॥ वृषाय
जन्वृषणम्भूरिरेतामूर्द्धन्यज्ञस्यसमनक्तुदेवान् ॥ ४४ ॥ वन
स्पतिरवसृष्टꣳ ॥ वनस्पतिरवसृष्टोनपाशैस्त्मन्यासमञ्ज ॥२२६॥

व्यवधानोक्तातिरिक्तचवर्गस्य व्यवधानेनाप्राप्तं णत्वं "शिलिसिवर्गमध्यमव्यवहितोऽपि°" (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन शकार-लकार-सकार-व्यवहितो मध्यमवर्गैश्चटतवर्गैर्व्यवहित ऋषरेभ्य उत्तरो नकारः प्रकृत्या भवति। इति णकारो निषिध्यते तच्छिष्यबुद्धिव्युत्पत्त्यर्थम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ञ्छंमितानदेवः ॥ इन्द्रंस्यहृद्य्यैर्ज्जठरम्पृणानःस्वदातियज्ञ
म्मधुनाघृतेनं ॥ ४५ ॥ स्तोकानामिन्दुम् ॥ स्तोकाना
मिन्दुम्प्रतिशूरऽइन्द्रोवृ[1]षायमाणोवृषभस्तुराषाट् ॥ घृतप्रु
षामनंसामोदमानाःस्वाहादेवाऽअमृतामादयन्ताम् ॥ ४६ ॥
[११-५] आयांतु ॥ आयात्त्विन्द्रोवंसऽउपंनऽइहस्तु
तःसंधमादस्तुशूरः ॥ वावृधानस्तविषीर्यस्यपूर्वीर्द्यौर्न्न
क्षत्रमभिभूतिपुष्यात् ॥ ४७ ॥ आनः ॥ आनऽइन्द्रो ५३१

१ वृषायमाणः। अत्र यकारे परे वृषशब्दाकारस्य "अथोदारिथ" (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन दीर्घः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दूरादानऽआसादभिष्टिकृदवंसेयासदुग्ग्रः ॥ ओजिष्ठेभिर्न्नृपति
र्व्वज्ज्रबाहुᳪसङ्गेसमत्त्सुतुर्व्वणिः पृतन्न्यून् ॥ ४८ ॥ आनः ॥
आनऽइन्द्द्रोहरिभिर्य्यात्त्वच्छार्व्वाचीनोवसेराधसेच ॥ तिष्ठा
तिव्वज्ज्रीमघवाव्विरप्प्शीमँय्यज्ञमनुनोव्वाजसातौ ॥ ४९ ॥
त्रातारमिन्द्रम् ॥ त्रातारमिन्द्रमवितारमिन्द्द्रᳪहवेहवेसुहवᳪ
शूरमिन्द्रम् ॥ ह्वयामिशक्क्रम्पुरुहूतमिन्द्रᳪस्वस्त्तिनोमघवा ॥२२७॥
धात्त्विन्द्रः ॥ ५० ॥ इन्द्रः सुत्रामा ॥ इन्द्रः सुत्रामास्व ६३२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाँ २॥ ऽअवौभिः सुमृडीको भंवतुव्विश्ववेदाः ॥ बाधंतान्द्वेषोऽ
अभंयङ्कृणोतुसुवीर्यस्य पतंयः स्याम ॥ ५१ ॥ तस्यंव्वयम् ॥
तस्यंव्वयः सुमतौयज्ञियस्यापिंभद्रेसौमनसेस्याम ॥ ससुत्रा
मास्ववाँऽइन्द्रोऽअस्मेऽआराच्चिद्द्वेषंः सनुतर्युयोतु ॥ ५२ ॥
आमन्द्रैः ॥ आमन्द्रैरिन्द्रहरिभिर्याहिमयूररोमभिः ॥
मात्त्वाकेचिन्नियंमन्विन्नपाशिनोतिधन्वेवताँ २॥ऽइंहि॥ ५३ ॥ १३३
एवेत् ॥ एवेदिन्द्रंव्वृषंणंव्वज्रंबाहुंव्वसिष्ठासोऽअभ्यर्च्चन्त्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्कैँ॥ सनंस्तुतोव्वीरवंद्धातुगोमंद्धयम्पातस्वास्त्तिभिःसदानः
॥ ५४ ॥ [८-६] समिद्धोऽअग्निः ॥ समिद्धोऽअग्निरश्श्वि
नातप्तोघम्मोंव्विराट्सुतः ॥ दुहेधेनुःसरस्वतीसोमंᳬशुक्रमि
हेन्द्रियम् ॥ ५५ ॥ तनूपाभिषजा । सुतेश्श्विनोभासरस्वती ॥
मद्ध्वारजाᳬंसीन्द्रियमिन्द्रायपथिभिर्व्वहान् ॥ ५६ ॥ इन्द्रा
येन्दुम् ॥ इन्द्रायेन्दुᳬसरस्वतीनराशᳬसेननग्नहुम् ॥ अधा
तामश्श्विनामधुंभेषजम्भिषजासुते ॥ ५७ ॥ आजुह्वानासरं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वती ॥ आजुह्वानासरस्वतीन्द्रायेन्द्रियाणिवीर्य्यम् ॥ इडा
भिरश्विनाविषꣳसमूर्ज्जꣳसꣳरयिन्दधुः ॥ ५८ ॥ अश्विनान
मुचेः । सुतꣳसोमꣳशुक्रम्परिस्रुता ॥ सरस्वतीतमाभरद्ब
र्हिषेन्द्रायपातवे ॥५९॥ कवष्योन । व्यचस्वतीरश्विभ्यान्न
दुरोदिशः ॥ इन्द्रोनरोदसीऽउभेदुहेकामान्त्सरस्वती ॥६०॥
उषासानक्तम् ॥ उषासानक्तमश्विनादिवेन्द्रꣳसायमिन्द्रि ६३५
सं. ३९ यैः ॥ सञ्जानानेसुपेशसासमञ्जातेसरस्वत्या ॥६१॥ पातन्नः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पातन्नोऽअश्विनादिवांपाहिनक्क्तंꣳसरस्वति ॥ दैव्यांहोतारा
भिषजापातामिन्द्रꣳसचांसुते ॥ ६२ ॥ तिस्रस्त्रेधा । सरस्वत्त्य
श्विनाभारतीडां ॥ तीव्रम्पंरिस्रुतासोममिन्द्रांयसुषुवुम्मंदम्
॥ ६३ ॥ अश्विनांभेषजम् ॥ अश्विनांभेषजम्मधुंभेषजन्नꣳ
सरस्वती ॥ इन्द्रेत्त्वष्टायशꣳश्रियꣳरूपꣳरूपमधुꣳसुते ॥६४॥
ऋतुथेन्द्रं ॥ ऋतुथेन्द्रोवनस्पतिंꣳशशमानःपंरिस्रुतां ॥ ॥ २२९ ॥
कीलालंमश्विभ्याम्मधुंदुहेधेनुःसरस्वती ॥ ६५ ॥ गोभिर्न्न ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सोमंमाश्विनामासंरेणपरिस्रुतां ॥ समंधातह्ुसरंस्वत्त्यास्वाहे
न्द्रेसुतम्मधुं ॥ ६६ ॥ [१२-७] अश्विनांहविः ॥ अश्वि
नांहविरिन्द्रियन्नमुंचेर्द्धियासरंस्वती ॥ आशुक्क्रमांसुराद्वसुंम
घमिन्द्रांयजभ्रिरे ॥ ६७ ॥ यमश्विनां ॥ यमश्विनासरं
स्वतीहविषेन्द्रमवंर्द्धयन् ॥ सबिंभेदब्वलम्मघन्नमुंचावासुरेस
चां ॥ ६८ ॥ तमिन्द्रंम् ॥ तमिन्द्रंम्पशवःसचाश्विनोभासरं ५३७
स्वती ॥ दधांनाऽअभ्यनूषतहविषांयज्ञऽइंन्द्रियैः ॥ ६९ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यऽइन्द्रँ ॥ यऽइन्द्रंऽइन्द्रियन्दधुःसंविताव्वरुंणोभगंः ॥ ससु
त्रामांहविष्प्पंतिर्य्यजंमानायसश्चत ॥७०॥ सविताव्वरुंणः ॥
सविताव्वरुंणोदधद्यजंमानायदाशुषे ॥ आदंत्तनमुंचेर्व्वसुंसुत्रा
माबलंमिन्द्रियम् ॥ ७१ ॥ व्वरुंणःक्षत्रम् ॥ व्वरुंणःक्षत्रमिं
न्द्रियम्भगेनसविताश्रियंम् ॥ सुत्रामायशंसाबलन्दधानाय
ज्जमांशत ॥ ७२ ॥ अश्विनागोभिंः ॥ अश्विनागोभिंरिन्द्र
यमश्वेभिर्व्वीर्य्यम्बलंम् ॥ हविषेन्द्रःसरंस्वतीयजंमानमवर्द्ध

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यन् ॥ ७३ ॥ तानासंत्त्या । सुपेशंसाहिरंण्ण्यवर्त्तनीनरां ॥
सरंस्वतीहुविष्म्मुतीन्द्रकर्म्मंसुनोवत ॥ ७४ ॥ ताभिषजां ।
सुकर्म्मंणासासुदुघासरंस्वती ॥ सवृंत्रहाशतक्कंतुरिन्द्रायदधु
रिन्द्रियम् ॥ ७५ ॥ सुवढसुरामंम् ॥ सुवढसुरामंम
श्विनानमुंचावासुरेसचां ॥ विपिपानाश्संरस्वतीन्द्रङ्कर्म्मं
स्वावत ॥ ७६ ॥ पुत्रमिंवपितरौं ॥ पुत्रमिंवपितरांव ५३१
श्विनोभेन्द्रावथुःकाव्यैर्दुःसनांभिः ॥ यत्त्सुरामंव्यापिबुःश

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चीभिःसरस्वतीत्वामघवन्नभिष्णक् ॥ ७७ ॥ यस्मिन्न
श्वासः ॥ यस्मिन्नश्वासऽऋषभासऽउक्षणोव्वशामेषाऽअवसृ
ष्टासऽआहुताः ॥ कीलालपेसोमपृष्ठायव्वेधसेहृदामतिञ्जनय
चारुमग्नये ॥ ७८ ॥ अहाव्यग्ने । हविरास्येतेस्रुचीवघृत
ञ्चम्वीवसोमः ॥ व्वाजसनिꣳरयिमस्मेसुवीरम्प्रशस्तन्धे
हियशसम्बृहन्तम् ॥ ७९ ॥ [१३-८] शतम् १२०० ॥
अश्विनातेजसा ॥ अश्विनातेजसाचक्षुःप्राणेनसरस्वतीव्वी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऽर्यम् ॥ व्वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम् ॥ ८० ॥ गोमै[1]
दूषुणासत्त्या ॥ गोमदूषुणासत्त्याश्वावद्यातमश्विना ॥ वृर्त्ती
रुद्रानृपाय्यम् ॥ ८१ ॥ नयत् ॥ नयत्त्परोनान्तरऽआदुध
र्षद्दूषण्णवसू ॥ दुःशꣳसोमर्त्त्यौरिपुः ॥ ८२ ॥ तानः ॥
तानऽआवोढमश्विनारयिम्पिशङ्गसन्दृशम् ॥ धिषण्ण्याव्वरि ६४१
वोविदम् ॥ ८३ ॥ पावकानः ॥ पावकानꣳसरस्वतीव्वाजे

१ गोमदूपु णासत्या । अत्र समानपदत्वाभावेन णत्वाप्राप्तौ "निषण्णाय०" (शु. य. प्रा. ३ अ. ८७ सू.) इत्यनेन णत्वस्य निपातः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भिर्व्वाजिनीवती ॥ यज्ञंव्वष्टुधियावसुः ॥ ८४ ॥ चोदयित्री
सूनृतानाम् ॥ चोदयित्रीसूनृतानाञ्चेतन्तीसुमतीनाम् ॥
यज्ञन्दधेसरस्वती ॥ ८५ ॥ महोऽअर्ण्णः ॥ महोऽअर्ण्णः
सरस्वतीप्प्रचेतयतिकेतुना ॥ धियोव्विश्श्वाव्विराजति ॥ ८६ ॥
इन्द्रायाहि । चित्रभानोसुताऽइमेत्त्वायवः ॥ अण्वीभिस्त्त
नापूतासः ॥ ८७ ॥ इन्द्रायाहि । धियेषितोव्विप्प्रजूतः

१ चित्रभानो । अत्र समानपदे "ऋषरेभ्यः" इत्यनेन भस्य व्यवधानेनाप्राप्तौ "स्वरयवहकपैश्च" इत्यनेन पवर्गव्यवधानेऽपि णत्वप्रतिप्रसवेन पुनर्णत्वप्राप्तौ "इन्द्राग्नी चित्रभानो°" (शु. य. प्रा. ३ अ. ९३ सू.) इत्यनेन निषिध्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुताव॑तः ॥ उप॒ब्रह्मा॑णिवा॒घतः॑ ॥ ८८ ॥ इन्द्राया॑हि ॥
इन्द्राया॑हि॒तूतु॑जान॒ऽउप॒ब्रह्मा॑णिहरिवः ॥ सु॒तेद॑धिष्व॒न॒श्च
नः॑ ॥ ८९ ॥ अ॒श्विना॑पिबताम् ॥ अ॒श्विना॑पिब॒ताम्मधु॒सरं
स्व॑त्यासु॒जोष॑सा ॥ इन्द्रः॑सु॒त्रामा॑वृत्र॒हाजु॒षता॑ꣳसो॒म्म्यम्म
धुं ॥ ९० ॥ [११-९] इतिश्रीवाजसनेयसंहितायांविंशति-
तमोऽध्यायः ॥ २० ॥ पूर्वविंशतौ मंत्रसंख्या १२११ ॥ ५४३

१ सुतावतः । अत्र "अश्वरश्मिमतिसुमत्तिश्वसुत°" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे सुतस्याकारस्य दीर्घः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति श्रीवाजसनेयसंहितायां पूर्वविंशतिः समाप्ता ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ श्रीवाजसनेयसंहितोत्तरविंशतिप्रारम्भः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ श्रीगणेशायनमः ॥ अनुवाकसूत्रम् ॥ इमम्मे, समिद्धोऽ
अग्निरेकादशकौ, व्वसन्तेनऽऋतुना षड्, होतायक्षत्त्समिधा
ग्निन्द्वादशा, श्विनौच्छागस्य सप्त, देवम्बर्हिश्चतुर्दश, षडेक
षष्टिः [अ. २१ मं. ६१ अनु. ६] ॥ हरिः ॐ ॥ इमम्मे । व्वरु
णश्श्रुधीहवंमुद्याचंमृडय ॥ त्वामंवस्युराचंके ॥ १ ॥ तत्त्वां ।
यामिब्रह्मणाव्वन्दंमानस्तदाशांस्तेयजंमानोहविर्ब्भिः ॥ ॥ १ ॥
अहेडमानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्रमोषीः ॥ २ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वन्नः ॥ त्वन्नोऽअग्ग्नेव्वरुणस्यव्विद्द्वान्देवस्यहेडोऽअवयासि

सीष्ठाः ॥ यजिष्ठोव्वह्नितमःशोशुचानोव्विश्वाद्वेषाᳬसिप्रमुमु

ग्ध्यस्म्मत् ॥ ३ ॥ सत्त्वम् ॥ सत्त्वन्नोऽअग्ग्नेवमोभवोतीनेदि

ष्ठोऽअस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनोव्वरुणह्रराणोव्वीहिमृ

डीकᳬसुहवोनऽएधि ॥ ४ ॥ महीमूषु । मा[2]तरᳬसुव्रतानामृत

---

१ अवयासिसीष्ठाः । अत्र "भाविभ्यः स षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षत्वप्राप्तौ "पृथिविदिव्युपरिचर्षणिशकुनियासिभ्यः" (शु. य. प्रा. ३ अ. ८४ सू.) इत्यनेन प्रकृतिभावे न षत्वम् । २ मातरसुव्रᳬतानाम् । वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः । या. शि. । मात्रिके ह्रस्ववर्णपूर्वेऽनुस्वारो द्विमात्रिको दीर्घᳬइत्याकारको ज्ञेयः। अत्र "अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धमात्रा पूर्वा चार्धमात्रा" (शु. य. प्रा. ४ अ. १४८ सू.) इति लिङ्गम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि. ॥ स्यपत्नीमवसेहुवेम ॥ तुविक्षत्रामजरन्तीमुरूचीꣳसुशर्म्मा उ. वि. अ.

णमदितिꣴसुप्रणीतिम् ॥ ५ ॥ सुत्रामाणम्पृथिवीम् ॥ सुत्रा ॥ २१ ॥

माणम्पृथिवीन्द्यामनेहसꣴसुशर्म्माणमदितिꣴसुप्रणीतिम् ॥

दैवीन्नाव[1]ꣳस्वरित्रामनागसमस्रवन्तीमारुहेमास्वस्तये ॥ ६ ॥

सुनावमारुहेयम् ॥ सुनावमारुहेयमस्रवन्तीमनागसम् ॥

शतारित्रा[2]ꣳस्वस्तये ॥ ७ ॥ आनः ॥ आनोमित्रावरुणाघृ ॥ २ ॥

१–२ संयोगाद्यश्च यो भवेत्। या. शि.। यत्र संयोगाद्यो मात्रिको द्विमात्रिको वा वर्णः सोऽपि ऋवर्णव्यञ्जनादिगं संयोगाद्यं वर्जयित्वा ह्रस्व एकमात्रिको भवति न तु गुरुभूतः। तत्र ह्रस्वोच्चारणप्रदर्शकं ꣳ इत्याकारकं चिह्नं ज्ञेयम्। दीर्घस्य ꣴ इत्याकारकं चिह्नम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तैर्ग्गव्यूतिमुक्क्षतम् ॥ मद्ध्वारजांꣳसिसुक्क्रतू ॥ ८ ॥ प्रबाहवा ।
सिसृतञ्जीवसेनऽआनोगव्यूतिमुक्क्षतङ्घृतेन ॥ आमाजनेश्श्र
वयतँ᳕युवानाश्श्रुतम्मेमित्रावरुणाहवेमा ॥ ९ ॥ शन्नः ॥
शन्नोभवन्तुव्वाजिनोहवेषुदेवतातामितद्द्रवꣳस्वर्क्काः ॥ जम्भय
न्तोहिंव्वृकꣳरक्क्षांꣳ[1]सिसनेम्म्यस्म्मद्युयवन्नमीवाः ॥ १० ॥
व्वाजेवाजेवत । व्वाजिनोनोधनेषुविप्प्राऽअमृताऽऋतज्ज्ञाः ॥ ५४९

१ रक्षाꣳसि । द्विमात्रे मात्रिकः स्यात् । या. शि. । यत्र द्विमात्रिकः पूर्ववर्णस्तत्र मात्रिको ह्रस्वोऽनुस्वारः ꣳ इत्याकारकः । अत्र "दीर्घादर्द्धमात्रा पूर्वा चाद्ध्यर्धा" (शु. य. प्रा. ४ अ. १४९ सू.) लिङ्गम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्यमद्ध्वं÷पिबतमादयंद्ध्वन्तृप्त्पायातपथिभिर्द्देवयानैंः॥ ११ ॥
[११-१] समिंद्धोऽअग्निः । समिधासुसंमिद्धो
व्वरेण्यंः ॥ गायत्रीच्छन्दंऽइन्द्रियन्त्र्यविर्ग्गौर्व्वयोदधुंः
॥ १२ ॥ तनूनपाच्छुचिंव्व्रतंः ॥ तनूनपाच्छुचिंव्व्रतस्त्तनूपा
श्च्वसरंस्वती ॥ उष्णिणहाच्छन्दंऽइन्द्रियन्दित्त्यवाड्ड्गौर्व्वयो
दधुंः ॥ १३ ॥ इडांभिरग्निः ॥ इडांभिरग्निरीड्ड्यंःसोमो
देवोऽअमंर्त्त्यंः ॥ अनुष्टुप्च्छन्दंऽइन्द्रियम्पञ्चांविर्ग्गौर्व्वयो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दघुं ॥१४॥ सुबर्हिरग्निः । पूषण्णवान्तस्तीर्ण्णबर्हिरमंर्त्यं ॥
बृहतीच्छन्दंऽइन्द्रियन्त्रिवत्सोगौर्व्वयोदघुं ॥ १५ ॥ दुरो
देवीः ॥ दुरोदेवीर्द्दिशोमहीर्ब्रह्मादेवोबृहस्पतिः ॥ पङ्क्तिश्छ
न्दंऽइहेन्द्रियन्तुर्य्यवाड्गौर्व्वयोदघुं ॥ १६ ॥ उषेयह्वी ॥
उषेयह्वीसुपेशसाविश्वेदेवाऽअमंर्त्यां ॥ त्रिष्टुप्च्छन्दंऽइहेन्द्रि
यम्पष्ठवाड्गौर्व्वयोदघुं ॥ १७ ॥ दैव्याहोतारा । भिषजेन्द्रे
णसयुजायुजा ॥ जगंतीच्छन्दंऽइन्द्रियमंनड्वान्गौर्व्वयोदघुं ५५१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ १८ ॥ तिस्रऽइडा ॥ तिस्रऽइडासरस्वतीभारतीमरुतो
विशः ॥ विराट्छन्दऽइहेन्द्रियन्धेनुग्गौर्न्नवयोदधुः ॥ १९ ॥
त्वष्टातुरीपः ॥ त्वष्टातुरीपोऽअद्भुतऽइन्द्राग्नीपुष्टिवर्द्धना ॥
द्विपदाच्छन्दऽइन्द्रियमुक्षागौर्न्नवयोदधुः ॥ २० ॥ शमि
तानः ॥ शमितानोवनस्पतिःसविताप्प्रसुवन्भगम् ॥ कुकु
प्छन्दऽइहेन्द्रियंवशावेहद्वयोदधुः ॥ २१ ॥ स्वाहायज्ञम् ॥
स्वाहायज्ञंवरुणःसुक्षत्रोभैषजङ्करत ॥ अतिच्छन्दाऽइन्द्रि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यंबृहद्द्रषभोगौर्ब्वयोंदधुः ॥ २२ ॥ [११-२] ब्वसन्तेनऽऋतुनां । देवाब्वसंवस्त्रिवृतांस्तुताः ॥ रथन्तरेणतेजंसाहविरिन्द्रेब्वयोंदधुः ॥ २३ ॥ ग्रीष्मेणंऽऋतुनां । देवारुद्राःपंञ्चदशेस्तुताः ॥ बृहतायशंसाबलंᳬहविरिन्द्रेब्वयोंदधुः ॥२४॥ ब्वर्षाभिर्ऋतुनां । दित्यास्तोमेंसप्तदशेस्तुताः ॥ ब्वैरूपेणंब्विशौजंसाहविरिन्द्रेब्वयोंदधुः ॥ २५ ॥ शारदेनंऽऋतुनां । देवाऽएंकविᳬशऽऋभवंस्तुताः ॥ ब्वैराजेनंश्रियाश्रियंᳬहवि ५५३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रिन्द्रे व्वयोदधुः ॥ २६ ॥ हेमन्तेनऽऋतुना । देवास्त्रिणवे मरुत
स्स्तुताः ॥ बलेन शक्वरीः सहो हविरिन्द्रे व्वयोदधुः ॥ २७ ॥ शैशि
रेणऽऋतुना । देवास्त्रयस्त्रिꣳशेऽमृतास्स्तुताः ॥ सत्त्येन रेवतीः क्षत्र
ꣳ हविरिन्द्रे व्वयोदधुः ॥ २८ ॥ [६-३] होता सक्षत् । होता स
क्षत्त्समिधाग्निमिडस्पदेऽश्विनेन्द्रꣳ सरस्वतीमजो धूम्रो न गो
धूमैः कुवलैर्भेषजम्मधु शष्पैर्न तेजऽइन्द्रियम्पयः सोमः परि
स्रुता घृतम्मधु व्यन्त्वाज्ज्यस्य होतर्य्यज ॥ २९ ॥ होता [1]यक्षत्त

१ पादादौ च पदादौ च संयोगावग्रहेषु यः । जशब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः । या. शि. । अत्र पदादौ यकारस्य सत्त्वाज्जकारोच्चारणम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नूनपात्त्सरस्वतीम् ॥ होतायक्षत्तनूनपात्त्सरस्वतीमविम्मेँ
षोनभेषजम्पथामधुमताभरन्नाश्विनेन्द्रायवीर्य्यम्बदरैरुपवा
काभिर्भेषजन्तोक्मभिꣳपयꣳसोमः परिस्रुताघृतम्मधुव्य
न्त्वाज्ज्यस्यहोतर्य्यज ॥ ३० ॥ होतायक्षन्नराशꣳसन्न ।
नग्नहुम्पतिꣳसुरयाभेषजम्मेषः सरस्वतीभिषग्ग्रथोनचन्द्र्यु
श्विनोर्व्वपाऽइन्द्रस्यवीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिꣳ
पयꣳसोमः परिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३१ ॥

१ अत्र रकारयकारयोः संयोगाज्जकारोच्चारणम् । एवं होतरुर्यजेत्यादौ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

होतायक्षदिडेडितः ॥ होतायक्षदिडेडितऽआजुह्वानꣳसरं
स्वतीमिन्द्रम्बलेनवर्द्धयन्नृषभेणगवेन्द्रियमश्विनेन्द्रायभेषजं
यवैःकर्कन्धुभिर्म्मधुलाजैर्न्नमासरम्पयꣳसोमःपरिस्रुताघृत
म्मधुव्यन्त्वाज्यस्यहोतर्य्यज ॥ ३२ ॥ होतायक्षद्बर्हि
रूर्णम्म्रदाꣳ ॥ होतायक्षद्बर्हिरूर्णम्म्रदाभिषङ्नासत्या
भिषजाश्विनाश्वाशिशुमतीभिषग्धेनुःसरस्वतीभिषग्दुहऽइ ॥ ६ ॥
न्द्रायभेषजम्पयꣳसोमःपरिस्रुताघृतम्मधुव्यन्त्वाज्यस्यहोत ५५६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

र्य्यजं ॥ ३३ ॥ होतायक्षद्दुरोदिशः । कवष्ष्योनव्व्यचस्व
तीरश्विब्भ्यान्नदुरोदिशऽइन्द्रोनरोदसीदुघेदुहेधेनुःसरस्वत्त्य
श्विनेन्द्रायभेषजᳬ शुक्रन्नज्ज्योतिरिन्द्रियम्पयः सोमः परिस्रु
ताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यजं ॥ ३४ ॥ होतायक्ष
त्सुपेशसोषे । नक्तन्दिवाश्विनासमञ्जातेसरस्वत्त्यात्त्विषिमि
न्द्रेनभेषजᳬ श्येनोनरजसाहृदाश्रियानमासरम्पयः सोमः
परिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यजं ॥ ३५ ॥ होताय ११७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि. क्ष॒द्दैव्या॒होता॑रा । भि॒षजा॒श्विनेन्द्र॒न्नजागृ॑वि॒दि॒वा॒नक्त॒न्नभे॑ उ. वि. अ.
॥ ७ ॥ ष॒जैः॑शू॒ष॒ꣳसर॑स्वतीभि॒षक्सीसे॑नदुहऽइन्द्रि॒यम्पय॒ꣳसोम॑ꣳपरि॒ ॥ २१ ॥
स्रु॒ता॑घृ॒तम्मधु॒व्यन्त्वाज्य॑स्य॒होत॒र्य्यज॑ ॥ ३६ ॥ होता॑यक्ष
त्ति॒स्रोदे॒वीः ॥ होता॑यक्षत्ति॒स्रोदे॒वीर्न्न॑भे॒षजन्त्रय॑स्त्रि॒धात॑
वो॒पसो॑रू॒पमिन्द्रे॑हि॒र॒ण्यय॑म॒श्विनेडा॒नभार॑तीवा॒चासर॑स्वती॒
मह॒ऽइन्द्रा॑यदुहऽइन्द्रि॒यम्पय॒ꣳसोम॑ꣳपरि॒स्रु॒ता॑घृ॒तम्मधु॒व्य ॥ ७ ॥
५५८
न्त्वाज्य॑स्य॒होत॒र्य्यज॑ ॥ ३७ ॥ होता॑यक्षत्सु॒रेत॑सम्मृ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षभम् ॥ होतायक्षत्सुरेतसमृषभन्नर्य्यापसन्त्वष्टारमिन्द्रं
मश्विनाभिषजन्नसरस्वतीमोजोनजूतिरिन्द्रियंवृकोनरभसो
भिषग्ग्यशःसुरयाभेषजꣳश्रियानमासरम्पयःसोमःपरिस्रु
तांघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३८ ॥ होतायक्षद्व
नस्पतिꣳशमितारम् ॥ होतायक्षद्वनस्पतिꣳशमितारꣳश
तक्रतुम्भीमन्नमन्युꣳराजानंव्याघ्रन्नमसाश्विनाभामꣳसरं ५५१

१ "वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः" या. शि.। मात्रिके (ह्रस्ववर्णपूर्वे) अनुस्वारो द्विमात्रिकः ꣳ इत्याकारको दीर्घो ज्ञेयो लेख्यश्च। अत्र अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धमात्रा पूर्वा चार्धमात्रा (शु. य. प्रा. ४ अ. १४८ सू.) इत्यनेन चोक्तम्। अत्र मन्युं राजानम् इत्यत्रानुस्वारस्य ह्रस्ववर्णपूर्वत्वं वर्त्तते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वतीभिषगिन्द्रायदुहऽइन्द्रियम्पयꣳसोमः परिस्रुताघृतम्मधु
व्यन्त्वाज्ज्यस्यहोतर्यज ॥ ३९ ॥ होतायक्षदग्निꣳस्वाहा ॥
होतायक्षदग्निꣳस्वाहाज्ज्यस्यस्तोकानाꣳस्वाहामेदसाम्पृथ
क्स्वाहाछागमश्विभ्याꣳस्वाहामेषꣳसरस्वत्यैस्वाहऽऋषभ
मिन्द्रायसिꣳहायसहसऽइन्द्रियꣳस्वाहाग्निन्नभेषजꣳस्वाहा
सोममिन्द्रियꣳस्वाहेन्द्रꣳसुत्रामाणꣳसवितारंवरुणम्भिषजा ॥ ८ ॥
म्पतिꣳस्वाहावनस्पतिम्प्रियम्पाथोनभेषजꣳस्वाहादेवाऽआ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्ज्यपाजुंषाणोऽअग्निर्भैषजम्पयःᳪसोमंः परिस्रुतांघृतम्मधुव्व्य
न्त्वाज्ज्यंस्यहोतुर्य्यजं ॥४०॥ [१२-४] होतांयक्क्षदश्श्विनौ
छागंस्य । व्वपायामेदंसोजुषेतां[1]ᳪहविर्होतुर्य्यजं ॥ होतांयक्क्ष
त्सरंस्वतीम्मेषस्यंव्वपायामेदंसोजुषतांᳪहविर्होतुर्य्यजं ॥ हो
तांयक्क्षदिन्द्रंमृषभस्यंव्वपायामेदंसोजुषतांᳪहविर्होतुर्य्यजं
॥४१॥ होतांयक्क्षदश्श्विनौसरंस्वतीम् ॥ होतांयक्क्षदश्श्विनौसरं ९६१

१ "द्विमात्रिके मात्रिकः स्यात्" या. शि. । यत्र द्विमात्रिकः पूर्ववर्णः (दीर्घस्वरः) तत्रानुस्वारो ह्रस्वः ᳪ इत्याकारको ज्ञेयो लेख्य उच्चारणीयश्च । अत्र "दीर्घादर्द्धमात्रा पूर्वा चाद्ध्यर्धा" (शु. य. प्रा. ४ अ. १४९ सू.) प्रमाणम् । अत्र "जुषतां ᳪ हविः" इति पदे दीर्घवर्णपूर्वोऽनुस्वारो वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि. ॥९॥

स्वतीमिन्द्रꣳ सुत्रामाणमिमे सोमाꣳ सुरामाणश्च्छागैर्न्न मेषैर्ऋ

षभैः सुताः शष्प्पैर्न्न तोक्मभिर्ल्लाजैर्म्महस्वन्तो मदा मासरेण[1] परि ॥२१॥

ष्कृताꣳ शुक्राः पयस्वन्तोमृताꣳ प्रस्थिता वो मधुश्च्युतस्तानश्वि

ना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सोम्म्यम्मधु पिबन्तु म

दन्तु व्व्यन्तु होतर्य्यज ॥४२॥ होता यक्षदश्विनौ छागस्य । हवि

षऽआत्तामद्य मध्यतो मेदऽउद्भृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्या ॥९॥

१ परिष्कृता । अत्र "परिकृते षकारेण" (शु. य. प्रा. ३ अ. ५३ सू.) इत्यनेन परिपदं कृते परे षकारेण व्यवधीयते । ततोऽत्र "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन द्वित्त्वं प्राप्तं परञ्च "ऋवर्णे च" (शु. य. प्रा. ४ अ. १११ सू.) इत्यनेन कृतघटितकारे परे द्वित्त्वस्य निषेधात् द्वित्त्वं न ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गृभोघस्त्तान्नूनङ्क्ष्यासेऽअंज्जाणाँऽस्यवंसप्प्रथमानाᳬंसुमत्त्क्षंरा
णाᳬंशतरुद्द्रियाणामग्निष्ष्वात्तानाम्पीवोपवसनानाम्पार्श्र्व
तःश्रोणितःशितामतऽउंत्त्सादतोङ्गांदङ्गादवत्तानाङ्करंतऽए
वाश्विनाजुषेताᳬंहविर्होतर्य्यज ॥ ४३ ॥ होतायक्क्ष
त्त्सरस्वतीम्मेषस्य । हविषऽआवयदद्य मंध्यतोमेदऽउद्धृत
म्पुराद्द्वेषोब्भ्यःपुरापौरुषेय्यागृभोघसंन्नूनङ्घासेऽअंज्जाणाँऽस्य
वंसप्प्रथमानाᳬंसुमत्त्क्षंराणाᳬंशतरुद्द्रियाणामग्निष्ष्वात्ता ९६३

१ पीवः उपवसनानाम् इत्यत्र "उपवसने पीवः" (शु. य. प्रा. ३ अ. १४ सू.) इत्यनेन उपवसने परे विसर्जनीयस्य लोपे "उवर्ण ओकारम्"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नाम्पीवोपवसनानाम्पार्श्वतः[1]श्श्रोणितश्शितामुतऽउत्त्सादतो
ङ्गादङ्गादवत्तानाङ्करद्देवꣳसरस्वतीजुषताꣳहविर्होतर्य्यज
॥ ४४ ॥ होतायक्षदिन्द्रमृषभस्य । हविषऽआवयदद्यमध्य
तोमेदऽउद्भृतम्पुराद्द्वेषोभ्यःपुरापौरुषेय्याग्गृभोघसन्नूनङ्घासेऽ
अज्ज्राणाँयवसप्प्रथमानाꣳसुमत्क्षराणाꣳशतरुद्रियाणा
मग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतःश्श्रोणितश्शिताम् ॥ १० ॥

(शु. य. प्रा. ४ अ. ५३ सू.) इति गुणे रूपं भवति । १ अत्र स्वरात्संयोगादिर्द्विरुच्यते इति सूत्रेण शकारस्य द्वित्वे प्राप्तेऽपि "नास्वरपूर्वा०" इति सूत्रस्य वृत्तौ विसर्जनीयाद्व्यञ्जनपरस्य द्वित्वञ्चेत्स्पर्शवर्णस्यैवेति नियमात्स्पर्शातिरिक्तशकारस्य द्वित्वं न भवति । तेन न द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तऽउंत्त्साद्दुतोज्ज्ञोदञ्ज्ञादवंत्तानाङ्क्ररंदेवमिन्द्रौजुषतांॐहुविर्हौ
तुर्व्वजं ॥ ४५ ॥ होतांयक्षद्वनस्प्पातिंमुभि। हिपिष्ट्तंमया
रभिंष्ठयारशुनयाधिंत ॥ यत्त्राश्विनोश्च्छागंस्यहुविषंःप्प्रिया
धामांनियत्रसरंस्वत्त्यामेषस्यंहुविषंःप्प्रियाधामांनियत्रेन्द्रंस्य
ऽऋषभस्यंहुविषंःप्प्रियाधामांनियत्राग्नेःश्प्प्रियाधामांनियत्र
सोमंस्यप्प्रियाधामांनियत्रेन्द्रंस्यसुत्राम्णंःप्प्रियाधामांनियत्रं
सवितुःश्प्प्रियाधामांनियत्रव्वरुंणस्यप्प्रियाधामांनियत्रव्वनस्प्प ६६६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तेंऽप्प्रियापाथाᳬंसियत्रंदेवानामाज्ज्यपानाम्प्प्रियाधामानिय
त्राग्ग्नेर्होतुःप्प्रियाधामानितत्रैतान्प्प्रस्त्तुत्त्येवोपस्त्तुत्त्येवोपाव
स्त्रक्क्षद्रभीयसऽइवकृत्त्वीकरंदेवन्देवोव्वनस्प्पतिर्ज्जुषताᳬंहवि
र्होतर्य्यजं॥४६॥ होतायक्क्षदग्ग्निᳬंस्विष्टकृतम्॥ होतायक्क्षद
ग्ग्निᳬंस्विष्टकृतमयाडग्ग्निरश्श्विनोश्च्छागस्यहविषःप्प्रियाधा
मान्न्ययाट्सरस्वत्त्यामेषस्यहविषःप्प्रियाधामान्न्ययाडिन्द्रंस्यऽ ॥ ११ ॥

१ "संयोगाद्यश्च यो भवेत्" या. शि.। यद्यनुस्वारस्य पूर्वो वर्णो दीर्घो वा ह्रस्वः संयोगाद्यश्चेत्तदाऽनुस्वारो मात्रिकोᳬं इत्याकारको ह्रस्वो ज्ञेयो लेख्य उच्चारणीयश्च सर्वत्र। परञ्च यत्र संयोगाद्य ऋवर्णव्यअनादिगो दीर्घो वा ह्रस्वो वर्णस्तत्र तु ᳬ इत्याकारकोऽनुस्वारो दीर्घो ज्ञेयो बोद्धः। यथा देवानां हृदयेन।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋषभस्य हविषः प्प्रिया धामान्ययाडग्ग्नेः प्प्रिया धामान्ययाट्सो
मस्य प्प्रिया धामान्ययाडिन्द्रस्य सुत्राम्म्णः प्प्रिया धामान्यया
ट्सवितुः प्प्रिया धामान्ययाड्वरुणस्य प्प्रिया धामान्ययाड्वन
स्प्पतेः प्प्रिया पाथाᳪंस्ययाड्देवानामाज्ज्यपानाम्प्प्रिया धामानि
यक्षदग्ग्नेर्होतुः प्प्रिया धामानि यक्षत्स्वम्महिमानमायजता
मेज्ज्याऽइषः कृणोतु सोऽअद्ध्वरा जातवेदा जुषताᳪं हविर्होतर्य्य
ज॥४७॥ [७-५] देवम्बर्हिः[1]। सरस्वती सुदेवमिन्द्रेऽअश्श्विना॥ ९६७

---

१ रकारहकारयोगेऽत्र करिण्यादीनां पंचस्वरभक्तीनां मध्ये "करिणी रहयोर्योगे" (या. शि.) इत्यनेन करिणी स्वरभक्तिर्ज्ञेया। एवं सर्वत्र।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तेजो॒नचक्षु॒रक्ष्यो॒र्ब्बर्हिषा॒दधु॒रिन्द्रि॒यंव्वसु॒वनेव्व॒सु॒धेयं॑स्य॒व्यन्तु॒
यज॑ ॥ ४८ ॥ दे॒वीर्द्वारः॑ ॥ दे॒वीर्द्वारो॑ऽअ॒श्विना॑भि॒षजे
न्द्रे॒सर॑स्वती ॥ प्रा॒णन्नवी॒र्य्यं॒न्न॒सि॒द्वारो॑दधु॒रिन्द्रि॒यंव्वसु॒वनेव्वसु॒
धेयं॑स्य॒व्यन्तु॒यज॑ ॥ ४९ ॥ दे॒वीऽउ॒षासौ॑ ॥ दे॒वीऽउ॒षासा॑व॒
श्विना॑सु॒त्रामेन्द्रे॒सर॑स्वती ॥ बल॒न्नवा॒चंमा॒स्य॒ऽउ॒षाभ्यां॑न्दधु॒रि
न्द्रि॒यंव्वसु॒वनेव्वसु॒धेयं॑स्य॒व्यन्तु॒यज॑ ॥ ५० ॥ दे॒वीजो॒ष्ट्री॑ ॥ ॥ १२ ॥
दे॒वीजो॒ष्ट्रीसर॑स्वत्त्या॒श्विनेन्द्र॑मवर्द्धयन् ॥ श्रोत्र॒न्नकर्ण्णयो॒र्य्य॒

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शो जोष्ट्रीं᳘भ्यान्दधुरिन्द्रियंव्वसुवनेंव्वसुधेयस्यव्यन्तुयज ॥५१॥
देवीऽऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेन्द्रेसरस्वत्यश्वि
नाभिषजावतं ॥ शुक्रन्नज्ज्योतिस्तनयोराहुतीधत्तऽइन्द्रियं
व्वसुवनेंव्वसुधेयस्यव्यन्तुयज ॥ ५२ ॥ देवादेवानाम् ॥ देवा
देवानाम्भिषजाहोताराविन्द्रमश्विना ॥ व्वषट्कारैःसरस्वती
त्त्विषिन्नहृदयेमतिं᳘होतृभ्यान्दधुरिन्द्रियंव्वसुवनेंव्वसुधेयस्य ५६१
व्यन्तुयज ॥ ५३ ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वीरश्विनेडासरंस्वती ॥ शूषन्नमद्ध्येनाभ्यामिन्द्रांयदधुरिन्द्रि
यंव्वंसुवनेव्वसुधेयंस्यव्यन्तुयजं ॥ ५४ ॥ देवऽइन्द्रं ÷ ॥ देवऽ
इन्द्रोनराशꣳसंस्त्रिवरूथःसरंस्वत्याश्विभ्यामीयतेरथं÷॥ रेतो
नरूपममृतंञ्जनित्रमिन्द्रांयत्त्वष्टादधंदिन्द्रियाणिव्वसुवनेव्वसु
धेयंस्यव्यन्तुयजं ॥ ५५ ॥ देवोदेवैः ॥ देवोदेवैर्व्वनस्पति
र्हिरंण्ण्यपर्णोऽअश्विभ्याꣳसरंस्वत्यासुपिप्पलऽइन्द्रांयपच्यु
तेमधुं ॥ ओजोनजूतिर्ऋंषभोनभामंव्वनस्पतिंन्नोदधंदिन्द्रि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

याणिंव्वसुवनेंव्वसुधेयंस्यव्यन्तुयज ॥ ५६ ॥ देवम्बर्हिः ॥
देवम्बर्हिर्व्वारितीनामद्ध्वरेस्तीर्णमश्श्विभ्यामूर्णम्म्रदा ँ सरस्व
त्त्यास्योनमिन्द्रतेसदंः ॥ ईशायैमन्युᳯराजानम्बर्हिषांदधु
रिन्द्रियंव्वंसुवनेंव्वसुधेयंस्यव्यन्तुयज ॥ ५७ ॥ देवोऽअग्निः ।
स्विष्टकृद्देवान्यक्षद्यथायथᳯहोताराविन्द्रमश्श्विनांव्वाचाव्वा
चᳯसरस्वतीमग्निᳯसोमंᳱस्विष्टकृत्स्विष्टऽइन्द्रःसुत्रामांसवि
ताव्वरुणोभिषगिष्टोदेवोव्वनस्पतिः स्विष्टादेवाऽआज्यपाःस्वि ५७१
सं. ४२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ष्टोऽअग्निरग्निनाहोताहोत्रेस्विष्टकृद्यशोनदधदिन्द्रियमूर्ज्जम
पचितिᳬस्वधाव्वसुवनेव्वसुधेयस्यव्यन्तुयज ॥५८॥ अग्निमद्य
होतारमवृणीतायᳬयजमानᳬपचन्पक्तीᳬपचन्पुरोडाशान्व
ध्नन्नश्विभ्याञ्छागᳬसरस्वत्यैमेषमिन्द्रायऽऋषभᳬसुन्वन्न
श्विभ्याᳬसरस्वत्याऽइन्द्रायसुत्राम्णेसुरासोमान्त्सूपस्थाऽ
अद्य ॥५९॥ सूपस्थाऽअद्य । देवोव्वनस्पतिरभवदश्विभ्या ॥ १४ ॥
ञ्छागेनसरस्वत्यैमेषेणेन्द्रायऽऋषभेणाक्षँस्तान्मेदस्तᳬप्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तिंपचुतागृंभीषुतावींवृधन्तपुरोडाशैरपुंरश्विनासंरस्वतीन्द्रः
सुत्रामांसुरासोमाँस्त्वामद्य ॥ ६० ॥ त्वामद्य ॥ त्वामद्यऽ
ऋषऽआर्षेयऽऋषीणान्नपादवृणीतायँस्यजमानोबहुभ्यऽआ
सङ्गतेभ्यऽएषमेदेवेषुवसुवार्य्यायक्ष्यतऽइतितायादेवादेव
दानान्यदुस्तान्यस्मिाऽआचशास्वाचंगुरस्वेषितश्चहोतरसि
भद्रवाच्याय्प्रेषितोमानुषःसूक्तवाकायसूक्ताब्रूहि ॥ ६१ ॥ १७३
[१४-६]इतिश्रीवाजसनेयसंहितायामेकविंशोऽध्यायः ॥२१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ तेजोसिपंचा,
ग्नयऽएका, हिङ्कारायद्वे, तत्त्सवितुर्द्दश, व्विभूम्र्मात्रैका,
कायद्वे, ऽआब्रह्मँस्त्रयोदश, शेषादेकैको, नविꣳशतिश्चतु-
स्त्रिꣳशत् [अ. २२ मं. ३४ अनु. १९] ॥ हरिः ॐ ॥
तेजोँसि ॥ तेजोँसिशुक्क्रममृतंमायुँष्प्पा[1]ऽआयुँर्म्मेँपाहि ॥ देव ॥ १५ ॥
स्यंत्त्वासवितुःप्प्रसवेꣳश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्त्ताब्भ्यामाद

१ आयुष्प्पा "समानपदे च" (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन एकस्मिन्पदे यो विसर्गः तस्य विसर्जनीयस्य ककारपकारयोः परे यथायोगं सकारः षकारश्चैकपदे भवतः। इति षकारे कृते "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इति पकारस्य द्वित्त्वम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दे ॥ १ ॥ इमामंगृभ्णन् ॥ इमामंगृभ्णन्नरशनामृतस्यपूर्व्वऽ
आयुंषिव्विदथैषुकव्या ॥ सानोऽअस्मिन्त्सुतऽआबंभूवऽऋ
तस्यसामंन्त्सरमारपंन्ती ॥ २ ॥ अभिधाऽअंसि ॥ अभिधाऽ
अंसिभुवंनमसियन्तासिंधर्त्ता ॥ सत्त्वमग्निंव्वैश्वानरꣳसप्प्रंथ
सङ्गच्छस्वाहांकृतः ॥ ३ ॥ स्वगात्त्वां । देवेभ्यंःप्प्रजापंत
येब्रह्मन्नश्वंम्भन्त्स्यामिंदेवेभ्यंःप्प्रजापंतयेतेनंराध्यासम् ॥ ५७५
तम्बंधानदेवेभ्यंःप्प्रजापंतयेतेनंराध्नुहि ॥ ४ ॥ प्रजापंतये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वा ॥ प्रजापतयेत्त्वाजुष्टम्प्प्रोक्षामीन्द्राग्निभ्यान्त्वाजुष्टम्प्रो
क्षामिव्वायवेत्त्वाजुष्टम्प्रोक्षामिव्विश्वेभ्यस्त्वादेवेभ्योजुष्ट
म्प्रोक्षामिसर्व्वेभ्यस्त्वादेवेभ्योजुष्टम्प्रोक्षामि ॥ योऽ[1]र्व्वे
न्तञ्जिघांᳪसतितमभ्यमीतिव्वरुणः ॥ परोमर्त्तःपरश्वा ॥५॥
[५-१] अग्नयेस्वाहा ॥ अग्नयेस्वाहासोमायस्वाहापाम्मो
दायस्वाहासवित्रेस्वाहाव्वायवेस्वाहाव्विष्णवेस्वाहेन्द्रायस्वाहा
बृहस्पतयेस्वाहामित्रायस्वाहाव्वरुणायस्वाहा ॥ ६ ॥ [१-२]

१ अत्र द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते विवृत्तिस्तत्र विज्ञेया । (या. शि.) तेमात्रोकाराकारयोः पूर्वरूपकारकः सन्धिर्न भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिङ्कारायस्वाहा ॥ हिङ्कारायस्वाहाहिङ्कृतायस्वाहाक्रन्दते
स्वाहावक्रन्दायस्वाहाप्रोथतेस्वाहाप्रप्रोथायस्वाहागन्धाय
स्वाहाघ्रातायस्वाहानिविष्टायस्वाहोपविष्टायस्वाहासन्दिताय
स्वाहावल्गतेस्वाहासीनायस्वाहाशयानायस्वाहास्वपतेस्वाहा
जाग्रतेस्वाहाकूजतेस्वाहाप्रबुद्धायस्वाहाविजृम्भमाणायस्वा
हाविचृतायस्वाहासꣳहानायस्वाहोपस्थितायस्वाहायनाय
स्वाहाप्रायणायस्वाहा ॥ ७ ॥ [1]यतेस्वाहा ॥ यतेस्वाहा ९७७

१ अत्र यकारस्य पादादौ सर्वत्र जकारोच्चारणम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धावंतेस्वाहोद्द्रावायस्वाहोद्द्रुंतायस्वाहाशूकारायस्वाहाशूकृंता
यस्वाहानि[1]षंण्णायस्वाहोत्त्थितायस्वाहाजवायस्वाहाबलाय
स्वाहाव्विवर्त्तमानायस्वाहाव्विवृंत्तायस्वाहाव्विधून्वानायस्वाहा
व्विधूतायस्वाहाशुश्रूंषमाणायस्वाहाशृण्वतेस्वाहेक्क्षमाणाय
स्वाहेक्क्षितायस्वाहाव्वीक्क्षितायस्वाहानिमेषायस्वाहायदत्ति
तस्म्मैस्वाहायत्पिबंतितस्म्मैस्वाहायन्मूत्रंङ्करोतितस्म्मैस्वा ॥ १७ ॥

१ निषण्णाय । अत्र द्वयोर्नकारयोर्णत्वं निपात्यते । प्रथमस्य "तवर्गे च" (शु. य. प्रा. ३ अ. ९४ सू.) इत्यनेन तवर्गस्य व्यवधानेन णत्वाप्राप्तौ द्वितीयस्य नकारस्य "स्वरयवहकपैश्च" (शु. य. प्रा. ३ अ. ८६ सू.) इत्यनेन व्यवधानातिरिक्तनकारस्य व्यवधानाण्णत्वाप्राप्तौ "निषण्णाय०" (शु. य. प्रा. ३ अ. ८७ सू.) इत्यनेन णत्वनिपातः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हांकुर्व्वतेस्वाहांकृतायस्वाहां ॥ ८ ॥ [२-३] तत्त्संवि
तुः ॥ तत्त्संवितुर्व्वरेण्ण्यम्भर्ग्गोदेवस्यधीमहि ॥ धियोयो
नः प्प्रचोदयात् ॥ ९ ॥ हिरंण्ण्यपाणिमूतये । सवितार
मुपंह्वये ॥ सचेत्तादेवतापदम् ॥ १० ॥ देवस्यचेततः ॥
देवस्यचेततोमहीम्प्रसंवितुर्हवामहे ॥ सुमतिꣳसत्त्यराधसम्
॥ ११ ॥ सुष्टुतिꣳसुमतीवृधः[1] ॥ सुष्टुतिꣳसुमतीवृधोरातिꣳ
संवितुरीमहे ॥ प्रदेवायमतीविदे ॥ १२ ॥ रातिꣳसत्त्प

१ सुमतीवृधः । अत्र "अश्वरश्मिसुमति°" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे ह्रस्वेकारस्य सुमतिशब्दस्य दीर्घत्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तिम् ॥ रातिꣳसत्पतिम्महेसवितारमुपह्वये ॥ आसवन्देव
वीतये ॥ १३ ॥ देवस्यसवितुः ॥ देवस्यसवितुर्म्मतिमासवं
विश्वदेव्यम् ॥ धियाभगम्मनामहे ॥ १४ ॥ अग्निꣳस्तो
मेन । बोधयसमिधानोऽअमर्त्त्यम् ॥ हव्यादेवेषुनोदधत्
॥ १५ ॥ सहव्यवाट् ॥ सहव्यवाडमर्त्त्यऽउशिग्गदूतश्चनो
हितः ॥ अग्निर्द्धियासमृण्वति ॥ १६ ॥ अग्निन्दूतम् ॥ ॥ १८ ॥
अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँ२॥ऽआसादया ५८०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दिह ॥ १७ ॥ अजीजनोहि । पवमानसूर्यौविधारेशक्मं
नापयं÷ ॥ गोजीरयारꣳहंमाणꣳपुरन्ध्या ॥ १८॥ [१०-४]
विभूर्म्मात्रा । प्रभूःपित्राश्वोऽसिहयोऽस्यत्योऽसिमयोऽस्यर्वासिस
प्तिरसिवाज्यसिवृषासिनृमणाऽअसि ॥ ययुर्न्नामासिशिशुर्न्ना
मास्यादित्त्यानाम्पत्त्वान्विहिदेवाऽआशापालाऽएतन्देवेभ्यो
श्वम्मेधायप्प्रोक्षितꣳरक्षतेहरन्तिरिहरमतामिहधृतिरिहस्व
धृतिꣳस्वाहा ॥ १९ ॥ [१-५] कायस्वाहा ॥ कायस्वाहाकस्मै ५८१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु॰ य॰ संहि॰ स्वाहांकतमस्मैस्वाहास्वाहाधिमाधींतायस्वाहामनः प्रजाप उ॰ वि॰ अ॰
॥१९॥ तयेस्वाहांचित्तंविज्ञांतायादित्यैस्वाहादित्यैमह्यैस्वाहादित्यै ॥ २२ ॥
सुमृडीकायैस्वाहासरस्वत्यैस्वाहासरस्वत्यैपावकायैस्वाहासर
स्वत्यैबृहत्यैस्वाहांपूष्णेस्वाहांपूष्णेप्रपथ्यायस्वाहांपूष्णे
नरन्धिषायस्वाहात्वष्ट्रेस्वाहात्वष्ट्रेतुरीपायस्वाहात्वष्ट्रेपुरुरूपा
यस्वाहाविष्णवेस्वाहाविष्णवेनिभूयपायस्वाहाविष्णवेशि ॥ १९ ॥
पिविष्टायस्वाहा ॥ २० ॥ विश्वोदेवस्य । नेतुर्म्मर्त्तोवुरीतसक् ५८२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्यम् ॥ व्विश्वौरायऽइषुद्ध्यातिद्युम्म्नंव्वृणीतपुष्ष्यसेस्वाहा ॥२१॥
[२-६] आब्रह्मन् ॥ आब्रह्मन्ब्राह्मणोब्रह्मवर्च्चसीजायतामारा
ष्ट्रेराजन्न्य÷शूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ग्ध्रीधेनु
र्व्वोढानड्वानाशु:सप्प्ति:पुरन्धिर्य्योषाजिष्णूरथेष्ठा:सभेयोयु
वास्ययजमानस्यव्वीरोजायतान्निकामेनिकामेन:पर्ज्जन्न्योव्वर्ष
तुफलवत्त्योनऽओषधय:पच्च्यन्तांय्योगक्षेमोन÷कल्प्पताम् ९८३
॥२२॥ [१-७] प्राणायस्वाहा। पानायस्वाहाव्यानायस्वाहा

सं. ४३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चक्षुषे स्वाहा श्श्रोत्राय स्वाहा व्वाचे स्वाहा मनसे स्वाहा ॥ २३ ॥
[१-८] प्राच्यै दिशे । स्वाहा र्व्वाच्यै दिशे स्वाहा दक्षिणायै दिशे
स्वाहा र्व्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहा र्व्वाच्यै दिशे स्वाहोदी
च्यै दिशे स्वाहा र्व्वाच्यै दिशे स्वाहोर्द्ध्वायै दिशे स्वाहा र्व्वाच्यै दिशे
स्वाहावाच्यै दिशे स्वाहा र्व्वाच्यै दिशे स्वाहा ॥ २४ ॥ [१-९]
अद्भ्यः स्वाहा । व्वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वा ॥ २० ॥
हा स्रवन्तीभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा कूप्याभ्यः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वाहासूद्ध्याभ्यःस्वाहाधार्य्याभ्यःस्वाहार्ण्णवायस्वाहासमु
द्रायस्वाहासरिरायस्वाहा ॥ २५ ॥ [१-१०] वाता
यस्वाहा । धूमायस्वाहाभ्रायस्वाहामेघायस्वाहाविद्योतमा
नायस्वाहास्तनयतेस्वाहावस्फूर्ज्जतेस्वाहावर्षतेस्वाहाववर्षते
स्वाहोग्रंवर्षतेस्वाहाशीघ्रंवर्षतेस्वाहोद्गृह्णतेस्वाहोद्गृहीताय
स्वाहाप्रुष्णतेस्वाहाशीकायतेस्वाहाप्रुष्वाभ्यःस्वाहाह्रादु ५८५
नीभ्यःस्वाहानीहारायस्वाहा ॥ २६ ॥ [१-११] अग्न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥२१॥

येस्वाहा॑ ॥ अ॒ग्नये॒स्वाहा॒सोमा॑य॒स्वाहेन्द्रा॑य॒स्वाहा॑पृथि॒व्यै

स्वाहा॒न्तरि॑क्षाय॒स्वाहा॑दि॒वेस्वाहा॑दि॒ग्भ्यश्स्वाहाशा॑भ्य॒ᳬस्वा ॥ २२ ॥

हो॒र्व्यैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहा॑ ॥ २७ ॥ [१-१२]

नक्ष॑त्रेभ्य॒ᳬस्वाहा॑। नक्ष॒त्रियेभ्य॒ᳬस्वाहा॑होरा॒त्रेभ्य॒ᳬस्वाहा॑

र्द्धमा॒सेभ्य॒ᳬस्वाहा॒मासेभ्य॒ᳬस्वाहऽऋ॒तुभ्य॒ᳬस्वाहा॑र्त्त॒वेभ्य॒ᳬ

स्वाहा॑संवत्स॒राय॒स्वाहा॒द्यावा॑पृथि॒वीभ्या॒ᳬस्वाहा॑च॒न्द्राय॒स्वा ॥ २१ ॥

हा॒सूर्य्या॑य॒स्वाहा॑र॒श्मिभ्य॒ᳬस्वाहा॒वसु॑भ्य॒ᳬस्वाहा॑रु॒द्रेभ्य॒ᳬ ५८६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वाहादित्त्येब्भ्युःस्वाहामरुद्भ्युःस्वाहाविश्वेब्भ्योदेवेब्भ्युः
स्वाहामूलेब्भ्युःस्वाहाशाखाब्भ्युःस्वाहावनस्प्पातिब्भ्युःस्वा
हापुष्प्पेब्भ्युःस्वाहाफलेब्भ्युःस्वाहौषधीब्भ्युःस्वाहा ॥ २८ ॥
[१-१३] १३०० शतम् ॥ पृथिव्यैस्वाहा ॥ पृथिव्यैस्वाहान्त
रिक्क्षायस्वाहादिवेस्वाहासूर्य्यायस्वाहाचन्द्रायस्वाहानक्ष
त्रेब्भ्युःस्वाहाद्भ्यःस्वाहौषधीब्भ्युःस्वाहावनस्प्पातिब्भ्युःस्वा ५८७
हापरिप्लुवेब्भ्युःस्वाहाचराचरेब्भ्युःस्वाहासरीसृपेब्भ्युःस्वाहा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ २९ ॥ [१-१४] असवे स्वाहा ॥ असवे स्वाहा वसवे स्वाहा
विभुवे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाभि
भुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा सꣳसर्प्पाय स्वाहा चन्द्रा
य स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवा पतयते स्वाहा
॥ ३० ॥ [१-१५] मधवे स्वाहा ॥ मधवे स्वाहा माधवाय
स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहे
षाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तपस्यायस्वाहाꣳहसस्पतयेस्वाहा ॥ ३१ ॥ [१-१६] वाजाय
स्वाहा । प्रसवायस्वाहापिजायस्वाहाक्रतवेस्वाहास्वः स्वा
हामूर्ध्नेस्वाहाव्यश्नुविनेस्वाहान्त्यायस्वाहान्त्यायभौवनाय
स्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहाप्रजापतयेस्वाहा
॥ ३२ ॥ [१-१७] आयुर्यज्ञेन । कल्पताꣳस्वाहाप्राणो
यज्ञेनकल्पताꣳस्वाहापानोयज्ञेनकल्पताꣳस्वाहाव्यानो ४८१
यज्ञेनकल्पताꣳस्वाहोदानोयज्ञेनकल्पताꣳस्वाहासमा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि. ॥२३॥

नोयुज्ज्ञेनंकल्प्पताᳫंस्वाहाचक्क्षुर्य्युज्ज्ञेनंकल्प्पताᳫंस्वाहा
श्श्रोत्त्रँय्युज्ज्ञेनंकल्प्पताᳫंस्वाहाव्वाग्ग्युज्ज्ञेनंकल्प्पताᳫंस्वा
हामनोयुज्ज्ञेनंकल्प्पताᳫंस्वाहात्क्मायुज्ज्ञेनंकल्प्पताᳫंस्वा
हाब्ब्रह्मायुज्ज्ञेनंकल्प्पताᳫंस्वाहाज्ज्योतिर्य्युज्ज्ञेनंकल्प्पताᳫं
स्वाहास्स्वर्य्युज्ज्ञेनंकल्प्पताᳫंस्वाहापृष्ठँय्युज्ज्ञेनंकल्प्पताᳫं
स्वाहायुज्ज्ञोयुज्ज्ञेनंकल्प्पताᳫंस्वाहा॥३३॥[१-१८]एकस्स्मै
स्वाहा ॥ एकस्स्मैस्वाहाद्द्वाब्भ्याᳫंस्वाहाशतायस्वाहैकशताय

उ. वि. अ. ॥२२॥

॥२३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वाहाव्युष्ट्यै स्वाहां स्वुर्ग्गाय स्वाहा ॥३४॥ [१-१९] इतिश्रीवा-
जसनेयसंहितायां द्वाविंशोऽध्यायः ॥ २२ ॥ श्रीवेदपुरुषाय
नमः॥अनुवाकसूत्रम्॥ हिरण्यगर्भौ यश्प्राणतोद्विकौ, सुञ्ज
न्त्यष्टौ, व्वायुष्ट्वापञ्च, प्राणायातिस्त्र, उत्त्सक्थ्याद्वादश, गायत्री
त्रिष्टुप्, कस्त्त्वाषट्कौ, कश्स्विदष्टौ, कास्विद्दश, सुभूश्स्वयंभू-
स्तिस्त्र, एकादश पञ्चषष्टिः ॥ [अ. २३ मं. ६५ अनु. ११] ६११
हरिः ॐ ॥ हिरण्यगर्भश्सम् ॥ हिरण्यगर्भश्समवर्त्तताग्ग्रे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूतस्यंजातश्पतिरेकंऽआसीत् ॥ सदांधारपृथिवीन्द्यामुते
माङ्कस्म्मैदेवायंहविषांव्विधेम ॥ १ ॥ उपयामगृंहीतोसि ।
प्प्रजापंतयेत्त्वाजुष्टंङ्गृह्णाम्म्येषतेयोनिंःसूर्य्यंस्त्तेमहिमा ॥
यस्त्तेहंन्त्संवत्त्सरेमंहिमासंम्बभूवयस्त्तेंव्वायावन्तरिंक्क्षेम
हिमसांम्बभूवयस्त्तेंदिविसूर्य्यैमहिमासंम्बभूवतस्म्मैतेमहि
म्न्नेप्प्रजापंतयेस्वाहांदेवेब्भ्यंः ॥ २ ॥ [२-१] यःप्प्रांण ॥ २४ ॥
तःं ॥ यःप्प्रांणतोनिंमिषतोमंहित्त्वैकंऽइद्राजाजगंतोबभूवं ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[१]यऽईशेऽअस्यद्विपदश्चतुष्पदःकस्मैदेवायहविषाविधेम ॥ ३ ॥ उपयामगृहीतोसि । प्रजापतयेत्त्वाजुष्टङ्गृह्णाम्म्येष तेयोनिश्चन्द्रमास्त्तेमहिमा ॥ यस्त्तेरात्त्रौसंवत्त्सरेमहिमासम्बभूवयस्त्तेपृथिव्यामग्नौमहिमासम्बभूवयस्त्तेनक्षत्त्रेषुचन्द्रमसिमहिमासम्बभूवतस्मैतेमहिम्नेप्रजापतयेदेवेभ्यःस्वाहा

१ द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते । विवृत्तिस्तत्र विज्ञेया "यऽईशे" तु निदर्शनम् । या. शि. । अत्र यः इति पदस्थस्य विसर्गस्य "कण्ठ्यपूर्वो यकारमरिफितः" (शु. य. प्रा. ४ अ. ४७ सू.) इत्यनेन यकारे "यवयोः पदान्तयोः स्वरमध्ये लोपः" (शु. य. प्रा. ४ अ. १२५ सू.) इत्यनेन यस्य लोपेऽकारेकारयोः "कण्ठ्यादिवर्ण एकारम्" (शु. य. प्रा. ४ अ. ५३ सू.) इत्यनेनैकारे प्राप्ते "न परकालः पूर्वकाले पुनः" (शु. य. प्रा. ३ अ. ४ सू.) इत्यनेन निषेधे सन्ध्यभावः । उच्चारणेऽप्यर्धमात्राकालिको विरामः । तज्ज्ञापकं(ऽ)इत्याकारकं चिह्नम् । अत्र पाकवतीवृत्तिर्ज्ञेया प्रारम्भे ह्रस्वयोगात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ ४ ॥ [२-२] युञ्जन्तिब्ब्रध्नम् ॥ युञ्जन्तिब्ब्रध्नमंरुषञ्चरं
न्तम्परिंतस्तथुषंः ॥ रोचंन्तेरोचनादिवि ॥ ५ ॥ युञ्जन्त्यंस्य ॥
युञ्जन्त्यंस्यकाम्म्याहरीव्विपंक्क्षसारथें ॥ शोणांधृष्णनूवा
म्प्राक्क्तोर्भृतᳫंरायाबुर्हिष्मतोत्त्यगाद्वसुवनेव्वसुधेयंस्यव्वेतुय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जं ॥ १२ ॥ देवीर्द्वारः ॥ देवीर्द्वारऽइन्द्रꣳसङ्घातेवीड्वीर्यामंन्नवर्द्धयन् ॥ आवत्सेनतरुणेनकुमारेणंचमीवतापार्वाणꣳरेणुकंकाटन्नुदन्तांव्वसुवनेव्वसुधेयंस्यव्यन्तुयजं ॥ १३ ॥ देवीऽउषासानक्ता ॥ देवीऽउषासानक्तेन्द्रंयुज्ञेप्प्रयत्त्यह्वेताम् ॥ देवीर्व्विशःप्प्रायांसिष्टाꣳसुप्प्रीतेव्वसुधितेव्वसुवनेव्वसुधेयंस्यव्वीताँयजं ॥ १४ ॥ देवीजोष्ट्री ॥ देवीजोष्ट्रीव्वसुधितीदेवमि ६७१

१ देवी उषासा। अत्र "उत्रमहोभिर्नक्तमीकारैकारौकारनकारेभ्यः" (शु.य.प्रा. ३ अ. ११९ सू.) इत्यनेन देवीशब्दस्थेकारात्परस्य उष इत्यस्य ह्रस्वाकारस्य दीर्घाकारः।

सं. ५१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्द्रंमवर्द्धताम् ॥ अयांद्यन्याघ. द्वेषाऽंस्यान्याव्वंक्षद्द्वसुव्वाऽर्यां
णियजंमानायशिक्क्षतेव्वसुवनेंव्वसुधेयंस्यव्वीतांऽयज ॥ १५ ॥
देवीऽऊर्ज्जांहुंती ॥ देवीऽऊर्ज्जांहुंतीदुघेंसुदुघेपयसेन्द्रंमवर्द्धता
म् ॥ इषमूर्ज्जमन्याव्वंक्षत्त्सग्ग्धिंद्धसपींतिमन्यानवेंनपूर्व्वन्दयं
मानेपुराणेननवमधांतामूर्ज्जमूर्ज्जांहुंतीऽऊर्ज्जयंमानेव्वसुव्वाऽर्यां
णियजंमानायशिक्क्षतेव्वसुवनेंव्वसुधेयंस्यव्वीतांऽयज ॥ १६ ॥
देवादैव्यां ॥ देवादैव्याहोतांरादेवमिन्द्रंमवर्द्धताम् ॥ हुताघं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शङ्क्सावाभांष्ट्रौंवसुद्वारुर्याणियजंमानायशिक्षितौवंसुवनेंव्वसु
धेयंस्यव्वीतांरुयज ॥ १७ ॥ देवीस्तिस्त्रः ॥ देवीस्तिस्त्रास्तिस्त्रोदेवीःपतिमिन्द्रंमवर्द्धयन् ॥ अस्पृंक्षद्भारंतीदिवंरुद्रैर्य्यज्ञंसरंस्वतीडावसुंमतीगृहान्वंसुवनेंव्वसुधेयंस्यव्यन्तुयज ॥ १८ ॥ देवइन्द्रं÷ ॥ देवइन्द्रोनराशंसंस्त्रिवरूथस्त्रिबन्धुरोदेवमिन्द्रंमवर्द्धयत् ॥ शतेनंशितिपृष्ठानामाहिंतःसहस्रेंण
प्प्रवंर्त्ततेमित्रावरुणेदंस्यहोत्रमर्हंतोबृहस्प्पातिंस्तोत्रमश्विना ६८१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्ध॑रुर्यं॒वं व॒सुव॑नेव्व॒सु॒धेय॑स्य॒ब्वे॒तु॒यज॑ ॥ १९ ॥ दे॒वोदे॒वैः ॥ दे॒वो
दे॒वैर्व्वन॒स्प्पति॒र्हिर॑ण्णयपण्णो॒मधु॑शाख॒ꣳसु॒पिप्प॒लोदे॒वमिन्द्र॑मव
र्द्ध॑यत् ॥ दिव॒मग्ग्रे॑णास्पृक्ष॒दान्तरि॑क्षम्पृथि॒वीमं॑दृꣳहीद्व॒सुव
नेव्व॒सु॒धेयं॑स्य॒ब्वे॒तु॒यज॑ ॥ २० ॥ दे॒वम्ब॒र्हिः ॥ दे॒वम्ब॒र्हिर्व्वारि॑ती
नान्दे॒वमिन्द्र॑मवर्द्धयत् ॥ स्वा॒सु॒स्त्थमिन्द्रे॒णास॑न्नम॒न्याब॒
र्हीꣳष्य॒भ्य॑भूद्व॒सुव॑नेव्व॒सु॒धेयं॑स्य॒ब्वे॒तु॒यज॑ ॥ २१ ॥ दे॒वोऽ ॥ ६९ ॥
अ॒ग्निः ॥ दे॒वोऽअ॒ग्निःस्वि॑ष्टकृद्दे॒वमिन्द्र॑मवर्द्धयत् ॥ स्वि॒ष्टङ्कु॒

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वन्निँत्त्वष्टुकृत्त्विष्टमुद्य कँरोतुनोव्वसुवनेव्वसुधेयंस्यव्वेतुयजं ॥ २२ ॥ अग्निमुद्य । होतारमवृणीतायँयजमानुःपचन्प क्कीःपचँन्पुरोडाशंम्बुध्नानिन्द्रायुच्छागम् ॥ सूपस्त्थाऽअद्यदे वोव्वनुस्प्पतिरभवदिन्द्रायुच्छागेन ॥ अघुत्तम्मेदुस्त्तःप्रतिपच् ताग्ग्रभीदवीवृधत्पुरोडाशेन ॥ त्वामुद्यऽऋषे ॥ २३ ॥ [१२-२] होतायक्षत्त्समिधानम्महत् ॥ होतायक्षत्त्सामिधानम्महद्य शःसुसंमिद्धंव्वरेण्ण्यमग्निमिन्द्रंव्वयोधसंम् ॥ गायत्रीञ्छन्दऽ

१. अ. २१, मं. ६१—त्वामुद्यऽऋषऽ आ० ॥ १ ॥ इति प्रतीकः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि. ॥७०॥

इन्द्रियन्त्र्यविङ्गांव्वयोदधद्द्वेत्त्वाज्ज्यंस्यहोतर्य्यजं ॥ २४ ॥ होता

यक्क्षत्तनूनपातमुद्भिदंम् ॥ होतायक्क्षत्तनूनपातमुद्भिदुँय्य

ङ्गर्ब्भमदितिर्द्दधेशुचिमिन्द्रंव्वयोधसंम् ॥ उष्णिहञ्छन्दऽ

इन्द्रियन्दित्त्यवाहङ्गाव्वयोदधद्द्वेत्त्वाज्ज्यंस्यहोतर्य्यजं ॥ २५ ॥

होतायक्क्षदीडेन्न्यंमीडितम् ॥ होतायक्क्षदीडेन्न्यंमीडितंव्वृत्रह

न्तंममिडाभिरीड्ड्यंहसहःसोममिन्द्रंव्वयोधसंम् ॥ अनुष्टुभञ्छ

न्दंऽइन्द्रियम्पञ्चाविङ्गांव्वयोदधद्द्वेत्त्वाज्ज्यंस्यहोतर्य्यजं ॥२६॥

उ. वि. अ. ॥ २८ ॥ ॥ ७० ॥ ६८४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

होतांयक्षत्त्सुबर्हिषंम्पूषण्ण्वन्तंम् ॥ होतांयक्षत्त्सुबर्हिषंम्पू
षण्ण्वन्तुममर्त्त्यंहुसीदंन्तम्बर्हिषिंप्प्रियेमृतेन्द्रंव्वयोधसंम् ॥
बृहतीञ्छन्दंऽइन्द्रियन्त्रिवत्त्सङ्गांव्वयोदधुद्द्वेत्वाज्ज्यंस्यहोतर्य्यं
जं ॥२७॥ होतांयक्षद्द्वुरंस्वतीःसुप्प्रायणाः ॥ होतांयक्ष
द्द्वुरंस्वतीःसुप्प्रायणाऽऋतावृधोद्द्वारोदेवीर्हिरण्ण्ययीर्ब्रह्मा
णमिन्द्रंव्वयोधसम् ॥ पङ्क्तिञ्छन्दंऽइहेन्द्रियन्तुर्य्यवाहङ्गांव्व ६८५
योदधद्द्वुरन्त्वाज्ज्यंस्यहोतर्य्यंजं ॥ २८ ॥ होतांयक्षत्त्सुपेशा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सासुशिल्पे। बृंहतीऽउभेनक्क्तोषासानदंश्शंतेविश्श्वमिन्द्रंव्वयो
धसंम् ॥ त्रिष्टुभञ्छन्दंऽइहेन्द्रियम्पंष्ठवाहङ्गांव्वयोदधंद्धीता
माज्ज्यंस्यहोतर्य्यंज ॥२९॥ होतांयक्क्षत्त्प्रचेतसादेवानाम् ॥
होतांयक्क्षत्त्प्रचेतसादेवानांमुत्तमँय्यशोहोतांरादैव्यांकवीस
युजेन्द्रंव्वयोधसंम्॥ जगंतिञ्छन्दंऽइन्द्रियमंनड्वाहङ्गांव्वयोदधं
द्धीतामाज्ज्यंस्यहोतर्य्यंज ॥३०॥ होतांयक्क्षत्त्पेशंस्वतीस्त्ति
स्त्रः ॥ होतांयक्क्षत्त्पेशंस्वतीस्त्तिस्त्रोदेवीर्हिंरण्ययींर्ब्भांरंती

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बृंहतीम्मर्हीःपतिमिन्द्रंव्वयोधसंम् ॥ व्विराजञ्छन्दऽइहेन्द्रि
यन्धेनुङ्गान्नव्वयोदधद्द्यन्त्वाज्ज्यंस्यहोतर्य्यजं ॥ ३१ ॥ होता
यक्षत्त्सुरेतंसन्त्वष्टांरम् ॥ होतायक्षत्त्सुरेतंसन्त्वष्टांरम्पुष्टिव
र्द्धंनꣳरूपाणिबिभ्रंतम्पृथक्पुष्टिमिन्द्रंव्वयोधसंम् ॥ द्विपदञ्छ
न्दंऽइन्द्रियमुक्षाणङ्गान्नव्वयोदधद्वेत्त्वाज्ज्यंस्यहोतर्य्यजं ३२॥
होतायक्षद्वनस्प्पतिꣳशमितारंम्॥ होतायक्षद्वनस्प्पतिꣳश ६८७
मितारꣳशतक्क्रंतुꣳहिरंण्ण्यपर्ण्णमुक्तिथनꣳरशनाम्बिभ्रंतंव्व
CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिम्भगमिन्द्रँव्वयोधसम् ॥ ककुभञ्छन्दऽइहेन्द्रियंव्वेहतङ्गांव्व
योदधद्वेत्त्वाज्ज्यस्यहोतर्यज ॥ ३३ ॥ होतायक्क्षत्त्स्वाहाकृती
रग्निम् ॥ होतायक्क्षत्त्स्वाहाकृतीरग्निङ्गृहपतिम्पृथग्ग्वरुणम्भे
षजङ्कविङ्क्षत्त्रमिन्द्रँव्वयोधसम् ॥ अतिच्छन्दसञ्छन्दऽइन्द्रि
यम्बृहदृषभङ्गांव्वयोदधद्व्यन्त्वाज्ज्यस्यहोतर्यज ॥ ३४ ॥
[११-३] देवम्बर्हिः ॥ देवम्बर्हिर्व्वयोधसन्देवमिन्द्रमवर्द्ध
यत् ॥ गायत्त्र्याच्छन्दसेन्द्रियञ्चक्षुरिन्द्रेव्वयोदधद्वसुवनेव्वसु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धेयंस्यव्वेतुयजं ॥ ३५ ॥ देवीर्द्वारंः ॥ देवीर्द्वारोव्वयोधसꣳ

शुचिमिन्द्रंमवर्द्धयन् ॥ उष्णिहाच्छन्दसेन्द्रियम्प्राणमिन्द्रे

व्वयोदधंद्वसुवनैंव्वसुधेयंस्यव्यन्तुयजं ॥ ३६ ॥ देवीऽउषासा

नक्ता । देवमिन्द्रंव्वयोधसंन्देवीदेवमंवर्द्धताम् ॥ अनुष्टुभा

च्छन्दंसेन्द्रियम्बलमिन्द्रेव्वयोदधंद्वसुवनैंव्वसुधेयंस्यव्वीताँयजं ६८१

॥ ३७ ॥ देवीजोष्ट्रीं ॥ देवीजोष्ट्रीव्वसुंधितीदेवमिन्द्रंव्वयो

धसंन्देवीदेवमंवर्द्धताम् ॥ बृहत्याच्छन्दंसेन्द्रियꣳश्रोत्रमि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्द्रेव्वयोदधंद्वसुवनेंव्वसुधेयंस्यव्वीताँ३यज ॥ ३८ ॥ देवीऽऊ
र्जाहुती ॥ देवीऽऊर्जाहुतीदुघेसुदुघेपयसेन्द्रम्व्वयोधसंन्देवी
देवमंवर्द्धतान् ॥ पङ्क्याच्छन्दसेन्द्रियꣳशुक्रमिन्द्रेव्वयोद
धंद्वसुवनेंव्वसुधेयंस्यव्वीताँ३यज ॥ ३९ ॥ देवादैव्या ॥ देवा
दैव्याहोतारादेवमिन्द्रंव्वयोधसंन्देवौदेवमंवर्द्धताम् ॥ त्रिष्टुभा
च्छन्दसेन्द्रियन्त्विषिमिन्द्रेव्वयोदधंद्वसुवनेंव्वसुधेयंस्यव्वीताँ ॥ ७३ ॥
३यज ॥ ४० ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीर्व्वयो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धसम्पतिमिन्द्रंमवर्द्धयन् ॥ जगंत्त्याच्छन्दंसेन्द्रियᳬंशूषमि
न्द्रेव्वयोदधंद्वसुवनैव्वसुधेयंस्यव्यन्तुयजं ॥ ४१ ॥ देवोनराशᳬं
सं÷ ॥ देवोनराशᳬंसोंदेवमिन्द्रंव्वयोधसंन्देवोदेवमंवर्द्धयत् ॥
व्विराजाच्छन्दंसेन्द्रियᳬंरूपमिन्द्रेव्वयोदधंद्वसुवनैद्वसुधेयस्य
व्वेतुयजं ४२ ॥ देवोव्वनस्पतिं÷ ॥ देवोव्वनस्पतिंर्हुंवामिन्द्रँ
व्वयोधसंन्देवोदेवमंवर्द्धयत् ॥ द्विपंदाच्छन्दंसेन्द्रियम्भगमि ६११
संं. ५२ न्द्रेव्वयोदधंद्वसुवनैव्वसुधेयंस्यव्वेतुयजं ॥ ४३ ॥ देवम्बर्हिः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवम्बर्हिर्व्वारितीनान्देवमिन्द्रँव्वयोधसन्देवन्देवमवर्द्धयत् ॥
ककुभाच्छन्दसेन्द्रियँयश इन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वे
तु यज ॥ ४४ ॥ देवो अग्निः । स्विष्टकृद्देवमिन्द्रँव्वयोधसन्दे
वो देवमवर्द्धयत् ॥ अतिच्छन्दसाच्छन्दसेन्द्रियङ्क्षत्रमिन्द्रे व्व
यो दधद्वसुवने व्वसुधेयस्य व्वेतु यज ॥ ४५ ॥ अग्निमद्य ।
होतारमवृणीतायँयजमानः पचन्पक्तीः पचन्पुरोडाशम्बध्न
न्निन्द्रायव्वयोधसे च्छागम् ॥ सूपस्था अद्य देवो व्वनस्पतिर

॥ ७४ ॥ ६९२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भवदिन्द्रांयव्वयोधसेच्छागेन ॥ अघुत्तम्मेदुस्त्तश्प्रतिंपचुता
ग्ग्रंभीदवींवृधत्त्पुरोडाशेन ॥ [1]त्वांमुद्यऽऋषे ॥ ४६ ॥ [१२-४]
इतिश्रीवाजसनेयसंहितायाम् अष्टाविंशोऽध्यायः ॥ २८ ॥
श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ समिद्धोऽअञ्जन्ने
कादश, यदक्रन्दस्त्रयोदश, समिद्धोऽअद्यद्वादश, केतुंकृण्वँ
श्चतुर्व्विꣳशति, श्चत्वारःषष्टिः [अ. २९ मं. ६० अनु. ४] ॥
हरिः ॐ ॥ समिंद्धोऽअञ्जन् ॥ समिंद्धोऽअञ्जन्कृदंरम्मती

१. अ. २१ ॥ मं. ६१ ॥ त्वामद्यऽऋषऽ० १ ॥ इति प्रतीकः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि. ॥७५॥

नाङ्कृतमंग्ग्नेमधुंमुत्त्पिपन्वंमानः ॥ व्वाजीव्वहंन्वाजिनंञ्जातवे उ. वि.
दोदेवानांव्वक्षिप्प्रियमासधस्त्थंम् ॥१॥ घृतेनाञ्जन् ॥ घृते अ.
नाञ्जन्तसम्पथोदेवयानांन्प्रजानन्वाज्ज्यप्प्येतुदेवान् ॥ अनु ॥२९॥
त्त्वासप्तेप्प्रदिशं÷सचन्ताᳫंस्वधामस्म्मैयजमानायधेहि॥२॥
ईड्यंश्च ॥ ईड्यश्चासिव्वन्द्यंश्चव्वाजिन्नाशुश्चासिमेद्ध्यंश्चसप्ते ॥
अग्ग्निष्ट्वांदेवैर्व्वसुंभिःसजोषांःप्प्रीतंव्वाह्निंव्वहतुजातवेदाः ॥३॥ ॥७५॥
स्त्तीर्णम्बर्हिः। सुष्टरींमाजुषाणोरुपृथुप्प्रथंमानम्पृथिव्याम् ॥ ६१४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवेभिंर्युक्तमदिंतिःसजोषांःस्योनङ्कृण्वानासुंवितेदंधातु ॥ ४ ॥ एताऽउंवः । सुभगांविश्वरूपाविपक्षोंभिःश्रयंमाणाऽउदातैः ॥ ऋष्वाःसतीःकवषःशुम्भंमानाद्वारोंदेवीःसुंप्प्राय णाभंवन्तु ॥ ५ ॥ अन्तरामित्रावरुंणा ॥ अन्तरामित्रावरुं णाचरंन्तीमुखँय्यज्ञानांमभिसंव्विदाने ॥ उषासांवाᳪंसुहिर ण्ण्येसुंशिल्प्पेऽऋतस्ययोनांविहसांदयामि ॥ ६ ॥ प्रथमावां ६९९

म् ॥ प्रथमावांᳪंसरथिनांसुवर्णादेवौपश्श्यंन्तौभुवंनानिवि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्वा॑ ॥ अपि॑प्प्रयुञ्चोदं॑नावाम्मिमां॑नाहोता॑राज्योति॑÷प्प्रदिशा॑
दिशन्ता॑ ॥ ७ ॥ आदि॒त्त्यैर्न्नं॑÷ ॥ आदित्त्यैर्न्नोभार॑तीवष्ट्टुय्
ज्ज्ञ६ँ सर॑स्वतीसुहरुद्रैर्न्नं॑ऽआवीत् ॥ इडोप॑हूतावसु॑भिः॑सजोषा॑
यज्ज्ञन्नो॑देवीरमृतेषुधत्त ॥८॥ त्वष्टा॑ंव्वीरम् ॥ त्वष्टा॑ंव्वीरन्देवका॑
मञ्ज्ञजानत्त्वष्ट्टुरव्वा॑ंजायतऽआशुरश्वं॑÷ ॥ त्वष्ट्टेदंव्विश्वम्भुव॑नञ्ज
जानबहो॑श्कुर्त्तारं॑मिहयंक्षिहोतः॑ ॥९॥ अश्वो॑घृतेनं॑ ॥ अश्वो॑घृ
तेनत्त्मन्न्यासमं॑क्तुऽउप॑देवाँ २॥ऽऋतुशः॑पाथं॑ऽएतु ॥ वनस्प्प

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तिर्द्दे॑वलोकम्प्र॑जानन्नाग्निर्नाहुव्यास्वं॑दितानि॑व्वक्षत् ॥ १० ॥
प्रजाप॑तेस्तप॑सा । वावृधानश्सद्योजातोद॑धिषेयज्ञम॑ग्ने ॥
स्वाहा॑कृतेनहुविषा॑पुरोगायाहिसाद्ध्याहुविर॑दन्तुदेवाः ॥ ११ ॥
[११-१] यदक्र॑न्दः । प्रथमञ्जाय॑मानऽउद्यन्त्स॑मुद्रादु
तवापुरीषात् ॥ श्येनस्य॑पक्षाह॑रिणस्य॑बाहूऽउ॑पस्तुत्त्यम्महि॑
जातन्ते॑ऽअर्व्वन् ॥ १२ ॥ यमेन॑दत्तम् ॥ यमेन॑दत्तन्त्रितऽ ६३७
ए॑नमायुनगिन्द्र॑ऽएणम्प्रथमोऽअद्ध्य॑तिष्ठत् ॥ गन्धर्व्वोऽअ॑स्य

१ इन्द्रऽएणम् । अत्र असमानपदत्वेनाप्राप्तौ "निषण्णाय रथवाहणमिन्द्रऽएणम्०" (शु. य. प्रा. ३ अ. ८७ सू.) इत्यनेन णत्वं निपात्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तिर्द्दैवलोकम्प्रंजानन्नग्निनांहुव्यास्वंदितानिंव्वक्षत् ॥ १० ॥
प्रजापंतेस्त्तपंसा । वावृधानश्सद्योजातोदंधिषेयुज्ज्ञमंग्ग्ने ॥
स्वाहांकृतेनहुविषांपुरोगायाहिसाद्ध्याहुविरंदन्तुदेवाः ॥ ११ ॥
[११-१] यदक्रंन्दः । प्प्रथमञ्जायंमानऽउद्यन्त्संमुद्द्रादु
तवापुरीषात् ॥ श्येनस्यंपक्षाहंरिणस्यंबाहूऽउंपस्त्तुत्त्यम्महिं
जातन्तेंऽअर्व्वन् ॥ १२ ॥ यमेनंदुत्तम् ॥ यमेनंदुत्तान्त्रितऽ ६१७
एंनमायुनगिंन्द्रंऽएणम्प्रथमोऽअद्ध्यंतिष्ठत् ॥ गुन्धर्व्वोंऽअंस्य

---

१ इन्द्रऽएणम् । अत्र असमानपदत्वेनाप्राप्तौ "निषण्णाय रथवाहणमिन्द्रऽएणम्०" (शु. य. प्रा. ३ अ. ८७ सू.) इत्यनेन णत्वं निपात्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रशुनामंगृभ्ण्णात्त्सूरादश्वंव्वसवोनिरंतष्ट ॥ १३ ॥ असियु
मः ॥ असियमोऽअस्यांदित्त्योऽअंर्व्वन्नासित्त्रितोगुह्येनव्व्रतेनं ॥
असिसोमेनसमयाव्विपृंक्क्तऽआहुस्त्तेत्त्रीणिंदिविबन्धंनानि
॥ १४ ॥ त्रीणिंते ॥ त्रीणितऽआहुर्द्दिविबन्धंनानित्त्रीण्ण्यप्सु
त्रीण्ण्यन्तःसंमुद्द्रे ॥ उतेवंमेव्वरुणश्छन्त्स्यर्व्वन्न्यत्त्रांतऽआहुः
परंमञ्जनित्त्रंम् ॥ १५ ॥ इमातेंव्वाजिन् ॥ इमातेंव्वाजिन्नव
मार्ज्जनानीमाशफानांᳫंसनितुर्न्निधानां ॥ अत्त्रांतेभद्द्रारंश

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नाऽअंपश्श्यमृतस्युयाऽआंभिरक्क्षंन्तिगोपाः ॥१६॥ आत्क्मा
नंन्ते ॥ आत्क्मानंन्तेमनंसाराद्ंजानामवोदिवापतयंन्तम्प
तङ्गम् ॥ शिरोंऽअपश्श्यम्पथिभिं÷सुगेभिंररेणुभिर्ज्जेंहंमान
म्पतत्रि ॥ १७ ॥ अंत्रांते[1] । रूपमुंत्तममंपश्श्याज्जिगींषमा
णमिषऽआपदेगोः ॥ यदातेमर्त्तोंऽअनुभोगमानडादिद्ग्रसिं
ष्ठऽओषंधीरजीगः ॥ १८ ॥ अनुंत्त्वा ॥ अनुंत्त्वारथोऽअनु
मर्य्योंऽअर्व्वंन्ननुगावोऽनुभगं÷कनीनांम् ॥ अनुव्व्रातांसस्त्तवं

१ अत्रांते । अत्र ते परे अत्रशब्दस्य ह्रस्वाकारस्य "पूष्णो जहीमस्तेष्वत्र" (शु. य. प्रा. ३ अ. १२१ सू.) इत्यनेन दीर्घः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सक्ख्यमीयुरनुंदेवामंमिरेव्वीर्य्यन्ते ॥ १९ ॥ हिरंण्ण्यशृङ्गो
यं÷ ॥ हिरंण्ण्यशृङ्गोयोऽअस्यपादामनोजवाऽअवंरऽइन्द्रंऽ
आसीत् ॥ देवाऽइदंस्यहविरद्यंमायन्न्योऽअर्व्वन्तम्प्रथमोऽअ
द्ध्यतिंष्ठत् ॥ २० ॥ ईर्म्मान्तांसःसिलिंकमद्ध्यमासः ॥ ईर्म्मा
न्तांसःसिलिंकमद्ध्यमासःसꣳशूरंणासोदिव्यासोऽअत्त्यां÷ ॥
हꣳसाऽइवश्श्रेणिशोयंतन्तेयदाक्षिषुर्दिव्व्यमज्ज्ममश्श्वां÷ ॥ ७८ ॥
॥ २१ ॥ तवशरीरम् ॥ तवशरीरम्पतयिष्ण्वर्व्वन्तवंचित्तं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्वातंऽइवध्र[1]जीमान् ॥ तवशृङ्गाणिविष्ठितापुरुत्त्रारण्ण्येषुजर्ब्भु
राणाचरन्ति ॥२२॥ उपप्र ॥ उपप्प्रागाच्छसनंव्वाज्ज्यर्व्वादेवद्द्री
चामनंसादीद्ध्यानः ॥ अजःपुरोनीयतेनाभिरस्यानुपश्चात्त्कव
योयन्तिरेभाः ॥२३॥ उपप्र ॥ उपप्प्रागात्त्परमँय्यत्त्सधस्त्थम
र्व्वाँ २ ॥ऽअच्छापितरम्मातरञ्च ॥ अद्यादेवाञ्जुष्टतमोहिगम्म्याऽ
अथाशास्त्तेदाशुषेव्वार्य्याणि ॥२४॥ [१३-२] सामिद्धोऽअद्य । ७०१

---

१ ध्रजिमान् । अत्र "शृणुतत्विषिध्रजिभयत पिबेतस्सतिष्ठरक्षा मकारे" (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे परे एते दीर्घा भवन्ति तेन दीर्घे ध्रजीमान् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनुंषोदुरोणेदेवोदेवान्यंजसिजातवेदः ॥ आचुव्वहंमित्रमह
श्चिकित्त्वान्त्वन्दूतश्क्कविरंसिप्प्रचेताः ॥२५॥ तनूंनपात्त्पथः ॥
तनूंनपात्त्पथऽऋतस्ययानान्मद्ध्वांसमञ्ज्ञन्त्स्वंदयासुजिह्व ॥ म
न्मांनिधीभिरुतयज्ज्ञमृन्धन्देंवत्राचंकृणुह्यध्वरन्नंः ॥२६॥ नरा
शꣳसंस्यमाहिमानम् ॥ नराशꣳसंस्यमाहिमानंमेषामुपंस्त्तोषा
मयजतस्यंयज्ज्ञैः ॥ येसुक्क्रतंवःशुचंयोधियन्धाःस्वदंन्तिदेवा
ऽउभयांनिहव्या ॥२७॥ आजुह्वांनऽईड्यंः ॥ आजुह्वांनऽ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ईड्योवन्द्यश्चायांह्यग्नेवसुंभिःसजोषाः॥ त्वन्देवानांमासियह्व
होतासऽएनान्यक्षीषितोयजीयान्॥२८॥ प्राचीनम्बर्हिः प्प्र
दिशांपृथिव्यावस्तोरस्यावृज्यतेऽअग्ग्रेऽअह्नाम्॥ व्युप्प्रथतेवि
तरंवरीयोदेवेब्भ्योऽअदितयेस्योनम्॥२९॥ व्यचस्वतीरुर्विया।
श्रयन्ताम्पतिब्भ्योनजनयःशुम्भमानाः॥ देवीर्द्वारोबृहतीर्वि
विश्वमिन्वादेवेब्भ्योभवतसुप्प्रायणाः॥३०॥ ऽआसुष्वयन्ती। य
जतेऽउपाकेऽउषासानक्ताःसदतान्नियोनौ॥ दिव्येयोषणेबृहती ७०३

सं. ५२

१ उपाकेऽउषासा। अत्र एकारात्परस्य उष इत्यस्य ह्रस्वाकारस्य "उषसहोभिर्नक्के०" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेन दीर्घाकारः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुरुक्मेऽअधिश्रियंꣳशुक्रपिशन्दधांने॥३१॥दैव्याहोतारा।
प्प्रथमासुवाचामिमांनायज्ञम्मनुषोयजंद्ध्यै॥ प्रचोदयन्ताव्वि
दथेषुकारूप्प्राचीनञ्ज्योतिःप्प्रदिशांदिशन्ता॥३२॥ आनः॥
आनोयज्ञम्भारतीतूयमेत्त्विडामनुष्ष्वदिहचेतयन्ती॥तिस्रो
देवीर्ब्बर्हिरेदꣳस्योनꣳसरस्वतीस्वपसःसदन्तु॥३३॥ यऽइमे।
द्यावापृथिवीजनित्रीरूपैरपिꣳशद्भुवनानिव्विश्वा॥ तमद्यहोत ॥६०॥

१ अद्यहोतरि। अत्र "अद्य तं हकारचकारभवतवृणीमहेदेवेषु" (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन हकारे परे दीर्घे प्राप्ते "नहोतरि" (शु. य. प्रा. ३ अ. ११६ सू.) इत्यनेन निषेधान्न दीर्घः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रिषितोयजींयान्देवन्त्वष्टांरमिहयंक्षिविद्वान् ॥ ३४ ॥ उपाव
सृजत्क्मन्न्यां । समञ्जन्देवानाम्पाथंऽऋतुथाहवींᳬषिं ॥ वन
स्प्पतिं÷शमितादेवोऽअग्निश्स्वदंन्तुहव्यम्मधुंनाघृतेनं॥३५॥
सद्योजातश्॥सद्योजातोव्व्यंमिमीतयज्ज्ञमग्निर्द्देवानांमभवत्पु
रोगाश् ॥ अस्यहोतुं÷प्प्रदिश्यृतस्यंव्वाचिस्वाहांकृतᳬहविरंद
न्तुदेवाश् ॥३६॥ [१२-३] केतुङ्कृण्णवन् ॥ केतुङ्कृण्णवन्नंकेत ७०५

१ वनस्प्पतिः । अत्र "पत्यौ च सकारेण" (शु. य. प्रा. ३ अ. ५० सू.) इत्यनेन पतिशब्दे परे वनशब्दः सकारेण व्यवधीयते । तत ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ३ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वे रूपम् । "प्रकृत्या कपयोः खफयोश्च" (शु. य. प्रा. ३ अ. ११ सू.) इत्यस्यापवादोऽयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेपेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥३७॥ जीमूतं
स्येवभवति ॥ जीमूतंस्येवभवतिप्प्रतीकँय्यद्वर्म्मीयातिसमदा
मुपस्थे ॥ अनाविद्धयातन्न्वाजयत्त्वꣳसत्त्वाव्वर्म्मणोमहिमा
पिपर्त्तु ॥ ३८ ॥ धन्न्वनागाः ॥ धन्न्वनागाधन्न्वनाजिञ्जयेमध
न्न्वनातीव्राःसमदोजयेम ॥ धनुःशत्रोरपकामङ्कृणोतिधन्न्व
नासर्व्वाःप्प्रदिशोजयेम ॥ ३९ ॥ व्वक्क्ष्यन्तीवेत् ॥ व्वक्क्ष्यन्ती ॥ ८१ ॥
वेदागनीगन्तिकर्ण्णम्प्प्रियꣳसखायम्परिषस्वजाना ॥ योषेव ७०६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिङ्क्ते॒ब्वितु॒ताधि॒धन्व॒ज्ज्या॒ऽइ॒य॒ᳬसमं॑नेपा॒रयं॑न्ती ॥ ४० ॥ तेऽ
आ॒चरं॑न्ती ॥ तेऽआ॒चरं॑न्ती॒सम॑नेव॒योषां॒मा॒तेव॒पु॒त्रम्बि॑भृता
मु॒पस्थे॑ ॥ अप॒शत्रू॑न्विध्यता॒ᳬसंविदा॒नेऽआर्त्नी॑ऽइ॒मेवि॑
ष्फु॒रन्ती॑ऽअ॒मित्रा॑न् ॥ ४१ ॥ ब॒ह्वी॒नाम्पि॒ता । ब॒हु॒रस्य॒पु॒त्र
श्चि॒श्चाकृ॑णोति॒सम॑नाव॒गत्य॑ ॥ इ॒षु॒धिः॒सङ्का॒ᳬपृत॑नाश्च॒सर्वाः॑
पृ॒ष्ठेनिन॑द्धोजयति॒प्रसू॑तᳬ ॥ ४२ ॥ रथे॑तिष्ठ॑न् ॥ रथे॑तिष्ठ॑न्नय ७०७
ति॒वा॒जिनः॑पु॒रोय॒त्र॑यत्रका॒मय॑तेसुषा॒र॒थिः ॥ अ॒भीशू॑नाम्म

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिमानंम्पनायतमनंः पश्चादनुंयच्छन्तिरश्म्मयंः ॥ ४३ ॥
तीव्रान्घोषांन् ॥ तीव्रान्घोषांन्कृण्वतेवृषंपाणयोश्वारथेभिः
सहवाजयन्तः ॥ अवक्रामन्तःप्रपदैरमित्रान्क्षिणन्तिशत्रूँ
१॥ऽरनंपव्ययन्तः ॥४४॥ रथवाहणꣳहविः ॥ [१]रथवाहणꣳ
हविरंस्यनामसत्रायुंधन्निहिंतमस्यवर्म्मं ॥ तत्रारथमुपंशग्ग्मꣳ
संदेमाविश्वाहांवयꣳसुमनस्यमानाः ॥ ४५ ॥ स्वादुषꣳसदः

१ रथवाहणः । अत्र थकारेण व्यवधानाण्णत्वाप्राप्तौ "निषण्णाय रथवाहणमिन्द्रऽएणम्परिणीयते समिन्द्रणऽउरुष्याणो रक्षाणः पूणःपुणःपूणासत्त्या स्वर्णास्थूरिणौप्रणऽआयूंषि" (शु. य. प्रा. ३ अ. ८७ क.) इत्यनेन णत्वं निपात्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पितरः ॥ स्वादुषछंसदः पितरोव्वयोधाःकृच्छ्रेश्रितः[1]शक्ती

वन्तोगभीराः ॥ चित्रसेनाऽइषुबलाऽअमृद्ध्राःसतोवीराऽउर

वोव्व्रातसाहाः ॥ ४६ ॥ ब्राह्मणासःपितरः ॥ ब्राह्मणासः

पितरःसोम्म्यासःशिवेनोद्यावापृथिवीऽअनेहसा ॥ पूषानः

पातुदुरितादृतावृधो[2]रक्षामाकिर्न्नोऽअघशंसऽईशत॥ ४७ ॥

सुपर्णंव्वस्ते । मृगोऽअस्यादन्तोगोभिःसन्नद्धापततिप्प्रसूता ॥ ७०१

---

१ शक्तीवन्तः । अत्र "अश्वरश्मिमतिसुमति०" (शु. य. प्रा. ३ अ. ९८ क.) इत्यनेन वन्त इति वकारे परे शक्तिशब्दस्य ह्रस्वेकारस्य दीर्घेकारः ।
२ रक्षामा । अत्र "शृणुतत्विपिध्रजि" (शु. य. प्रा. ३ अ. १११ सू.) इत्यनेन माकारे परे रक्षशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । तेन रक्षामा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[1]यत्रानरꣳसञ्चविचद्द्रवन्तितत्रास्म्मब्भ्यमिषवꣳशर्म्मयꣳसन्
॥४८॥ ऋजीतेपरि। वृङ्ग्धिनोऽश्म्माभवतुनस्तनूः ॥ सोमोऽ
अधिब्रवीतुनोदितिꣳशर्म्मयच्छतु ॥ ४९ ॥ आजङ्घन्ति ॥
आजङ्घन्तिसान्वेषाञ्जघनाँ२॥ऽउपजिघ्नते ॥ अश्वाजनिप्प्र
चेतसोश्वान्त्समत्त्सुचोदय ॥ ५० ॥ अहिरिवभोगैः । पर्य्ये
तिबाहुञ्ज्यायाहेतिम्परिबाधमानः ॥ हस्तघ्नोविश्वावयुना
निविद्वान्पुमान्पुमांꣳसम्परिपातुविश्वतः ॥ ५१ ॥ वन

१ यत्रानरः । अत्र "नरस्सप्तऽऋषीन्नस्तऽआहुर्नियुङ्क्ष्विष्पु यत्र" (शु. य. प्रा. ३ अ. १२२ सू.) इत्यनेनात्र नरपरे यत्रशब्दाकारस्य दीर्घः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्प्पतेव्वीड्ड्ङ्गः ॥ व्वनंस्प्पतेव्वीड्ड्ङ्गोहिभूयाऽअस्म्मत्त्संखाप्प्र
तरणःसुवीरंः ॥ गोभिःसन्नंद्धोऽअसिव्वीडयंस्वास्त्थाता
तेंजयतुजेत्त्वांनि ॥ ५२ ॥ दिवंःपृथिव्याः ॥ दिवः
पृथिव्याःपर्य्योंजऽउद्धृतंव्वनस्प्पातिंब्भ्युःपर्य्याभृंतःसहंः ॥
अपामोज्ज्मानम्पारिगोभिरावृंतामिन्द्रंस्युव्वज्ज्रंङ्हविषारथँस्स
ज ॥ ५३ ॥ इन्द्रंस्युव्वज्ज्रंः ॥ इन्द्रंस्युव्वज्ज्रोंमरुतामनीक

१ दिवःपृथिव्याः । इत्यत्र "दिवोऽककुत्पृथिव्योः" (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेनाककुत्पृथिव्योः सत्वनिषेधाद्विसर्जनीय एव नान्यत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म्मित्रस्यगर्ब्भोव्वरुणस्यनाभिः ॥ [1]सेमान्नोहव्यदातिञ्जुषाणो
देवरथम्प्प्रतिहव्यागृभाय ॥ ५४ ॥ उपश्श्वासय । पृथिवीमुत
द्याम्पुरुत्त्रातेमनुताव्विष्ठितञ्जगत् ॥ सदुन्दुभेसजूरिन्द्रेणदेवै
र्दूराद्दवीयोऽअपसेधशत्त्रून् ॥ ५५ ॥ आक्क्रन्दय ॥ आक्क्रन्द
यबलमोजोनऽआधा[2]निष्टनिहिदुरिताबाधमानः ॥ अपप्प्रो

१ सः इमाम् इति पदद्वयम् । अत्र "सऽओषधीमयोः" (शु. य. प्रा. ३ अ. १५ सू.) इत्यनेन इमे परे सपदघटितस्य विसर्जनीयस्य "लोपे च गुणे सेमाम्" इति सिद्ध्यति । २ निष्टनिहि । अत्र "नेः स्त्यास्तनोः" (शु. य. प्रा. ३ अ. ७० सू.) नेरुपसर्गात्परस्य स्त्यास्तनयोः सकारस्य षकारः । इति स्तनोः सकारस्य षत्वे ष्टुत्वे "ऊष्मान्तस्थाभ्यश्च स्पर्शः"। (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

थदुन्दुभेदुच्छुनाऽइतऽइन्द्रंस्यमुष्टिरंसिव्वीडयंस्व ॥ ५६ ॥
आमूः ॥ आमूरंजप्प्रत्त्यावंर्त्तयेमाःकेतुमद्दुन्दुभिर्व्वावदी
ति ॥ समश्श्वंपण्ण्र्णाश्श्चरंन्तिनोनरोस्म्माकंमिन्द्ररंथिनौंजयन्तु
॥ ५७ ॥ आग्ग्नेयःकृष्ण्णग्ग्रीवः । सारस्वतीमेषीबब्भ्रुः
सौम्म्यःपौष्ण्णःश्श्यामःशितिपृष्ठोबार्हस्पत्त्यःशिल्प्पोवैश्श्व ७१३

१ रथिनो जयन्तु । अत्र "ऋषरेभ्यः°" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन "स्वरयवहकपैश्च" (शु. य. प्रा. ३ अ. ८६ सू.) इत्यनेनैतैर्व्यवधान-विहितस्य णत्वस्य विहितारिक्तशथकारव्यवधानेनाप्राप्तावपि "शिलिसिवर्गमध्यमव्यवहितोऽपि" (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन प्रकृतिभावो विधीयते। इदं शिष्यबुद्धिव्युत्पादनार्थम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवऽऐन्द्रोरुणोमारुतश्कुल्म्माषंऽऐन्द्राग्ग्नश्सꣳहितोधोरामꣳ
सावित्रोव्वारुणश्कृष्ण्णऽएकशितिपात्त्पेत्त्वं÷ ॥ ५८ ॥ अग्ग्न
येनीकवते ॥ अग्ग्नयेनीकवतेरोहिताञ्जिरनड्वानधोरामौसावि
त्रौपौष्ण्णौरंजतनाभीव्वैश्वदेवौपिशङ्गौतूपरौमारुतश्कुल्म्माषं
ऽआग्ग्नेयश्कृष्ण्णोजश्सारस्वतीमेषीव्वारुणश्पेत्त्वं÷ ॥ ५९ ॥
अग्ग्नयेगायत्रायं । त्रिवृतेराथन्तरायाष्टाकपालऽइन्द्रायत्रैष्टु
भायपञ्चदशायबार्हतायैकादशकपालोव्विश्वेब्भ्योदेवेब्भ्योजा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गंतेभ्म्यꣳसप्तदशेभ्म्यो॑ व्वैरूपेभ्म्योद्वादशकपालो मित्रावरुणा

भ्म्यामानुष्टुभाभ्म्यामेकविꣳशाभ्म्यां व्वैराजाभ्म्याम्पयस्याबृह

स्पतये पाङ्क्ताय त्रिणवाय शाक्वराय चरुः सवित्रऽऔष्णिहाय

त्रयस्त्रिꣳशाय रैवताय द्वादशकपालꣳ प्राजापत्यश्चरुरदित्यै व्वि

ष्णुपत्न्यै चरुरग्नये व्वैश्वानराय द्वादशकपालोनुमत्याऽअष्टा

कपालꣳ ॥६०॥ [२४-४] ॥ इतिश्रीवाजसनेयसंहितायामेको- ७१९

नत्रिंशोऽध्यायः ॥२९॥ श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्र-

सं. ५४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म् ॥ देवसवितः षट्, तपसेकौलालꣳषोडश, द्वौ द्वाविꣳशतिः ॥
[अ. ३० मं. २२ अ. २] हरिःॐ ॥ देवसवितः ॥ देवंसवितः
प्प्रसुवयज्ज्ञम्प्रसुवयज्ज्ञपंतिम्भगाय ॥ दिव्योगंन्धर्व्वःकेतपूः
केतन्नःपुनातुव्वाचस्प्पातिर्व्वाचंन्नःस्वदतु ॥ १ ॥ तत्त्संवितुः ॥
तत्त्संवितुर्व्वरेण्ण्यम्भर्ग्गोदेवस्यंधीमहि ॥ धियोयोनंःप्प्रचो
दयात् ॥ २ ॥ व्विश्वानिदेव । सवितर्द्दुरितानिपरासुव ॥
यद्भद्रन्तन्नऽआसुव ॥ ३ ॥ व्विभक्क्तारꣳहवामहे ॥ व्विभ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्त्कारं॑ हवामहे॒ व्वसो॑श्चि॒त्रस्य॒ राधं॑सः ॥ स॒वि॒तारं॒न्नृचक्क्षं॑सम् ॥४॥ ब्रह्मं॑णे ब्राह्म॒णम् ॥ ब्रह्मं॑णे ब्राह्म॒णङ्क्ष॒त्राय॑ राज॒न्यम्म॒रुद्भ्यो॒ व्वैश्श्यन्तप॑से शू॒द्रन्तम॑से॒ तस्क्करं॑न्नार॒कायं॑ व्वीर॒हणं॑म्पा॒प्मने॑ क्क्ली॒बमा॑क्क्र॒याया॑ऽअयो॒गूङ्कामा॑य पुँश्च॒लूमति॑क्क्रु॒ष्टाय मा॒ग॒धम् ॥ ५ ॥ नृत्ताय॑ सू॒तम् ॥ नृत्ताय॑ सू॒तङ्गी॒ताय॑ शैलू॒षन्धर्म्मा॑य सभाच॒रन्न॒रिष्ठा॑यै भीम॒लन्न॒र्म्माय॑ रे॒भं॑ हसा॑य॒ कारि॑मान॒न्दाय॑ स्त्रीष॒खम्प्र॒मदे॑ कुमारीपु॒त्रम्मे॒धायै॑ रथका॒रन्धैर्य्या॑य॒ तक्क्षा॑

७१७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

णम् ॥ ६ ॥ [६-१] तपंसेकौलालम् ॥ तपंसेकौलालम्मा
यायैकुम्मारँ॑रूपायंमणिकारँ॑शुभेव्वपँ॑शंरँ॑ध्यायाऽइषुका
रँ॑हेत्त्यैधंनुष्ककारङ्कर्म्मणेज्ज्याकारन्दिष्टायंरज्जुसर्ज्जम्मृत्त्यवे
मृगयुमन्तंकायश्श्वनिनंम् ॥ ७ ॥ नदीब्भ्यंः पौञ्जिष्ठम् ॥
नदीब्भ्यंः पौञ्जिष्ठमृक्षीकांब्भ्योनैषांदम्पुरुषव्व्याग्घ्रायंदुर्म्मंदं
ङ्गन्धर्व्वाप्प्सरोब्भ्योव्व्रात्त्यम्प्रयुग्ग्भ्यऽउन्न्मंत्तँ॑सर्प्पदेवजने
ब्भ्योप्प्रंतिपदमयैब्भ्यःकितवमीर्र्य्यतांयाऽअकिंतवम्पिशाचे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भ्यौबिदलकारीꣳयातुधानेभ्यःकण्टकीकारीम् ॥८॥ सन्ध
येजारम् ॥ सन्धयेजारङ्गेहायोपपतिमार्त्यैपरिवित्तन्निर्ऋत्यैप
रिविविदानमराद्ध्याऽएदिधिषुःपतिन्निष्कृत्त्यैपेशस्कारीꣳ
सञ्ज्ञानायस्मरकारीम्प्रकामोद्यायोपसदंवर्णायानुरुधम्ब
लायोपदाम् ॥९॥ उत्सादेभ्यःकुब्जम् ॥ उत्सादेभ्यःकुब्ज
म्प्रमुदेवामनन्द्वार्भ्यःस्रामꣳस्वप्नायान्धमधर्मायबधिरम्प ः ७११
वित्रायभिषजम्प्रज्ञानायनक्षत्रदर्शमाशिक्षायैप्रश्निनमु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पशिक्षायांऽअभिप्प्रश्निनंम्मुर्यादांयैप्प्रश्नविवाकम् ॥१०॥
अम्मैंब्भ्योहस्त्तिपम् ॥ अम्मैंब्भ्योहास्त्तिपञ्जवायाश्श्वपम्पुष्ट्यै
गोपालंव्वीर्य्यायाविपालन्तेजंसेजपालमिरांयैकीनाशंङ्कीलालं
यसुराकारम्भुद्रायंगृहपꣳश्श्रेयंसेवित्तधमाद्ध्यंक्ष्यायानुक्क्ष
त्तारंम् ॥ ११ ॥ भायैंदार्व्वाहारम् ॥ भायैंदार्व्वाहारम्प्रभायांऽअ
ग्नयेधम्म्रदध्नस्यंव्विष्टपांयाभिषेक्क्तारंव्वर्षिष्ठायनाकांयपरिवेष्टा
रंन्देवलोकायंपेशितारंम्मनुष्ष्यलोकायंप्प्रकरितारꣳसर्व्वैब्भ्यो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लोकेब्भ्यंऽउपसेक्त्तारमवंऽऋत्यैव्वधायोपमन्थितारम्मेधांय

व्वासः[1] पल्प्पुलीम्प्रंकामायंरजयित्त्रीम् ॥ १२ ॥ ऋतयेस्त्तेनहृ

दयम् ॥ ऋतयेस्त्तेनहृदयंव्वैरहत्त्यायपिशुनंव्विविक्त्त्यैक्ष

त्तारमौपद्रष्ट्यायानुक्षत्तारम्बलायानुचरम्भूम्नेपरिष्कन्

न्दम्प्रियायप्रियवादिनमरिष्ट्याऽअश्वसादंस्वर्गायलोकाय

भागदुघंव्वर्षिष्ठायनाकायपरिवेष्टारम् ॥ १३ ॥ मन्यवेयस्ता ७२१

---

१ वासः . पल्पूलीम् । अत्र "समानपदे" (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन षकारे प्राप्ते "वाजपतिर्वासऽएदिधिपुरन्त. र्शश्न्येनान्तः पार्ष्ण्यमिति च" (शु. य. प्रा. ३ अ. ३८ सू.) इति सूत्रेण वासशब्दघटितविसर्जनीयस्य षकारनिषेधः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लोकेब्भ्यंऽउपसेक्त्तारमवंऽऋत्त्यैव्वधायोपमन्थितारम्मेधांय
[1]व्वांसःपल्प्पूलीम्प्रंकामायंरजयित्त्रीम् ॥ १२ ॥ ऋतयेंस्त्तेनहं
दयम् ॥ ऋतयेंस्त्तेनहंदयंव्वैरंहत्त्यायापिशुनंव्विविंक्त्त्यैक्क्ष
त्तारमौपंद्रष्ट्यायानुक्क्षत्तारम्बलांयानुचरम्भूम्म्नेपंरिष्क्क
न्दम्प्रियायंप्प्रियवादिनमरिंष्ट्याऽअश्वसादꣳस्वर्ग्गायंलोकायं
भागदुघंव्वर्षिंष्ठायनाकांयपरिवेष्टारंम् ॥ १३ ॥ मन्न्यवेंयस्त्ता ७२१

---

१ वासः . पल्पूलीम् । अत्र "समानपदे" (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन षकारे प्राप्ते "वाजपतिर्वासऽएदिधिषुरन्त . र्शन्येनान्तः पाङ्क्र्यमिति च" (शु. य. प्रा. ३ अ. ३८ सू.) इति सूत्रेण वासशब्दघटितविसर्जनीयस्य षकारनिषेधः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पम् ॥ मन्न्यवेंयस्त्तापङ्क्रोधांयनिसरँऽयोगांययोक्क्तारुङ्शोका
याभिसर्त्तारुङ्क्षेमांयव्विमोक्क्तारमुत्कूलनिकूलेब्भ्यस्त्रिष्ठिनंव्व
पुषेमानस्कृतꣳशीलांयाञ्जनीकारीन्निर्ऋत्त्यैकोशकारीँऽयमा
यासूम् ॥ १४ ॥ यमायंयमसूम् ॥ यमायंयमसूमथर्व्व
ब्भ्योवंतोकाꣳसंवत्त्सरायंपर्य्यायिणीम्परिवत्त्सरायाविंजाता
मिदावत्त्सरायातीत्त्वरीमिद्वत्त्सरायातिष्क्कद्वरींव्वत्त्सरायाव्वि
जंर्ज्जराꣳसंवत्त्सरायपलिक्क्नीमृभुब्भ्योंजिनसन्धꣳसाद्ध्येब्भ्यं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्चर्म्मम्न्नम्[1] ॥ १५ ॥ सरोंब्भ्योधैवरम् ॥ सरोंब्भ्योधैवरमु

पस्त्थावंराब्भ्योदाशंव्वैशन्ताब्भ्योंबैन्दन्नड्व्वलाब्भ्यःशौष्क्कं

लम्पारायंमार्ग्गारमंवारायंकेवर्त्तंन्तीर्त्थेब्भ्यंऽआन्दंव्विषंमे

ब्भ्योमैनालꣳस्वनेब्भ्यःपर्ण्णकङ्गुहाब्भ्यःकिरांतꣳसानुब्भ्यो

जम्भंकुम्पर्व्वतेब्भ्यःकिम्पूरुषम् ॥ १६ ॥ बीभत्त्सायैपौ

ल्क्कसम् ॥ बीभत्त्सायैपौल्क्कसंव्वर्णायैहिरण्यकारन्तुला ७२३

१ चर्म्मम्नम् । अत्र "ऋषरेभ्यो०" (शु.य.प्रा.३अ.८५सू.) इत्यनेन समानपदे प्राप्तस्य णत्वस्य "इन्द्राग्नी०" (शु.य.प्रा.३अ.९३सू.) इत्यनेन निषेधान्न णत्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यैव्वाणिजम्पंश्चादोषायंग्ग्लाविनंव्विश्वेब्भ्योभूतेब्भ्यंः सिद्ध्म
लम्भूत्त्यैजागरणमभूत्त्यैस्वपनमात्त्यैंजनवादिनंव्यृद्ध्याअपग
ल्भꣳसंꣳशरायंप्प्रच्छिदम् ॥ १७ ॥ अक्क्षराजायंकित
वम् ॥ अक्क्षराजायंकितवङ्कृतायांदिनवदर्शन्त्रेतायैकल्प्पिनं
न्द्वापरायाधिकल्प्पिनंमास्क्कन्दायंसभास्त्थाणुम्मृत्त्यवेगो
व्यच्छमन्तंकायगोघातङ्क्षुधेयोगांव्विकृन्तन्तम्भिक्क्षमाणऽउ ॥ १० ॥
पतिष्ट्ठंतिदुष्कृतायचरंकाचार्य्यम्पाप्प्मनेसैलगम् ॥ १८ ॥ प्रति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रुत्कायाऽअर्त्तनम् ॥ प्रतिश्रुत्कायाऽअर्त्तनङ्घोषायभषम
न्तायबहुवादिनमनन्तायमूकꣳशब्दायाडम्बराघातम्[1]महꣳसेवी
णावादङ्क्रोशायतूणवध्ममवरस्परायशङ्खध्मंवनायवनप[2]
मन्यतौरण्यायदावपम् ॥१९॥ नर्म्मायपुंश्चलूम् ॥ नर्म्मायपुंश्च
लूꣳहसायकारिꣳयादसेशाबल्याङ्ग्रामण्यङ्गणकमभिक्क्रोश

१ आडम्बराघातम् । अत्र "त आघादनाडम्बरात्" (शु.य.प्रा. ३ अ. ४८ सू.) इत्यनेनानाडम्बरात्परस्य विधानादाघातशब्दघटितस्य तकारस्य मूर्धन्यत्वं (टः) न भवति । २ अवरस्पराय । अत्र "प्रकृत्या कखयोः पफयोश्च" (शु. य. प्रा. ३ अ. ११ सू.) इति "अवरः" इत्यस्य विसर्गस्य प्रकृतिभावे प्राप्ते "ऋतावरौ च पतिपरयोः" (शु. य. प्रा. अ. ३ सू. ५०) ऋतः अवरश्च शब्दौ सकारेण व्यवधीयेते यथासंख्यं पतिपरयोः । इत्यनेनात्रावरशब्दस्य विसर्गस्य परे पदपरे सत्त्वे जाते "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वे रूपम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुन्ताम्महंसेव्वीणावादम्पाणिग्घ्नन्तूणवद्ध्मन्तान्नृत्तायान
न्दायंतलवम् ॥२०॥ अग्ग्नयेपीवानम् ॥ अग्ग्नयेपीवानम्पृथिव्यै
पीठसर्प्पिणँव्वायवेचाण्डालमन्तरिक्षायव्वꣳशनर्त्तिनंन्दिवेख
लतिꣳसूर्य्यायहर्य्यक्षन्नक्षत्रेभ्यः किर्म्मिरञ्चन्द्रमंसेकिला
समह्नेशुक्लम्पिङ्गाक्षꣳरात्र्यैकृष्णम्पिङ्गाक्षम् ॥२१॥ अथै
तान् ॥ अथैतानष्टौव्विरूपानालभतेतिंदीर्ग्घञ्चातिह्रस्वञ्चाति[1]

१ अतिस्स्थूलम्। अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ क.) इत्यनेन समानपदे स्थूलस्य सस्य षकारे प्राप्ते "अनुसन्तनोतु बृहस्पतिसुतस्य सुसमिद्धाय सुसन्दृशमभिसत्वाऽभिसंविशन्तु सुसस्यातिस्थूलं०" (शु. य. प्रा. अ. ३ सू. ८२) इत्यनेन प्रकृतिभावे न षत्वम्। तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इति थस्य द्वित्वे चर्त्वे तकारः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्थूलञ्चातिंकृशञ्चातिंशुक्लञ्चातिंकृष्णञ्चातिंकुल्वञ्चातिंलोम
शञ्च ॥ अशूद्द्राऽअब्राह्मणास्त्तेप्प्राजापत्त्याः ॥ मागधः पुँश्श्च
लीकिंतवः क्लीबोशूद्द्राऽअब्राह्मणास्त्तेप्प्राजापत्त्याः ॥ २२॥
[१६-२] इतिश्रीवाजसनेयसंहितायां त्रिंशत्तमोऽध्यायः
॥ ३० ॥ श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ सहस्र-
शीर्षा षोडशा,ञ्यः संभृतः षट्, द्वौ द्वाविꣳशतिः [अ. ३१ ७२७
मं. २२ अनु. २] ॥ हरिःॐ ॥ सहस्रशीर्षापुरुषः । सह

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्राक्षः सहस्रपात् ॥ सभूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गु
लम् ॥ १ ॥ पुरुषऽएव ॥ पुरुषएवेदꣳ सर्वँयद्भूतँयच्चभा
व्यम् ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एता
वानस्य । महिमातोज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूता
नित्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्ध्वः ॥ त्रिपादूर्ध्वऽ
उदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत् ॥ १२ ॥
त्साशनानशनेऽअभि ॥ ४ ॥ ततोविराट् ॥ ततोविराडजा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यतद्विराजोऽअधिपूरुषः ॥ सजातोऽअत्त्यरिच्यतपश्चाद्भूमि
मथोपुरः ॥५॥ तस्मांद्यज्ज्ञात् ॥ तस्मांद्यज्ज्ञात्त्सर्वहुतःसम्भृं
तम्पृषदाज्ज्यम् ॥ पशूँस्ताँश्चक्क्रेवायव्यानारण्ण्याग्ग्राम्म्या
श्चये ॥६॥ तस्मांद्यज्ज्ञात् ॥ तस्मांद्यज्ज्ञात्त्सर्वहुतऽऋचः
सामांनिजज्ज्ञिरे ॥ छन्दांऌसिजज्ज्ञिरेतस्म्माद्यजुस्त्तस्म्मांद
जायत ॥ ७ ॥ तस्मादश्श्वाः ॥ तस्म्मादश्श्वाऽअजायन्त
येकेचौभयादंतः ॥ गावौहजज्ज्ञिरेतस्म्मात्तस्म्माज्जाताऽअ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जावयं॑÷ ॥ ८ ॥ तँऽयुज्ञम् ॥ तँऽयुज्ञम्बुर्हिषिप्प्रौक्षुन्न्पुरुंष

ञ्ञातऽमंग्ग्रतः॑ ॥ तेनं॑देुवाऽअंयजन्तसाुद्ध्याऽऋषंयश्श्चये ॥ ९ ॥

यत्त्पुरुंषम् ॥ यत्त्पुरुंषुंव्व्यदं॑धुःकतिुधाव्व्यंकल्प्पयन् ॥ मुखु

ङ्किमंस्यासीुत्त्किम्बाुहूकिमुूरूपादांऽउच्च्येते ॥ १० ॥ ब्राुह्म

णोस्य ॥ ब्राुह्मणोुस्युमुखंमासीदूब्बाुहूराजुन्न्यू÷कृतः॑ ॥ ऊुरू

तदंस्युयद्वैश्श्यं÷पुद्भ्याॅंशूुद्द्रोऽअंजायत ॥ ११ ॥ चुन्द्रमा

मनंसः ॥ चुन्द्रमाुमनंसोजाुतश्श्चक्क्षोुःसूर्य्योंऽअजायत ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रोत्रांद्वायुश्च्चंप्प्राणश्च्च मुखांदुग्निरंजायत ॥ १२ ॥ नाभ्यांऽ
आसीत् ॥ नाभ्यांऽआसीदुन्तरिंक्क्षᳬशीर्ष्णोद्यौःसमंवर्त्त
त ॥ पुद्भ्याम्भूमिर्द्दिशुःश्रोत्रात्तथांलोकाँ२॥ऽअंकल्पयन्
॥ १३ ॥ यत्त्पुरुंषेण । हुविषांदेवायुज्ज्ञमतंन्वत ॥ वुसन्तो
स्यासीदाज्ज्यंङ्ग्रीष्म्मऽइुद्ध्मःशुरद्धुविः ॥ १४ ॥ सुप्तास्यां ७३१
सन् ॥ सुप्तास्यांसन्त्परिधयुस्त्रिःसुप्तसुमिधंःकृताः ॥ देवा
यद्युज्ज्ञन्तंन्वानाऽअबंध्नन्पुरुंषम्पशुम् ॥१५॥ युज्ज्ञेनंयुज्ज्ञ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

म् ॥ यज्ञेनयज्ञमयजन्तदेवास्त्तानिधर्म्माणिप्प्रथमान्न्या
सन् ॥ तेहनाकम्महिमानः सचन्तयत्रपूर्व्वेसाद्ध्याःसन्तिदेवाः
॥ १६ ॥ [१६-१] अद्भ्यःसम्भृतः । पृथिव्यैरसाच्चवि
श्वकर्म्मणःसमवर्त्तताग्ग्रे ॥ तस्यत्त्वष्टाविदधद्रूपमेतितन्म
र्त्त्यस्यदेवत्त्वमाजानमग्ग्रे ॥ १७ ॥ वेदाहम् ॥ वेदाहमेतम्पु
रुषम्महान्तमादित्त्यवर्ण्णन्तमसः[1]परस्त्तात् ॥ तमेवविदित्त्वा

१ तमसःपरस्तात् । अत्र "तमसोऽपरस्तात्" (शु. य. प्रा. ३ अ. २६ सू.) इत्यनेन विधीयमानं सत्वं न भवति तत्रापरस्तादित्युक्तत्वात् ५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तिंमृत्त्युमेंतिनान्न्यःपन्थांविद्युतेयंनाय ॥ १८ ॥ प्रजापतिं

श्चरति ॥ प्रजापतिश्चरतिगर्ब्भेंऽअन्तरजांयमानोबहुधाविजा

यते ॥ तस्ययोनिम्परिंपश्श्यान्तिधीरास्त्तास्मिन्न्हतस्त्थुर्भुवं

नानिविश्श्वा ॥१९॥ योदेवेब्भ्यं ॥ योदेवेब्भ्यंऽआतपंतियो

देवानांम्पुरोहिंतः ॥ पूर्वोयोदेवेब्भ्योंजातोनमोरुचायब्राह्मंये

॥ २० ॥ रुचम्ब्राह्मम् ॥ रुचम्ब्राह्मञ्जनयंन्तोदेवाऽअग्ग्रेत ७३३

दंब्रुवन् ॥ यस्त्त्वैवम्ब्राह्मणोविद्यात्तस्यदेवाऽअंसन्वशें ॥ २१ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीश्चं॥ श्रीश्चंतेलक्ष्मीश्चपत्क्न्यांवहारोत्रेपाश्वैंनक्क्षत्राणिरूप
मुश्चिनौघ्यात्तंम् ॥ इषण्णन्निषाणामुम्मंऽइषाणसर्व्वलोकम्मंऽ
इषाण ॥ २२ ॥ [६-२]॥ इतिश्रीवाजसनेयसंहितायामे-
कत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ श्रीवेदपुरुषाय नमः ॥ अनु-
वाकसूत्रम्॥ तदेव सप्त, द्वेनस्तन्नव, द्वौ षोडश [अ. ३२ मं.
१६ अनु. २]॥ हरिःॐ ॥ तदेव ॥ तदेवाग्निस्त्तदादित्त्यस्त्त
द्वायुस्त्तदुंचन्द्रमांᳬ ॥ तदेवशुक्क्रन्तद्ब्रह्मताऽआपᳬसप्प्रजा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पतिं ॥१॥ सर्व्वेनिमेषाः ॥ सर्व्वेनिमेषाजज्ञिरेविद्युतंपुरुषा
दधि ॥ नैनंमूर्द्धनतिर्य्यञ्चन्नमध्येपरिंजग्रभत् ॥ २ ॥ नतस्य ।
प्रतिमाऽअस्तियस्यनाममहद्यशः ॥ हिरण्यगर्भऽइत्त्येष
मामाहिंसीदित्त्येषायस्मान्नजातऽइत्त्येषः ॥ ३ ॥ एषोहं ।
देवःप्रदिशोनुसर्व्वाःपूर्व्वोहजातःसऽउगर्भेऽअन्तः ॥ सऽएव
जातःसजनिष्यमाणःप्रत्त्यङ्जनास्तिष्ठतिसर्व्वतोमुखः ॥४॥ ७३५

---

१ हिरण्यगर्भःसं० चत्वारि० ४ अ. २५ मंत्र १०।११।१२।१३। ॥ १ मामाहिंसीत्. १ अ. १२ मं. १०२ ॥ १ यस्मान्न. १ १ इंद्रश्च. १ अ. ८ मं. ३६ मं. ३७ ॥ इति प्रतीकानि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्म्मान्नजातम् ॥ यस्म्मान्नजातन्नपुराकिञ्चनैवयऽआंबभूवभुवं
नानिव्विश्वां ॥ प्रजापतिंप्प्रजयांसꣳरराणस्त्रीणिज्ज्योतीꣳ
षिसचतेसषोडशी ॥ ५ ॥ येनद्यौः ॥ येनद्यौरुग्ग्रापृथिवी
चंदृढायेनस्वःस्तभितँय्येननाकंः ॥ योऽअन्तरिंक्क्षेरजंसो
व्विमानंःकस्म्मैदेवायंहविषांव्विधेम ॥ ६ ॥ यङ्क्रन्दंसी ॥
यङ्क्रन्दंसीऽअवंसातस्तभानेऽअब्भ्यैक्क्षेंताम्मनंसारेजंमाने ॥
यत्राधिसूरऽउदितोव्विभातिकस्म्मैदेवायंहविषांव्विधेम ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आपोहयद्बृहतीर्यश्चिदापः ॥७॥ [७-१] वेनस्तत् ॥ वेन
स्तत्पश्यन्निहितङ्गुहासद्यत्रविश्वम्भवत्येकनीडम् ॥ तस्मिन्
निदँसञ्चविचैतिसर्व्वꣳसऽओतꣳप्रोतश्चविभूःप्रजासु ॥८॥
प्रतत् ॥ प्रतद्वोचेदमृतन्नुविद्वान्गन्धर्व्वोधामविभृतङ्गुहासत् ॥
त्रीणिपदानिनिहितागुहास्ययस्तानिवेदसपितुःपितासत् ॥९॥ ७३७
सनः ॥ सनोबन्धुर्ज्जनितासविधाताधामानिवेदभुवनानि

१ आपोह. १ यश्चित्. १ अ. २८ मं. २५ मं. २६ इति प्रतीके ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विश्वा ॥ यत्रदेवाऽअमृतमानशानास्तृतीयेधामन्नध्यैरयन्त
॥ १० ॥ परीत्यभूतानि । परीत्यलोकान्परीत्यसर्व्वाःप्प्रदि
शोदिशश्च ॥ उपस्थायप्प्रथमजामृतस्यात्मनात्मानम
भिसंविवेश ॥ ११ ॥ परिद्यावापृथिवी । सद्यऽइत्त्वापरिलो
कान्परिदिशःपरिस्वः ॥ ऋतस्यतन्तुंव्विततंव्विचृत्त्यतदपश्श्य
त्तदभवत्तदासीत् ॥ १२ ॥ सदसस्पतिम् ॥ सदसस्पति
मद्भुतम्प्रियमिन्द्रस्यकाम्म्यम् ॥ सनिम्मेधामयासिषꣳस्वाहा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ १३ ॥ याम्मेधाम् ॥ याम्मेधान्देवगणाः पितरश्श्चोपासंते ॥
तयामामद्यमेधयाग्नेमेधाविनङ्कुरुस्वाहा ॥ १४ ॥ मेधाम्मे ॥
मेधाम्मेव्वरुणोददातुमेधामग्निः प्रजापतिः ॥ मेधामिन्द्रश्च
व्वायुश्चमेधान्धातादंदातुमेस्वाहा ॥ १५ ॥ इदम्मे ॥ इदम्मे
ब्रह्मचक्क्षत्रञ्चोभेश्श्रियंमश्नुताम् ॥ मयिदेवादंधतुश्रियमुत्त
मान्तस्यैतेस्वाहा ॥ १६ ॥ [९-२] ॥ इतिश्रीवाजसनेय- ७३५
सं. ५६ संहितायां द्वात्रिंशोऽध्यायः ॥ ३२ ॥ श्रीवेदपुरुषाय नमः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि. ॥९८॥ अनुवाकसूत्रम् ॥ अस्याजरासः सप्तदश, पक्षित् द्वादश, विभ्रा उ. वि. अ.

ट् चतुर्दश, प्रवावृजऽएकादश, प्रवायुं पञ्चदश, प्रवीरया पञ्च ॥ ३३ ॥

दश,ऽआनस्त्रयोदश, सप्त सप्तनवतिः [अ. ३३ मं. ९७

अनु. ७] ॥ हरिः ॐ ॥ अस्याजरासः ॥ अस्याजरासोदमाम्

रित्राऽअर्च्चद्धूमासोऽअग्नयः पावकाः ॥ श्वितीचयः श्वात्रा

सोभुरण्यवोवनर्षदोवायवोनसोमाः ॥ १ ॥ हरयोधूमके ॥ ९८ ॥

---

१ वनसदः इति पदम् । अत्र "वनसदोऽवेरो रेफेण" (शु. य. प्रा. ३ अ. ४८ सू.) इत्यनेन सदशब्दे परे वनशब्दो रेफेण व्यवधीयते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तवः ॥ हरयोधूमकेतवोव्वातजूताऽउपद्यवि ॥ सतन्तेवृथग
ग्नयः ॥२॥ सजानः ॥ संजानोमित्रावरुणासजादेवाँ२॥ऽ
ऋतम्बृहत् ॥ अग्नेसक्षिस्वन्दमम् ॥ ३ ॥ सुक्ष्वाहि । देव
हूतंमाँ२॥ऽअश्वाँ२॥ऽअग्नेरथीरिव ॥ निहोतापूर्व्यःसदः ॥४॥
द्वेविरूपे । चरतःस्वर्त्थेऽअन्यान्यावत्समुपधापयेते ॥
हरिरन्यस्याम्भवतिस्वधावान्[2]छुक्रोऽअन्यस्यान्ददृशेसुवर्च्चाः ७४१

१ सजानो । अत्र सजशब्दस्य ह्रस्वाकारस्य नः इति नकारे परे "धारयात्र स्वेजाव" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घाकारः ।
२ स्वधावान्छुक्रः । अत्र "शकारे च" (शु. य. प्रा. ४ अ. ९६ सू.) इत्यनेन शकारे परे तवर्गश्चवर्गं प्राप्नोति । अतः शुक्रस्य शकारे परे स्वधावान् इत्यस्य नकारस्य ञकारः । ततः "परश्चास्पर्शपरश्छम्" (शु. य. प्रा. ४ अ. ९७ सू.) इत्यनेन शकारस्य छकारे कृते "स्वधावाञ्छुक्र" इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ ५ ॥ शतम् ॥ १७०० ॥ अयमिह । प्प्रथमोधायिधातृ
भिर्होतायजिष्ठोऽअद्ध्वरेष्ष्वीड्यं÷ ॥ यमप्प्नवानोभृगवोविरुरु
चुर्व्वनेषुचित्रंव्विब्भ्वंव्विशेविशे ॥ ६ ॥ त्रीणिशता । त्रीसहस्रा
ण्ण्यग्ग्निन्त्रिꣳशच्चदेवानवचासपर्य्यन् ॥ औक्क्षन्घृतैरस्तृणन्ब
र्हिरस्म्माऽआदिद्धोतारन्न्यसादयन्त ॥ ७ ॥ मूर्द्धानन्दिवः ॥
मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्श्वानरमृतऽआजातमग्ग्निम् ॥ ॥ ११ ॥
कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ ८ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अ॒ग्निर्वृ॒त्राणि॑ । जङ्घनद्द्रवि॒ण॒स्युर्विं॑प॒न्यया॑ ॥ समि॑द्धꣳ शु॒

क्रऽआहु॑तꣳ ॥९॥ विश्वे॑भिꣳ सो॒म्म्यम् ॥ विश्वे॑भिꣳ सो॒म्म्यम्म

द्ध्वग्न॒ऽइन्द्रे॑णव्वा॒युना॑ ॥ पिबा॑मि॒त्रस्य॒धाम॑भिꣳ ॥१०॥ आयत् ॥

आयदि॒षेनृ॒पति॒न्तेज॒ऽआन॒ट्शु॒चि॒रेतो॒निषि॑क्त॒न्द्यौर॒भीके॑ ॥

अ॒ग्निः शर्द्ध॑मनव॒द्यꣳ यु॒वान॑ꣳ स्वा॒ध्यञ्ज॒नयत्त्सू॒दयं॑च्च ॥११॥ ७४३

अग्ने॒शर्द्ध॑ । महतेसौभ॑गायत॒वद्युम्न्ना॒न्युत्त॒मानि॑सन्तु ॥

१ पिबा[मि]त्रस्य । अत्र "शृणुतत्विपिध्रजिभवतपिबेतस्यमतिष्ठरक्षा मकारे" (शु. य. प्रा. ३ अ. ११७ क.) इत्यनेन मकारे बस्य दीर्घे पिबामित्रस्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सञ्ज्ञाँस्पत्त्यꣳसुयममाकृणुष्ष्वशत्रूयतामभितिष्ठामहाꣳसि
॥ १२ ॥ त्वाꣳहि । मन्द्रतममर्क्कशोकैर्व्ववृमहेमहिनःश्रो
ष्यंग्ने ॥ इन्द्रन्नत्त्वाशवसादेवतांव्वायुम्पृणन्तिराधसानृतमाः
॥ १३ ॥ त्वेऽअंग्ने । स्वाहुतप्प्रियासंःसन्तुसूरयंः ॥ सन्ता
रोयेमघवानोजनानामूर्व्वान्दयन्तगोनाम् ॥ १४ ॥ श्रुधिश्श्रु
त्त्कर्ण्ण ॥ श्रुधिश्श्रुत्त्कर्ण्णव्वह्निभिर्द्देवैरग्नेसयावभिः ॥ आसी
दन्तुबर्हिषिमित्त्रोऽअर्य्यमाप्प्रातर्य्यावाणोऽअद्ध्वरम् ॥ १५ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्विश्वेषामदितिः ॥ व्विश्वेषामदितिर्य्यज्ञियानांव्विश्वेषामतिथिर्म्मानुषाणाम् ॥ अग्निर्देवानामवऽआवृणानः सुमृडीको भवतुजातवेदाः ॥ १६ ॥ महोऽअग्नेः । संमिधानस्यश र्म्मण्ण्यनांगामित्रेव्वरुणेस्वस्तये ॥ श्रेष्ठेस्यामसवितुः सवीमनितद्देवानामवोऽअद्यावृणीमहे ॥ १७ ॥ [१७-१] आपश्चित् ॥ आपांश्चित्पिप्प्युस्त्तर्य्योनगावोनक्षन्नृतञ्जरितारस्त्तऽ

१ अद्या वृणीमहे । अत्र "अद्य तं हकारचकारभवतवृणीमहे देवेषु" (शु. य. प्रा. ३ अ. १५५ सू.) इत्यनेन अद्य इत्यस्य वृणीमहे परे दीर्घे अद्यावृणीमहे अद्य शब्दस्य दकारस्य स्वरात्सं० इत्यनेन द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इन्द्र ॥ याहिव्वायुर्न्ननियुतोनोऽअच्छात्त्वᳬहिधीभिर्द्दयसेव्वि
वाजान् ॥ १८ ॥ गावऽउप ॥ गावऽउपावतावतम्महीयज्ज्ञ
स्यरप्सुदा ॥ उभाकर्ण्णाहिरण्ण्यया ॥ १९ ॥ यदुद्य । सूरऽ
उदितेनागामित्त्रोऽअर्य्यमा ॥ सुवातिसविताभगः ॥ २० ॥
आसुतेसिञ्चतश्श्रियᳬरोदस्योरभिश्श्रियम् ॥ रसादधीतवृष
भम् ॥ तम्प्रत्क्कथा[1]यंव्वेनः ॥ २१ ॥ आतिष्ठन्तम्परि ॥ आति

१ तम्प्रत्क्कथा. १ अ. ७ मं. १२ ॥ १ अयंव्वेनः. १ अ. ७ मं. १६ ॥ इति प्रतीके ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ष्ठन्तम्परिविश्वेऽअभूषञ्छ्रियोव्वसानश्चरतिस्वरोचिः ॥ मुहत्त
द्वृष्णोऽअसुरस्यनामाव्विश्वरूपोऽअमृतानितस्थौ ॥ २२ ॥
प्रवः ॥ प्रवोमहेमन्दमानायान्धसोर्च्चा[1]व्विश्वानराय[2]व्विश्वाभुवे[3] ॥
इन्द्रस्ययस्यसुमखᳫंसहोमहिश्श्रवोनृम्णञ्चरोदसीसपर्य्यतः
॥ २३ ॥ बृहन्नित् ॥ बृहन्निदिध्मऽएषाम्भूरिशस्त्तम्पृथुः
स्वरुः ॥ येषामिन्द्रोयुवासखा ॥ २४ ॥ इन्द्रेहि ॥ इन्द्रेहि

१ अर्चांव्विश्वानराय । अत्र "अध्वरश्मिमतिसुमति०" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन विश्वानराय इत्यस्य वकारे परे अर्चशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । २ विश्वानराय । अत्र "नरहामित्रेषु च" (शु. य. प्रा. ३ अ. १०३ सू.) इत्यनेन नरशब्दे परे विश्वशब्दाकारस्य दीर्घाकारो विधीयते । ३ विश्वाभुवे । अत्र "विश्व सहभुवपुषवसुषु" । (शु. य. प्रा. ३ अ. १०२ सू.) इत्यनेन भुवे परे विश्वशब्दाकारस्य दीर्घाकारः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

.०२॥

मत्स्यन्धंसोविश्वोभिःसोमपर्व्वभिः ॥ मुहाँ२॥ऽओभिष्टिरोज
सा ॥ २५ ॥ इन्द्रोवृत्रम् ॥ इन्द्रोवृत्रमवृणोच्छर्द्धनीतिःप्र
मायिनाममिनाद्वर्पणीतिः ॥ अहृन्व्यꣳसमुशधग्गवनेष्वा
विर्द्धनाऽअकृणोद्राम्म्याणाम् ॥ २६ ॥ कुतस्त्वम् ॥ कुतस्त्व
मिन्द्रमाहिनःसन्नेकोयासिसत्पतेकिन्तऽइत्था ॥ सम्पृच्छसे
समराणःशुभानैर्व्वाचेस्त्तन्नोहरिवोयत्तेऽअस्मे ॥ मुहाँ२॥ऽइ ॥१०२॥

---

१ मुहाँ२॥ऽइन्द्रोय. १ अ. ७ मं. ४० ॥ १ कुदाचुन. अ. ८ मं. २ ॥ १ कुदाचुनप्र. अ. ८ मं. ३ ॥ इति प्रतीकानि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्द्रोयऽओजंसाकुदाचुनस्त्तुरीरंसिकुदाचुनप्प्रयुंच्छसि ॥२७॥
आतत् ॥ आतत्तंऽइन्द्रायवं÷पनन्ताभियऽऊर्वङ्गोमंन्तान्ति
तृंत्त्सान् ॥ सकृत्त्स्वँ्स्येपुंरुपुत्त्राम्मुहीꣳसहस्त्रंधाराम्बृहतीन्दुं
दुंक्क्षन्[1] ॥२८॥ इमान्तैं ॥ इमान्तोधियम्प्रभंरेमहोमुहीमुस्य
स्त्तोत्त्रेधिषणायत्तंऽआनजे ॥ तमुंत्त्सवेचंप्प्रसुवेचंसासुहिमि ७४१
न्द्रंन्देवासꣳशवंसामदुन्ननुं ॥२९॥ [१२-२] व्विभ्राड्बृहत् ॥

---

१ "दुदुक्षन्"। अत्र दुधुक्षन् इति पदम्। "दुधुक्षन्धो दकारम्" (शु. य. प्रा. ३ अ. ५५ सू.) इत्यनेन दुधुक्षन् शब्दघटितस्य धकारस्य दकारः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्विब्भ्राड्बृहत्त्पिबतुसोम्म्यम्मद्ध्वायुर्द्दधंद्यज्ञपंतावविंह्रुतम् ॥
व्वातंजूतोयोऽअंभिरक्षंतित्त्मनांप्प्रजाःपुंपोषपुरुधाव्विरांज
ति ॥३०॥ उदुत्त्यम् ॥ उदुत्त्यञ्जातवेंदसन्देवंव्वंहन्तिकेतवंः ॥
दृशेव्विश्श्वांयसूर्य्यंम् ॥३१॥ येनांपावक ॥ येनांपावकचक्क्षं
साभुरण्यन्तञ्जनाँ२॥ऽअनुं ॥ त्वंव्वंरुणपश्श्यंसि ॥३२॥ दैव्व्यां
वद्ध्वर्य्यू ॥ दैव्व्यांवद्ध्वर्य्यूऽआगंतह्रथेनसूर्य्यंत्त्वचा ॥ मद्ध्वां
यज्ज्ञꣳसमंञ्जाथे ॥ तंम्प्रत्क्नथायंव्वेनांश्श्चित्रन्देवानांम् ॥ ३३ ॥

१ तंप्रत्क्नथां. १ अ. ७ मं. १२ ॥ १ अयंव्वेनः० १ अ. ७ मं. १६ ॥ १ चित्रंदेवानाम्. १ अ. १३ मं. ४६ ॥ इति प्रतीकानि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आनः ॥ आनऽइडाभिर्विदथेसुशस्तिविश्वानरꣳसवितादेवऽ
एतु ॥ अपियथासुवानोमत्त्सथानोविश्वञ्जगदभिपित्वेमनी
षा ॥ ३४ ॥ यदद्य । कच्चवृत्रहन्नुदगाऽअभिसूर्य्य ॥ सर्वं
न्तदिन्द्रतेवशे ॥३५॥ तरणिर्विश्वदर्शतꣳ ॥ तरणिर्विश्वदर्श
तोज्ज्योतिष्कृदसिसूर्य्य ॥ विश्वमाभासिरोचनम् ॥३६॥ तत्सू
र्य्यस्य । देवत्त्वन्तन्महित्त्वम्मद्ध्याकर्त्तोर्विततꣳसञ्जभार ॥ ७७१

१ मत्सथ नः इति पदम् । अत्र मत्सथ इत्यस्य थकारस्य ह्रस्वाकारस्य नः इति नकारे परे "धारयाम०" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन
सं. ७,७ दीर्घाकारे मत्सथानः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यदेदयुक्तहरितः सधस्थादाद्रात्रीव्वासस्तनुते सिमस्मै ॥ ३७ ॥ तन्मित्रस्य ॥ तन्मित्रस्यव्वरुणस्याभिचक्षे सूर्य्योरूपङ्कृणुते द्द्योरुपस्थे ॥ अनन्तमन्यद्द्रुशदस्यपाजः कृष्णमन्यद्धरितः सम्भरन्ति ॥ ३८ ॥ बण्महान् ॥ बण्महाँ२॥ऽअसि सूर्य्यबडादित्त्यमहाँ२॥ऽअसि ॥ महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ२॥ऽअसि ॥ ३९ ॥ बट्सूर्य्य ॥ बट्सूर्य्यश्श्रवसा

---

१ अत्र बदमहान् । "पञ्चमे पञ्चमम्" (शु. य. प्रा. ४ अ. १२१ सू.) इत्यनेन पञ्चमे स्पर्शे परे अपञ्चमः स्पर्शः पञ्चमो भवति । इति टस्य णकारे द्वित्वे च रूपम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महाँ२॥ऽअसिसत्रादेवमहाँ२॥ऽअसि ॥ मह्नादेवानामसुर्य्यः

पुरोहितोविभुज्योतिरदाभ्यम् ॥४०॥ श्रायन्तऽइवसूर्य्यम् ॥

श्रायन्तऽइवसूर्य्यंविश्वेदिन्द्रस्यभक्षत ॥ वसूनिजातेजनमा

नऽओजसाप्प्रतिभागन्नदीधिम ॥४१॥ [1]अद्यादेवाः ॥ अद्यादे

वाऽउदितासूर्य्यस्यनिरंहसःपिपृ[2]तानिरवद्यात् ॥ तन्नोमित्रो

वरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः ॥ ४२ ॥

---

१ अद्यदेवाः । अत्र "अद्य तं हकारचकारभवत वृणीमहे देवेषु" (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन देवाः इति परे दीर्घे अद्यादेवाः । २ पिपृत निरवद्यात् इति पदम् । अत्र तकाराकारस्य निघटितनकारे परे "धारयामः°" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घे पिपृतानिरवद्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

. य. उ. वि.
हि. अ.

२०५॥ आकृष्ण्णेनं ॥ आकृष्ण्णेनरजंसाव्वर्त्तमानोनिवेशयंन्नमृतम्म
र्त्त्यंञ्च ॥ हिरण्ण्ययेनसवितारथेनादेवोयांतिभुवंनानिपश्श्यं ॥ ३३ ॥
न् ॥ ४३ ॥ [१४-३] [1]प्रवांवृजे । सुप्प्रयाबर्हिरेषामावि
श्प्पतीवबीरिटऽइयाते ॥ व्विशामक्क्तोरुषसंः पूर्व्वहूंतौव्वायुः
पूषास्वस्त्तयेंनियुत्त्वांन् ॥ ४४ ॥ इन्द्रवायूबृहस्प्पतिम् ॥
इन्द्रवायूबृहस्प्पतिंम्मित्त्राग्ग्निम्पूषणम्भगंम् ॥ आदित्त्या ॥ २०५ ॥

१ प्रववृजे इति पदम् । अत्र "ववृधववृजोः" (शु. य. प्रा. ३ अ. ११४ सू.) इत्यनेन वृजे परे वेत्यस्य ह्रस्वाकारस्य दीर्घाकारे प्रवावृजे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्मारुतङ्गणम् ॥ ४५ ॥ व्वरुणः प्प्राविता । भुवन्मित्रोविश्वाभिरूतिभिः ॥ करतान्नः सुराधसः ॥ ४६ ॥ अधि नः ॥ अधिनऽइन्द्रैषांव्विष्णोसजात्यानाम् ॥ इतामरुतोऽश्विना ॥ [2]तम्प्रत्क्कथायंव्वेनोयेदेवासऽआनुऽइडाभिर्व्विश्वेभिः सोम्म्यम्मद्ध्वोमासश्च्चर्षणीधृतः ॥४७॥ अग्ग्नऽइन्द्र ॥ अग्ग्नऽइन्द्रव्वरुणमित्रदेवाः शर्द्धः प्प्रयन्तमारुतोतव्विष्णो ॥ उभा ७५५

१ इतमरुतः । अत्र "ऋणुतस्विषिध्रजिभवतपिबेतस्तसतिष्ठरक्षा मकारे" (शु. य. प्रा. अ. ३ सू. ११७) इत्यनेन मकारे परे दीर्घे इतामरुतः । २ तंप्रत्क्कथा. अ. ७ मं. १२ ॥ १ अयंव्वेनः. अ. ७ मं. १६ ॥ १ येदेवासः. अ. ७ मं. १९ ॥ १ आनुऽइडाभिः. अ. ३३ मं. ३४ ॥ १ विश्वेभिः सोम्म्यम्. अ. ३३ मं. १० ॥ १ ओमासश्चर्षणीधृतः. अ. ७ मं. ३३ ॥ इति प्रतीकानि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नासंत्त्यारुद्द्रोऽअंधग्ग्नाः पूषाभगंःसरंस्वतीजुषन्त ॥ ४८ ॥
इन्द्राग्ग्नीमित्त्रावरुंणा ॥ इन्द्राग्ग्नीमित्त्रावरुणादिंतिंःस्वः
पृथिवीन्द्यांम्मरुतंःपर्व्वंताँ२॥ऽअपः ॥ हुवेविष्ण्णुम्पूषणम्ब्रह्म
णस्प्पतिम्भगन्नुशꣳसंꣳसवितारंमूतयें ॥४९॥ अस्म्मेरुद्द्राः ॥
अस्म्मेरुद्द्रामेहनापर्व्वंतासोवृत्त्रहत्त्येभरंहूतौसजोषांः ॥ सꣳ
शꣳसंतेस्त्तुवतेधायिंपज्ज्रऽइन्द्रंज्ज्येष्ठाऽअस्म्माँ२॥ऽअंवन्तुदे
वाः ॥५०॥ अर्व्वाञ्चोऽअद्य ॥ अर्व्वाञ्चोऽअद्याभंवतायजत्राऽ

१ अद्य भवत । अत्र "अद्य तं हकारचकारभवतवृणीमहे देवेषु" (शु. य. प्रा. अ. ३ सू. ११५) इत्यनेन भवतपदे दीर्घे अद्याभव इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आवोहार्हिं भयंमानोव्ययेयम् ॥ त्राद्ध्वंन्नोदेवानिजुरोवृकंस्य
त्राद्ध्वंङ्कर्त्तादवपदोयजत्राः ॥ ५१ ॥ विश्वेऽअद्य । मरुतोवि
श्वऽऊतीविश्वेभवन्त्वग्नयःसमिद्धाः ॥ विश्वेनोदेवाऽअवसा
गमन्तुविश्वमस्तुद्रविणंवाजोऽअस्मे ॥ ५२ ॥ विश्वेदेवाः ।
शृणुतेमꣳहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजि
ह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादयद्ध्वम् ॥ ५३ ॥

२ उपद्यविष्ठ । "यवेश्च" (शु. य. प्रा. अ. ३ सू. ५९) इत्यनेन यविशब्दात्परस्य स्थघटितसकारस्य षत्वे ष्टुत्वे "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. अ. ४ सू. १०२) इत्यनेन ठकारस्य द्वित्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शु. य. संहि. देवेभ्योहि। प्रथमँऽयुज्ञियेभ्योमृतत्त्वᳬसुवासिभागमुत्त व. वि.
॥१०७॥ मम्॥ आदिद्दामानᳬसवितर्व्यूर्णुषेनूचीनाजीविताामानुषे भ.
भ्यः॥५४॥ [११-४] प्रवायुम्॥ प्रवायुमच्छांबृहती ॥ ३२ ॥
मंनीषाबृहद्रयिंविश्ववांरᳬरथप्राम्॥ द्युतद्यामानियुतःपत्त्यं
मानःकुविःकुविमियक्षासिप्रयज्ज्यो॥५५॥ इन्द्रवायूऽइमे।
सुताऽउपप्रयोभिरागंतम्॥ इन्दवोवामुशन्तिहि॥५६॥ ॥ १०७॥
मित्रᳬहुवे। पूतदंक्षंवरुणन्नरिशादंसम्॥ धियंघृताचीᳪसा ७५८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

